R
S
V
L
00986

178/XX
986

986

Registered No. M 2300.

Book XX || श्रीः || Nos. 1, 2, 3 & 4

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. २० ] कलि- ५०४७ } व्यय || कन्या, वृश्चिक-साधारण सं १, ३
तुला, धनुः-शाखानुबन्धः सं २, ४
आह्त्य ,, ४

# The UDYANA PATRIKA.

### A SANSKRIT MONTHLY

September, October November & December } 1946

A 19

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription Re. One only.
Do. With Sanskrit Supplement Rs. 2—0—0

उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यमेकं रूप्यम् । सानुबन्धाया द्वे रूप्ये ।

२. कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।

३. ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।

४. वर्षमध्ये ग्राहकीभवतामपि कन्यासंचिकादिरेव पत्रिका प्रेष्येत ।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।

६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसंपादकाय प्रेषणीयाः।

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण) ।

८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor*, The Srinivasa Press,
Tiruvadi P. O. Tanjore Dt.

निर्वाहकसम्पादकः— *Mimamsarnava, Mimamsakesari*
*Panditaraja* **D. T. Tatacharya Siromani M. O. L.,**
Lecturer, Sri Venkateswara College,
TIRUPATI.

## विषयाः ॥

शास्त्रानुबन्धः—
कुवलयानन्दः । [चुम्बरञ्जनीसमेतः] १८१—१८८

1 मेनका ।
2 सुभाषितनीवी ।
3 न (प्र) २ ।
4 मुद्रणकौशलम् ।
5 आद्यन्तौ टङ्कितौ ।
6 रामस्य प्रेष्ठः सुहृत् कः ।
7 पुस्तकपरामर्शः ।

युष्मदीये रामायणे किं रामः सीतामचिन्तयन् उपेक्षाञ्चक्रे। तस्याः प्रत्याहरणानन्तरं हि पातिव्रत्यं भग्नं न वेति परीक्ष्य तां पर्यगृह्णात्। स खलु पुंसां धर्मः। यद्ययं युष्मत्स्त्रीणां मनोदार्ढ्यं प्रति एवं दुर्बलप्रत्यया भवथ तदाश्चर्यं भवति। श्वेतानामस्माकं जातौ स्त्रीषु एवं लघु अविश्वासं न कुर्युः। तासां मनसो दार्ढ्यं सकृद् दृष्टवन्तश्चेत् तासां यत्र क्वापि गमनेऽपि तासां चित्तवृत्तिं प्रति इत्थं न संशयीरन्। स्त्रीजनानां मनोदार्ढ्यं नास्तीति किं मन्यध्वे। युष्मन्मनो वा सुन्दरीणां दर्शने चलेत्। ताः मनसाऽपि नान्यं पुरुषं स्मरेयुः।

तच्छ्रुतवतो वाराहस्वामिनो मनसि यत् सोऽवदत् तत् न्याय्यमित्यभात्। तथापि तां प्रति कश्चन कोपश्च तस्य मनस्यभूत्। सर्वथा परमार्थ इति निश्चिते तस्मिन् विषये सा केवलं तत्त्वं भाषमाणा वृथा वादं करोतीति मन्यमानः 'यत् त्वं वदसि तत् सम्यगेव। मम गृहे स्थिते मे सोदर्यौ न जातु मां वञ्चयेताम्। तस्मात् ते किमपि कष्टं कृतवत्यौ स्यातामिति स्मर्तुमपि न शक्यम्। तयोः रक्षणे स्थितां तां कोचित् प्रतार्य नीतवन्तः स्युरित्यप्यसंभावितम्। तस्मात् स्वयमेव सा कृतप्रयत्ना पूर्णेन हृदयेन गता भवति। तत्र नैव सन्देहः। तेनास्माकं तत्प्रत्यानयनं न न्याय्यम्।' इत्यवदत्।

तदाकर्णितवती सा श्वेतधात्री अतीव करुणावती विषण्णा च 'हन्त तपस्विन्यौ सोदर्यौ न वञ्चनां कुर्याताम्। परं तु जीवितस्य जीवितभूता पत्नी परं कुर्यात्। आम् आम्। सत्यमेव। अभ्यधिकं प्रेम ये कुर्वन्ति तत्रैव संशयकरणं लोकस्वभावः। तदस्तु। किं यूयमपरं मुख्यं विषयं अवहितवन्तः। तञ्जापुरे वसन्ती सा नाटकदर्शिनी बभूवेति। पृथक् एकं गृहं परिकल्प्य तत्र रहसि नाटककारेण सङ्गमवती बभूवेति च ज्ञायते हि लेखाभ्याम्। तत्र स्थितयैव नाटककारेण सह मद्रं धावित्वा एकान्ते क्वचिदवस्थानं किं सुकरं, अथ वा युष्मद्गृहागमनानन्तरं तत्र स्थितया ? युष्मभ्यं विलिख्य स्वनयनं प्रार्थ्य महता क्लेशेन युष्मद्गृहमागत्य ततः परं

गमने किं नाम कारणम् ? युष्मद्गृहात् अविज्ञातनिर्गमनं कथमिति किं न सा पर्यालोचितवती भवेत्। नाटककारे प्रेमाणं कृतवती तथैव गन्तुं मतिं कुर्यात् । न तु जातु स्वपुरुषं प्रत्यागन्तुम् । तादृ-श्याः खलु स्वपुरुषो निष्फलमेव' इति जगाद ।

तदाकर्णितवान् वराहस्वामी चिन्तायां ममज्ज । तन्मनसि महती वैयाकुली बभूव । मेनका अपराधिनीति मनितवतस्तस्य अध्यवसायः कथमपि शिथिलीभवितुमारभत। किं नु जातु सा निरपराधा भवेदिति सन्देहस्तस्य मनसि मुहुः प्रादुर्भूय प्रादुर्भूय तिरोदधे । चाञ्चल्यं वासमकरोत् । वस्तुतः कथं नु सा तिरो-दधे ? कथं नु लेखावागच्छतामिति बहुधा चिन्तयितुमारभत । स्वापेक्षया सा श्वेतकन्या तीक्ष्णतरबुद्धिरिति मत्वा सः तया भूयः सम्भाषितुमैच्छत् । स्वगृहिणीविषये इतोऽप्यनुकूलां यां कामपि वार्तां सा प्रकाशयेदिति, तेन स्वस्य किमपि फलं भवेदिति च मन्यमानः सः किमपि भाषितुमारभत ।

तस्मिन् समये तस्य गृहस्य कवाटमुद्घाटयत । भिषक् हूणः हूणी च अन्तः प्राविशताम् । तौ दृष्ट्वा संभ्रान्तो वराहस्वामी खट्वायां शान्तमशेत । धात्री उत्थाय समर्यादमपसृत्य तस्थौ ।

अनुपदं हूणी उपखट्वं गत्वा वराहस्वामिनो नाडीं पर्यैक्षत । धात्र्या मुखमैक्षत । 'अयि एमलि, सुस्थितस्यास्य शरीरं यदद्य पट-पटायते तत्र किं कारणम्' इति साधिकारं पप्रच्छ ।

एमलीति नाम वहन्ती सा 'नाहं तत्कारणं जानामि' इत्यब्र-वीत् ।

हूणी— ओहो । न जानासि नु त्वम् । त्वया अनेन साकं किमपि सम्भाषितव्यया भवितव्यम् । अन्यथा नैवं भवेत् । त्वं महा-वाचाटा । किमपि भाषमाणैव भवेः । तव अस्मिन् गृहे अव-स्थापनमेवायुक्तम् । अन्यस्मै कस्मैचिद् गृहाय त्वां प्रेषयिष्यामः । यदत्र जाग्रत्या भवितव्यमित्यवोचाम । तदर्थं नु इत्थमकार्षीः । इदं गत्वा आदेशं प्रेषयिष्यामः । सज्जा भव गृहान्तरं गन्तुम् ।

सौकर्यस्य स एव विधाता । मेनकाऽऽनयनरात्रौ गृहकवाटमुद्धारितवान् स एव । स्वेन किं कर्तव्यमिति नैनामहम्मदः तेन कर्मकरेण साकं दीर्घकालं समालोचनं चकार। अन्ते तावुभावपि कमपि निर्णयं प्राप्नुताम् । अनन्तरवीथ्यां सैयद् इमां-अस्य गृहे नैना-महम्मदेन कतिचित् दिनानि निलीनेन भाव्यमिति, अपि तु 'व्यापार'निमित्तं स नागपट्टणं गत इति सैयद् इमाम्- अनेन वदता भाव्यमिति च निश्चित्य तथैव अकुरुताम् । एकं वारं नना महम्मदः तत्र निलीन आसीत् । किं तु स नागपट्टणं गत इति कर्मकरः लेखकादिभ्यः मिथ्या वदन्नासीत् । एकस्मिन् वारे गतेऽपि स्वगृहिणी स्वगृहं नागतेति नैनामहम्मदो व्यजानात् । मैलापुरप्रासादे तेषां कोऽभिप्राय इति वेदितुं सैयद् इमाम्-अनेन बहुधाऽपि कृतः प्रयत्नो न फलति स्म । तस्मात् इतोऽपि कति नु दिनानि निलीय स्थातव्यमिति चिन्तापरितप्तः नैनामहम्मदः कारागृह इव वसन् प्रव्यथितो बभूव। सैयद् इमां नैनामहम्मदस्य आहारादिसंविधानार्थमिति प्रतिदिनं अमितं वित्तं गृहीत्वा मांसादीन् महार्घान् आहारान् सज्जीकृत्य स्वयं बुभुजे वित्तं च बहु जग्राह । अथापि नैनामहम्मदं भीषयित्वा ततोऽपि बहुतराणि दिनानि स्वगृह एव वासयितुमिच्छन् तदुचितानि बहून्यनृतानि वदन्नासीत् ।

कस्मिंश्चित् दिने सः नैनामहम्मदेन सह साचिन्तं सभयं च समुपन्नवर्तत । तदा नैनामहम्मदः तं दृष्ट्वा 'श्वशुर एव पालकेभ्यो लिलेखेति नु मान्त्रिकोऽवादीत् ? तथा चेत् मम रक्षणमशक्यम् । नूर्जहान् अपि मम प्रतिकूलमेव साक्ष्यं वदेत् ।' इति सन्त्रस्त उवाच ।

सैयद् इमां- स मान्त्रिक एव खलु तदुचितानि संविधानानि विधाय त्वां कामप्यापदं विना रक्षिष्यामीति वदति । इतः परं तत्र प्रति किमिति चिन्ता क्रियते । स केरलीयो मान्त्रिकः । महासमर्थः । किमपि लोकनाथस्यैव सङ्कल्पेन सोऽस्माकं गृहमभ्यागतः।

एवं भीष्मपरोऽपि । उन्नताः बलशौर्यादिभिरुत्कृष्टा अपि केचित् भीष्मः । बहुभिः अर्जुनविसृष्टैरनन्तबाणैः यो भङ्गो निर्घातः तेन भ्रमः कृत्याकृत्यविवेकान्धता । तेन आकुलाः । प्रकारान्तरेण तत्परिहारकरणासमर्था इति यावत् । उत्पथात् उन्मार्गमाश्रित्य भिन्नसेतवः युद्धार्थमभिमुखा एव निहन्तव्या इत्यादिधर्मयुद्धव्यवस्थामप्युद्धूय तरसा सद्य एव तटस्थानपि रथतटे आयुधं न ग्रहीष्यामीति प्रतिज्ञापूर्वकमवस्थितमपि श्रीकृष्णं निघ्नन्ति बाणमोक्षैः प्रहरन्ति । महतामपि मर्यादालङ्घनं समयविशेषे संभावितमिति किमुत क्षुद्राणामिति भावः । सर्वत्र बहुवचनं पूजायां सामान्योक्तिमहिम्ना वेति ध्येयम् ।

एवं वामनभूमिकापरोऽपि बोधः । उत्पथादुन्नताः । प्रथमं वामनवेषमाश्रित्य याचिते पदत्रयपरिमिते भूतले बलिना प्रदत्ते सद्य एव वञ्चनमार्गादत्युन्नतवेषपरिग्रहभाजः । अत एव बहुभङ्गभ्रमाकुलाः ऊर्ध्वोत्क्षिप्तस्य पादस्य बहुषु दिक्भित्तिषु भङ्गः प्रतिघातः भ्रमः एकत्र पादप्रसारणप्रतिघाते तत्परिसरेष्ववकाशलिप्सया इतस्ततः पर्यटनं तेन आकुलाः अन्ततः कथञ्चिदपि स्थानविशेषमलभमानाः तरसा भिन्नसेतवः । अत्युदारोऽयं न मर्दनीय इत्यादिव्यवस्थामप्युद्धूय तटस्थानपि निघ्नन्ति महागुणशालिनमनपराधमपि बलिं च वञ्चनमार्गेण विमथ्नन्तीत्यर्थः । तच्छिरसि पादं वि(नि ?)क्षिपन्तीति यावत् ।

एवं परशुरामपरोऽपि । उन्नताः तपश्चर्यादिषूत्कृष्टा अपि उत्पथात् तादृशब्राह्मणपथविरुद्धक्षत्रियादिमार्गात्, बहूनां क्षत्रियजातीनां भङ्गः भञ्जनम्, भ्रमः इतस्ततः क्षत्रियजात्यन्वेषणार्थं परिभ्रमणं तेन आकुलाः तदेकव्यापारसक्ताः, तरसा भिन्नसेतवः तपस्विनां परहिंसानिषेधकशास्त्रव्यवस्थामवधूय तटस्थानपि स्वमातुरुदरतटस्थानपि गर्भरूपान् क्षत्रियशिशून् निघ्नन्ति, तन्मातृध्वंसपूर्वकं शिशूनपि विमथ्नन्ति । उक्तं ह्यनर्घराघवे 'वारा-

नासन्नान्विंशान् विशसितविषमक्षत्रजातिप्ररोहः क्रोधादुत्कृत्तगर्भामिषरुधिरवसा-विस्रगन्धिः कुठारः' इति । कार्तवीर्येनाम्नयेकस्मिन् द्रुह्यति उदासीनसर्वक्षत्रियजातीनामागर्भकृन्तनमनुचितमेवेति हृदयम् । क्रोधाग्निस्वभाव एतादृश इति द्योतनायैव भगवता तादृशाभिनयः कृतः । उक्तं हि प्रबोधचन्द्रोदये क्रोधवाक्यम्—'आगर्भं यावदेषां कुलमिदमखिलं नैव निश्शेषयामि स्फूर्जन्तः क्रोधवह्नेर्न दधति विरतिं तावदङ्गे स्फुलिङ्गाः' इति ।

अन्योऽपि मोक्षगामिचेतनपरः । केचित् श्रीवैकुण्ठगमनायोद्यताः उत्पथात् उन्नामकस्य सूर्यमण्डलमध्यवर्तिभगवतो मार्गात् 'तस्योदिति नामे'-त्यादित्यमण्डलान्तर्गतमधिकृत्य श्रुतेः तन्मार्गेण उन्नताः ऊर्ध्वमुत्क्रममाणाः बहवो भङ्गाः, अर्चिरादिभागभेदाः । भङ्गशब्दस्य भागार्थकता काव्यादि-भागसमाप्तौ प्रथमद्वितीयादिभङ्गव्यपदेशादुपलभ्यते । विद्युद्भिभङ्गः स्फुरितानि वायोरित्यादिप्रयोगाश्च । तत्र यो भ्रमः भ्रमणं सञ्चारः तेन आकुलाः सत्वरभगवत्प्राप्तिविळंबात् तदेकोत्सुकाः भिन्नः सङ्गतः सेतुः 'एष सेतुर्विधरणः एतं सेतुं तीर्त्वा' इत्यादिनिर्दिष्टो भगवान् यैस्तादृशाः (?) सङ्गतेऽन्यत्र फुले चेति विश्वः । परमतस्सेतून्मानेति सूत्रेषु सेतुशब्दस्य देशान्तरप्रापकपरतया व्याख्यानेन एतत्प्रकरणे तत्पदनिर्देशस्सुसङ्गत इति भावः । तरसा क्षिप्रं तटस्थानपि विरजातीरस्थितानपि भूतसूक्ष्मान् सूक्ष्मशरीरारम्भकान् तत्पर्यन्तानुयायिनोपीति यावत् । निघ्नन्ति निवर्तयन्ति, मनसैव विरजा-तरणश्रवणादिति भावः ।

एवं प्रपन्नपरतयाप्यर्थः । बहवो भङ्गाः आध्यात्मिकादिदुःखानुभवाः तैर्यो भ्रमः इतस्ततः पर्यटनं तेन आकुलाः व्याकुलचित्ताः प्राप्त-नैराश्या इति यावत् । अथ च उन्नताः उन्नामके आदित्यमण्डलान्तर्गते भगवति विनताः नमनश्चात्र प्रपत्तिरेव । नमस्कारात्मकं तस्मै विधायात्मनिवेदनमित्युक्तत्वात् । 'य एष आदित्ये पुरुषस्स परमेष्ठी ब्रह्मात्मेत्यारभ्य ओमि-

त्यात्मानं युञ्जीते'ति न्यासविद्याविधानेन उन्नाम्नि मता इत्युक्तम्। अथ च उत्पथात् उन्नतपथमाश्रित्य। उन्नतानामवनतिर्नतानां यत्र चोन्नतिरित्युक्तेः। भिन्नसेतवः पुण्यपापानां फलमवश्यं प्रदातव्यमितीश्वरव्यवस्थामपि भञ्जयन्तः तटस्थानपि फलप्रदानानुन्मुखान् उदासीनानपि सञ्चितपुण्यपापकूटान् तरसा प्रपत्तिक्षण एव निघ्नन्ति विनाशयन्ति। प्रारब्धमात्रपरिशेषयन्तीति भावः॥ ५॥

---

केनचिद्दान्तकृत्येन कुलगोत्रविमर्दिना।
मदेन बहुधा भिन्नं मातङ्गं मन्यते जनः॥ ६॥

केचिदद्य खलाः विशिष्टपुरुषपरिबुभूषया तद्वेषधारिणोऽपि 'अन्तर्दुष्टो बहिश्शान्तो ब्रह्मविद्वेषतत्पर' इत्युक्तरीत्यान्तरतीव कुटिलाः कुलगोत्रविनाशि-दुश्चरित्रप्रवणा दुर्मत्ताश्च वर्तन्ते। ते तु चण्डालवत् दूरपरित्याज्या इत्याह (केनचिदिति) दान्तकृत्येन तपश्चर्यायां प्रवर्तमानाः तत्क्लेशमसहमानाश्च दान्ताः, दान्तस्तु दमितेऽपि स्यात् तपःक्लेशसहे त्रिष्विति मेदिनी। तेषां कृत्यं वेषादिकं जटामण्डलधारणादिरूपं तेन कुलगोत्रविमर्दिनम्। कुलशब्देन प्रवर उच्यते। प्राथमिकपरम्परेत्यर्थः। गोत्रञ्च प्रसिद्धम्। यद्वा कुलं कुटुम्बः जनपदो वा, कुलं जनपदे गोत्रे सजातीयगणेष्वपीति मेदिनी। तद्विमर्दयति पीडयतीति तथोक्तम्। ब्राह्मण्यलोपापादकस्वैरदासीगमनादिदुश्चरित्रप्रव-णम्। मदेन बहुधा भिन्नम्। धनमदादिना बहुप्रकारेण कलुषितं तेन, जग-द्विरोधभयनिवृत्तिर्द्योत्यते। महाजनभयमतीवापेक्ष्य लोकविरुद्धकर्मकारिणं बहिश्शान्तवेषमित्यर्थः। भिन्नशब्दस्य सङ्गतार्थकता वा विभक्तार्थकता वा बोध्या। मदेन हेतुना जगतो विभक्तमित्यर्थः। सज्जनासंसृष्टमिति यावत्। जनः निखिलोऽपि जन्तुः मातङ्गं मन्यते। चण्डालं मन्यते। साधारण-

पतितदर्शनेऽपि युगमात्रापसरणविधानाद्दादशमहापतितसन्निधाने युगचतुष्टयपरिहरणावश्यकतया चण्डालतुल्यं जानातीत्यर्थः । उक्तं हि— युगं युगद्वयं चैव त्रियुगं च चतुर्युगम् । चण्डालसूतिकोदक्यापतितानामधः क्रमात् ॥ इति । विपरीतक्रमादित्यर्थः । अत एवोच्यते चण्डालाः प्रत्यवसिताः परिव्राजकतापसाः । नैष्ठिकानां वनस्थानां यतीनां चावकीर्णिनां । शूद्राणामपि लोकेऽस्मिन् प्रत्यासक्ति(त्ति?)र्न विद्यत इति । दान्तपदस्य यतिपरत्वे तु कुलगोत्रं परित्यज्य यत्याश्रमधारणेऽपि दुश्चर्याप्रवृत्तौ यत्याश्रमभ्रंशेन सह कुलगोत्रविनाशोऽपि फलितोऽभवादिति भावोऽवसेयः ।

एवं मत्तगजपरोऽप्यर्थः । केनचित् दन्तसर्वाङ्गकृत्येन वप्रक्रीडाख्येन कण्डूतिशमनार्थं स्वदन्तघाततो गिरिभेदनरूपेण । उक्तं हि— आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्शेति । कुलगोत्रविमर्दिनं कुलाचलानपि भिन्दानं मदेन ; बहुधा भिन्नं मदवशात् बहुप्रकारेण विभ्रान्तचित्तं भिन्नदन्तं वा सङ्गतं वा भिन्नस्स्यात् त्रिषु दारिते(द्ये) सङ्गतेऽन्यत्र फुल्ले चेति मेदिनी । तादृशजन्तुविशेषं जनो मातङ्गं मन्यते । गज इति निश्चिनोति इत्यर्थः ।

एवं रावणपरोऽपि । केनचित् दान्तकृत्येन सन्न्यासिवेषधारणेन .... विमर्दिनं श्रीरामकळत्रपीडकं किं जटायुषं मर्दयतीति तथोक्तं वा । मदेन शौर्यमदेन बहुधाभिन्नं उद्भ्रान्तचित्तं स्वविजयमेव सुदृढं निश्चित्य सीताप्रदानानुत्सुकं कुलगोजनः तत्कुटुम्बान्तर्गतो विभीषणादिः मातङ्गं मन्यते । चण्डालवत् परित्यज्य प्रत्यर्थिगोष्ठीमेवाशिश्रियन्ते । उक्तं हि— 'यान्ति न्यायप्रवृत्तस्य तिर्यञ्चोऽपि सहायताम् । अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति' इति ।

एवमुतङ्कवृत्तान्तपरोऽप्यर्थः । तथा ह्याश्वमेधिकपर्वणि कथा श्रूयते । भारतयुद्धसमापनानन्तरं द्वारकां प्रति प्रस्थितः श्रीकृष्णः मध्येमार्गं मरुकान्तारे तपस्यन्तमुतङ्कनामानं कञ्चन महर्षिं पश्यन् यथाक्रमं च पूजयन्

॥ श्रीः ॥

# उद्यानपत्रिका ॥

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्वेधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु. २०] कलि ५०४७ व्यय कन्या, वृश्चिक साधारण } सं १, ३
तुला, धनुः शार्वानुबन्ध } सं २, ४

पदमद्य करोत्येषा विंशे वयसि पत्रिका ।
वयोवृद्धपुरष्यस्या वर्धतां वीक्षणाद्विभोः ॥

---

## न (प्र) २ ॥

—◇—

I

अत्र प्रकाश्यमानायां कुवलयानन्दव्याख्यायां बुधरञ्जन्यां १४६ पुटे—

अतियजतीति । देवतामतिक्रम्येति विग्रह (?) । 'अतिरतिक्रमणे च' इति कर्मप्रवचनीयत्वाद् द्वितीया । यदि यजेत अर्थादन्यां देवतामिति लभ्यते । शेषो वा । उभयतः देवताद्वयतः च्यवते न (प्र) भ्रश्यति । कुलक्रमादागतमपरित्यागीति निजदेवतया, कुलक्रमादागतामपि परित्यजन् अव्यवस्थितचित्तोऽयं मामपि परित्यक्ष्यतीत्यत्र किं वक्तव्यमित्यन्यदेवतया च उपेक्ष्यत इति भावः ।

इति मुद्रणमस्ति । अत्र दोषदर्शिनः न (प्र) इत्येतत्प्रति एवमवोचन्—

1 अत्र नकारः कथं घटेतेति पर्यालोचनशक्तिर्नासीत् ।

2 आन्ध्रलिप्यां नकारसकारौ स्वल्पभेदौ । स भ्रश्यतीति तत्र स्थितं भवेत् । इदं 'न भ्रश्यती'ति पठितम् । उपरि कुलक्रमादित्यारभ्य इति भावः इत्यन्तं यद् वाक्यं तदपि इमान् किमपि व्यामोहयति स्म ।

3 च्यवते इत्यस्य भ्रश्यतीति नार्थ इति व्याख्यात्रा उच्यते इति मत्वा सकारे नकारत्वभ्रान्त्या च न भ्रश्यतीति न्यवेशयन् ।

4 श्रुतिवाक्ये 'प्रच्यवते' इति स्थितत्वात् व्याख्यातुः 'प्रभ्रश्यति' इति व्याख्यातव्यमासीत् । एतदजानन् 'उद्यानं' 'प्र' इत्येदनपेक्षितमिव मत्वा व्यामोहात् कुण्डलीकरोति स्म ।

इति । अत्र परिहारं वयमवोचाम—

'न भ्रश्यति' इति मातृकायां स्थितम् । अत्र नकारोऽनन्वितः । तस्मात् 'न' स्थाने 'प्र' इति भाव्यम् इत्येवं ज्ञापनाय 'न (प्र)' इति वक्र-रेखाद्वयसम्पुटित 'प्र' शिरस्को नकारो निवेशितः ।

इति । एतेन नकारस्यानन्वयोऽस्माभिर्न गृहीत इति यदुक्तं तन्न । तं सम्यग् गृहीत्वा तत्परिहारं कृतवन्तः स्म इति, प्र इत्यस्य व्याख्यातृप्रयुक्तस्यानपेक्षि-तत्वमत्या कुण्डलीकरणमिति यदुक्तं तन्न । औचित्यमवधाय वयमेव तदुप-क्षेपकारिण इति च सुव्यक्तम् । एवं चात्र परेषां बहवो भ्रमाः । 1 सकारो नकारत्वेनास्माभिः पठित इति । 2 नकारस्यानन्वयो न गृहीत इति । 3 कुलक्रमादित्युपरितनवाक्यार्थो नावगत इति* । 4 च्यवते इत्यस्य भ्रश्यतीति नार्थ इति व्याख्याता वदतीति वयं मनितवन्त इति । 5 प्र इति व्याख्यात्रा प्रयुक्तमिति । 6 श्रुत्यनुसारेणैवं प्रयुक्तं वयं नाजानीमेति । 7 अस्थानपेक्षितत्वमतिरस्माकमासीत् । अत एव कुण्डलीकरणमिति । अनया महत्या भ्रमपरम्परया अस्थाने अस्मानुपालब्धवद्भिः सचेतोभिः वस्तुतत्त्वे ज्ञापिते अवश्यमनुशयानैः क्षमां प्रार्थयमानैश्च भाव्यम् । एवं कर्तव्यमकृत्वा लिखन्ति—

"न भ्रश्यतीत्येव मातृकायां स्थितम्' इति परमार्थं लिखन्त्यमी । नैवमिति कोऽब्राह ? अत्यल्पोऽपि विवेकोऽत्र न प्रससारेति खलु

---

* स्वयमस्य वाक्यस्यार्थं न व्यजानन् । तेन स्वनिदर्शनेन अस्मास्वेव-मज्ञानकल्पना । वस्तुतो यत्रास्माकमज्ञानं तत्र वयं प्रश्नचिह्नं-(?) दद्मः ।

हसन्ति सन्तः । आन्ध्रलिप्यां नकारसकारयोरल्पस्यैव वैषम्यस्य सद्भा-वाद्वर्णविभ्रमो जात एषामिति कृते मर्मोद्घाटने किं नु प्रत्युक्तमेतैः ? ........ मातृकायां नकारोऽस्त्येवेति प्रथनेन किं नाम सिद्धममीष्विति निपुणा निध्यायन्तु । इति ।

अगत्या विस्तरं सम्प्रत्यल्पेष्वपि विदध्महे ।
विषयेषु गभीरैकनिष्ठा मृष्यन्तु तं बुधाः ॥

मातृकायां सकारे स्थिते यदि वयं नकारं पठितवन्तः स्याम तर्हि वर्णविभ्रम इति युक्तं वक्तुम् । नकारे स्थिते नकारमेव अपठामेति वस्तुस्थितौ वर्णविभ्रमस्य का प्रसक्तिः । सकारस्थानेऽयं नकार इति विवेको न जात इति चेत् न तावता वर्णविभ्रमाभिधानं युज्यते । अन्यस्यान्यत्वेन ग्रहणं हि विभ्रम इष्यते । तदिह 'विवेको न प्रससार' 'वर्णविभ्रमो जात' इत्यु-भयाभिधानं केवलमविवेकात् लब्धवर्णत्वाविभ्रमाच्च । एवमत्र नास्माकं वर्ण-विभ्रम इति ज्ञापनमत्र मातृकायां नकारोऽस्तीति प्रथनस्य फलम् ।

अथ सकारनकाराविवेकवार्तां विमृशेम । आन्ध्रलिपिज्ञानं यद्यस्माकं नाभविष्यत् काऽस्माकं हानिः । न हि सर्वः सर्वलिपिज्ञः । न हि आन्ध्रलिपिज्ञानां सर्वलिपिज्ञानं सम्पन्नं भवति । परैरिदानीं ध्रियमाणं बिरुदं Sri Jagathacharya Simhasanadhipathi इति देशान्तर-लिप्या लिख्यते । भाषाशास्त्रानभिज्ञा आङ्गललिपिविदः th इतीदं तका-रस्थाने लिखन्ति । यथाऽत्रैव बिरुदे अन्ते pathi इत्यत्र । भाषाशा-स्त्राभिज्ञास्तु थकारस्थाने th इति लिखन्ति । अस्मिन् प्रकारद्वये एकम-नुरुध्य बिरुदस्य आदिमो भागः 'जगताचार्य' इति भवति । अन्यमनुरुध्य 'जगथाचार्य' इति भवति । 'जगदाचार्य' इति तु इष्टम् । अत्र संस्कृ-तानभिज्ञैर्द्राविडीवासनावशेन एवं बिरुदमुद्रा निर्मितेति सर्वथा विवेको न कृतः । किमेतावता परेषां महती हानिर्जातेति परिकरमाबध्य केनचिदु-द्घोषणं क्रियमाणं युक्तं स्यात् । तथा प्रकृतेऽपि ।

एवं वस्तुतः आन्ध्रलिपिविज्ञानविरहो न दोषायेत्यवोचाम । जानीमस्तु वयं तां लिपिम् । यदा वयं न्यायमध्यैमहि तदा गदाधरीया वादग्रन्थाः सर्वे अनयैव लिप्या मुद्रिताः सुलभा आसन् । तानेव क्रीत्वा अपठाम । एवमवश्यसम्पादनीयतया स्थितं एतल्लिपिज्ञानं चिरात् सम्पन्नम् । लिपिज्ञाने जाते सकारनकारयोरत्र अल्पं वैषम्यमिति एकस्य स्थाने इतरस्य प्रसक्तिरस्तीति, कस्य अतिमूढस्यापि प्रतीतिर्न भवेत् । एतत्प्रातिभानमस्माकं नासीदिति, एवं घोषणं मर्मोद्घाटनमिति बत आजानसिद्धसुचिरानुवृत्तपरदूषणकुतूहलातिशयमाहात्म्याधीनातिक्षुद्रविषयप्रावण्यशालिभिर्निस्सङ्कोचमभिधीयते ।

यदाहुः परे आन्ध्रलिप्यां सकारनकारयोरल्पं वैषम्यमिति तत् तत्त्वस्थितेरेकदेशाभिधानमात्रम् । एवं वदन्तोऽत्र न कृत्स्नविदः । सकारः नकारः वकारः पकारः इत्येषां चतुर्णामस्ति मिथः सादृश्यम् । मुद्रणावसरे मषीवशेन न स्फुटा प्रतिपत्तिर्भवति । एवं तालपत्रकोशेष्वपि चिरन्तनेषु, यत्र बहुभिः कारणैर्मालिन्यमवर्जनीयं भवति । बुधरञ्जनीमातृकायामेव ‘तमपि’ इत्यस्य स्थाने ‘तमसि’ इत्यासीत् । ‘.... परेणाप्यर्थस्य लाभात्’ इति ‘परेणास्यार्थस्य लाभ त्’ इत्यस्य स्थाने । एवं सकार पकारविपर्ययः । अथ ‘व्यङ्ग्यस्यानिष्कारणम्’ इति क्वचिद्दृश्यत । आविष्करणमिति खलु भाव्यम् । वकार इह नकार आसीत् । एवं क्वचित् ‘कोकनदस्य’ इति कोकपदस्येत्येतत्स्थाने । अनेन पकारे स्थिते नकारप्रादुर्भावसम्भवः ख्याप्यते । पर एव रसिकरसायने २१ पुटे ‘न सन्ति’ इत्यस्य स्थाने ‘स सन्ती’ति मुद्रयित्वा सकारं नकारत्वेन भ्राम्यन्तोऽपि २९ पुटे ‘अन्याप्यन्तर्भावः’ इति नकारं सकारत्वेन भ्राम्यन्तोऽपि च ४२ पुटे ‘उपावसृजति’ इत्यस्य स्थाने ‘उपानसृजति’ इति मुद्रयन्तः नकारं वकारत्वेन भ्राम्यन्तीति स्फुटमिदं पश्यामः । २३ पुटे ‘इति विन्यसने तु’ इति मुद्रणमपीह पर्यालोचनीयम् । तदिह ‘न भ्रश्यति’ इति स्थिते, नकारस्थानन्वये गृहीते वर्णान्तरपर्यालोचने प्रवृत्ते वसपानां त्रयाणां वर्णानां प्रतिभा-

ऽवश्यंभाविनी । तत्र अर्थशून्यत्वात् वकारस्य परित्यागः । अनपेक्षितत्वात् सकारस्य । मूले कर्तृवाचकपदं किमपि न श्रूयते । मूलपदान्येव व्याख्याने व्याख्यायन्ते देवतामतिक्रम्येत्यारभ्य । उभयतः देवताद्वयतः इति पूर्वपदे व्याख्याते तदनन्तरश्रुतं च्यवत इतीदं पदमुपात्तम् । अस्य विवरणं भ्रश्यतीति । एवं मूलपदे विवरणे च स्थिते मध्ये कर्तृवाचिनः 'सः' इत्यस्य का सङ्गतिः । पूर्वं कस्यचिदनभिहितत्वात् तच्छब्दप्रयोगोऽनुपपन्नः । 'यदि कश्चित् अतियजेत' इति यदि पूर्वमुक्तं स्यात् तर्हि उत्तरत्र सः च्यवत इत्यभिधानं युज्येत । तत्तु नास्ति । 'सः उभयतः देवताद्वयतः च्यवते भ्रश्यति' इति यदि उत्तरवाक्यारम्भे तच्छब्दो भवेत् तर्हि स्थानौचित्यं भवेत् । तदपि नास्ति । न चात्र तच्छब्दाभावे साकांक्षता काचिदस्ति । पदार्थमात्रविवरणात् । एवमत्र परामृश्याभावात् अस्थानस्थत्वात् अनपेक्षितत्वाच्च 'सः' इत्येवं भवितुं नार्हतीति सम्यग् विचिन्त्यावधार्य, सुव्युत्पन्नः प्रौढोऽयं व्याख्याता एवमसमञ्जसं न लिखिष्यतीति मत्वा, श्रौतोपसर्गघटनेन श्रुतिप्रत्यभिज्ञापने अर्थपरिपोषणे च तस्याभिसन्धिर्भवेदिति अध्यवसाय च 'प्र' इत्युचितमिति गृहीत्वा तथा न्यवेशयाम । अथापि अस्मत्कल्पितमेवेदमिति प्रत्यायनाय स्थितं नकारं तथैव कृत्वा कुण्डलितं 'प्र'कारं तस्य पार्श्वे न्यक्षिपाम । 'अस्माकमयमभिप्रायः । अन्ये चेदन्यथा मन्येरन् कामं तथा ते मन्यन्तामिति चामन्यामहि । अत्र दूषणस्य कोऽवकाशलेशः । नकारे स्थिते 'प' इति काममुत्प्रेक्ष्यताम् । कथं तु 'प्र' इति । इति तु मन्दं चोद्यम् । पत्रमालिन्येन वा लेखनसमय एव रेफचिह्नस्यास्पष्टत्वेन वा पाठकप्रमादेन वा रेफे अगृहीते पकारं नकारत्वेन पेठुरिति सम्भवात् ।

II

अत्रैव व्याख्याने 'ननु तर्हि का ताव(स्माक ?)न्निजदेवता' इति मुद्रितं दृष्ट्वा पूर्ववदेव अतिमहत्या भ्रान्तिपरम्परया किमपि किमप्यवो-

चन् । ततः परमार्थे ज्ञापिते (१९ पुस्तके ८६ पुटे), परे पुनर्लिखन्ति ।

1 तत्र तत्र तावदिति प्रयुञ्जानास्तेते अतिप्रयोजनमुद्दिश्यैव किमहो प्रयुञ्जते । 2 अस्माकमिति किमत्र अत्यन्तमपेक्षितम् । 3 अपेक्षितमित्येवास्तु । तावदित्यस्य अस्माकमित्यस्य च कः सम्बन्धः ।

इति । अत्र क्रमेण प्रतिवदामः— 1 वाक्यव्युत्पत्तिमन्तः सर्वे प्रयोजनमुद्दिश्यैव प्रयुञ्जते । अव्युत्पन्नप्रयोगो न प्रमाणम् । अयं व्याख्याता सुव्युत्पन्नः । 2 अतियजेतेति पूर्वार्धे सामान्यतः शास्त्रार्थः शिक्षितः निजां देवतामतिक्रम्य न यष्टव्यमिति । अथ उत्तरार्धमवतारणीयम् । तदुचिता आकांक्षा प्रदर्शनीया । तत्र निजदेवता का इतीयत्येव आकांक्षा न युज्यते । कस्य निजदेवता केति पृच्छ्यते इति तत्र आकांक्षान्तरोदयात् । अस्माकं निजदेवता केति प्रश्नस्तु निराकांक्षः पूर्णो भवति । मूले च वयमित्यस्ति । तदनुगुणा आकांक्षा वाच्या । तस्मात् अस्माकमित्यस्यात्यन्तापेक्षितत्वम् । 3 अक्षरसाम्याधीनो भ्रम एव केवलो न पाठान्तरोपनिपाते हेतुः । असङ्ख्या हेतवः सन्ति । पत्रे घुणनान्येन वा क्षते पदमेकमत्यन्तास्पष्टं लुप्तं वा स्यात् । पश्चात् केचित् स्वोत्प्रेक्षया पूरितवन्तः स्युरिति किमेतदसम्भावितम् । परे एव चतुःश्लोकीभाष्ये

**प्रतिबुद्धदासभावत्वात् प्रपन्नत्वाच्चेति (अर्थः) भावः ।**

इति मुद्रयन्ति । भाव इति स्थिते 'अर्थः' इति स्वयमेते कल्पयन्ति । भाव इत्यस्य अर्थ इत्यस्य च कः सम्बन्धः इति बुद्धिमतां प्रश्ने किमुत्तरम् । सत्यमिदं यदनुगृहीतं पश्यति परेष्विति । इत्यास्तां तावत् । (अस्माकं ?) इति सन्देहचिह्नं वयं दत्तवन्तः । न तथा परे (अर्थः) इत्यत्रेत्यवधेयम् ।

## III

'क्षितिभृतैव सदैवतका वयम्' इति प्रसिद्धः पाठः । बुधरञ्जनीकारस्तु सदेवतका इति कृत्वा व्याचष्टे । अत्रत्यं व्याख्यानवाक्यं तत्रोदाहृतं पाणिनिसूत्रं च अत्यन्तमस्पष्टमासीत् । चिरं विचिन्त्य तृप्तिकरं

शोधनं कृत्वा मुद्रणाय प्रेषयाम । अयं व्याख्याने दृष्टः पाठभेदः मूले कुण्डलयित्वा प्रदर्शनीयः । तदेवास्माकं शीलम् । इह तदप्रदर्शनं किमस्माकमेव प्रमादात् उत मुद्रणकृतामिति न निश्चेतुं शक्यमासीत् । 'निरूपणिकां' (प्रूप्) द्रष्टुमैच्छाम । सा नष्टा । नोपलभ्येत । इति न्यवेदयन् । यथाकथमपि स्खालित्यमस्तीति पश्यन्तो वयम्

सदै(दे)वतका इति इह भाव्यम् । शोधनिकायामिदं दर्शयिष्यते ।

इत्यवोचाम । अत्र लिखन्ति ।

सन्तोषः । पन्थानमागताः । प्रामाणिकसरणिरेषा । एवंविधमेवोत्तरं

विचारपदेषु सर्वेष्वपि विषयेषु शोभनं भृशम् ।

इति । एवं लिखन्त इमे साक्षादेवंविध एव स्वकीये स्खालित्ये किं प्रतिपद्यन्त इति ज्ञातुमस्माकं सुमहत् कुतूहलम् । श्रीमति गीताभाष्ये 'प्रपद्येयतः प्रवृत्तिरिति वा पाठः' इति भाषितमनुरुध्य

तमेव चाद्यं पुरुषं प्रपद्ये[य]यतः

इति मुद्रितवद्भिः 'अलोलुत्वमिति वा पाठः' इत्येतदनुरोधेन

दयाभूतेष्वलोलु[त्वं]प्त्वम्

इति कुतो न मुद्रितम् । श्रीशठकोपमुनीन्द्रगाथासहस्र

பார்விண் நீர் முற்றும் கலந்து பருகிலும்

इति मूले लुकारः ; பருகினும் इति व्याख्याने नुकारश्चेति कथं विसंवादः । न चात्र मुद्रणापराधः परैर्वक्तुं शक्यः । பருகிழும் பருகிதும் इत्येवंरीत्या अर्थशून्यो यत्र सन्निवेशः तत्रैव मुद्रणदोषः । अन्यत्र सर्वत्र ग्रन्थकारस्यैव शिरसि अशेषदोषभरो विनिवेशयितव्य इति ससंरम्भं तैः साधनात् । श्रीमन्निगमान्तमहादेशिकीय- அடைக்கலப்பத்து-गाथायां

ஆறுபயனெனவே கண்டு அருளாளரடியிணைமேல்

इति मूलं विनिवेश्य

எனவே கொண்டு- என்கிற சாஸ்த்ரார்த்தத்தை உட்கொண்டு

इति कुतो विसंवादि व्याख्यातं मुद्रितं च । किमत्र काचित् टिप्पणी

दत्ता। कः पाठ इह पाठकैर्ग्राह्यः।

मुकुरागारवासी सन् मुहुराग्रहतः परे।
लोष्ठमस्यति यो दाक्ष्यं नेष्ठमस्य विचक्षणैः॥

ग्रन्थमुद्रणकलाप्यपेक्षते योग्यतां सुचिरसंस्तवार्जिताम्।
सा न यस्य हतमस्य मुद्रणं तत् क्रमेण विशदीकरिष्यते॥

ईदृशं तु पदवर्णगोचरं सावधानमनसोऽपि दुस्त्यजम्।
मुद्रणे स्खलितमत्र दुःस्थताघोषणं भवति कस्य भूषणम्॥

---

# मुद्रणकौशलम्॥

I

ग्रन्थमुद्रणकलाप्यपेक्षते योग्यतां सुचिरसंस्तवार्जिताम्।
सा न यस्य हतमस्य मुद्रणं तत्स्फुटं परहिताय दर्श्यते॥

परे कंचिल्लिखन्ति—

अन्यदपि किञ्चिदवश्यमभिधित्सितम्*। वयं तु काञ्च्यां स्मः। मुद्रणं तु मद्रपुर्यामन्यत्र च प्रचलति। कानिचिच्छोधनानि सुष्ठु समाकलितान्यपि मुद्रणालयाधिकृतानां कार्यकराणां भ्रमप्रमादादिवशात् विपर्यासमेव गमितानि भवन्ति। अत्रापि किञ्चिन्निदर्शयामः। दशावतारस्तोत्रे ''नाथायैव नमः पदमित्यादौ दशमे पद्ये अवसाने 'पर्यायचर्यायते' इत्यत्र 'पर्यायचर्याः, यते' इति पदच्छेद इति आवाल्यादस्माभिरवधारितमिदम्। 'पर्यायचर्याय, ते' इति केषांचिद् बहूनां वाऽत्र भ्रमस्समस्त्येव। तादृशं भ्रममपासितुं 'चर्याय ते' इति विन्यासं सुस्फुटं संशोधने सूचितवद्भिरप्यस्माभिर्हन्त परस्तात् 'चर्याय ते' इत्येव मुद्रणमुपक्लृप्तमुदैक्षि। अथ च महान् विषादः सत्यमन्वभावि।

---

* 'अवश्यमभिधातव्यं भवति।' इति भाव्यम्। अवश्यपदपरिहारेण 'अभिधित्सितम्' इति वा।

तावता किमहो फलम् ? एवं नाम सम्पतिताः कतिचिदशुद्धीरधिकृत्य निर्वेद एव शरणं भवत्यस्माकम् । एतादृशनिर्वेदात्पदाशुद्धिविषये शुद्धिपत्रिकाप्रकाशनेऽपि नास्माकमुत्साहः सञ्जायते । (!) इति । केवलमयमभिनयो निर्वेदस्य । भ्रमात् प्रथममन्यथाऽमुच्यत । अभिज्ञैः पश्चात् प्रतिबोधने कृते तेषु कृतज्ञताप्रकाशनमवश्यकर्तव्यमकृत्वा स्वभ्रमप्रच्छादनाय 'बाल्यात् प्रभृति अवधारितम्' इत्यादि मिथ्यैव बहूच्यते । कथं सर्वं साक्षाद्दृष्टवद्भिरिव एवं सावधारणमुच्यते ? वस्तुत एव किमेवं भवितु न शक्यम् ? इति प्रश्नकरणे बहूनां महत् कुतूहलं नूनं जायेत । तत्र उत्तरं वदामः । सावधानं श्रोतव्यम् । यो भगवति वस्तुतो भक्तः तस्य अनृतभाषणाहङ्कारात्मश्लाघनाभिज्ञावमाननादिषु निष्कम्पा प्रवृत्तिर्नैव भवेत् । यस्य एवं प्रवृत्तिर्भवति स वस्तुतो न भक्तः । तस्य चित्तं भक्तिरसस्य अत्यन्तानभिज्ञम् । इत्यवश्यं वाच्यम् । न क्रोधो न च मात्सर्यमिति प्रसिद्धमेतत् । तादृशप्रवृत्तिमता प्रकाश्यमाना भक्तिः अभिनयमात्ररूपेति प्रामाणिकैरध्यवसातव्यम् । तथा प्रकृते प्रकाश्यमानो निर्वेदः यदि तात्त्विकः न कृत्रिमः नूनं इतरेषामपि ग्रन्थमुद्रणकृतां एषा स्थितिर्भवितुमर्हतीति व्युत्पत्तिः स्यात् । इतरेषु एवंविधे इतोप्यत्यल्पदोषवति च स्थले दुस्सहस्येव स्वस्मिन्नसम्भावितस्येव अतिमहत इव अतिहानिकरस्येव दोषस्य आरोपणे घोषणे च प्रवर्तितुं मनागपि मानसमवकाशं न ददीत । यस्मादियं दशा न दृश्यते तस्मात् सावधारणमिदं ब्रूमः यत् परे स्वभ्रमप्रच्छादनाय निर्वेदाभिनयमात्रकारिणो न वस्तुतो निर्विण्णा इति ।

**स सन्तापः न परं न शशाम । प्रत्युत ववृधे ।**

इत्येतस्मिन् प्रथम 'पूर्वाभ्यधिक'स्थे अस्मदीये वाक्ये द्वितीयो नकारो मुद्रणे गलितोऽभूत् । मुद्रणसमनन्तरं अस्मत्सकाशमागतां साम्बिकामनुवाचयन्तो वयं स्खालित्यमत्र अपश्याम । पण्डितेषु यः कोऽप्यत्र यथावत्

N. B. अत्र पूर्वपुटे एकोनविंशपङ्क्तौ 'चर्या यते' इति पठनीयम् ।

प्रतिपत्तौ न स्खलिष्यतीति मत्वा तूष्णीका अभवाम । वयं तिरुपतिक्षेत्रे वसामः । मुद्रणं तञ्जापुरसमीपे प्रवर्तते । सकृत् 'निरूपणिका' (प्रूप्)-गतागताभ्यां अवरतः पञ्च दिनान्यपेक्ष्यन्ते। तेन सकृदेव शोधनं अस्माभिः कर्तुं शक्यते । अतित्वरायां कदाचित् तदपि न भवति । अस्यां स्थितौ नकारं गलितं वयं शोधनकाले नावाहितवन्त इति वा शोधने कृतेऽपि मुद्रणालये तत्समीकरणे प्रमादो जात इति वा अन्ये शोधका द्वितीयनकारः अधिक इति भ्रमित्वा अन्यथा शोधितवन्त इति वा कुतो न भवितुमर्हति । अनुभवविशेषाधीनसंस्कारदाढर्योद्भूते चित्तपरिपाके सति सत्यमेवंविधा वितर्कपद्धतिः स्वयं प्रसरेत् ।

'परं बहु अधिकं यथा तथा न शशाम । प्रत्युत ववृधे' इत्येवास्माकं विवक्षितं नान्यथेति स्थितं समर्थयितुं वयं शक्ताः । तथाऽपि अनार्जवद्वेषित्वात् आर्जवशीलत्वाच्च परमार्थमेवमावेदितवन्तः स्मः ।

अत्र विवक्षितं कथञ्चिद् ग्रहीतवद्भिरपि 'न परं न शशाम' इति संक्षिप्तमधुरगम्भीरवाक्यविन्यासप्रकारो न ग्रहीतुमशक्यत । अतिदविष्ठोऽयमेषां रूक्षोद्यानगामिन्या बुद्धेः । अतः 'संतापस्य शान्त्यभावमात्रं न' इति शुष्कवैदिकसंस्कृतप्रायं किमपि लिखन्ति ।

अलमेवंविधैरल्पैर्विषयैः परिशीलितैः ।
अवधानार्हमन्यत्तु वदितुं वयमुद्यताः ॥

---

## II

वाक्यव्युत्पत्तिः, यस्य शास्त्रस्य सम्बन्धी ग्रन्थो मुद्र्यते तस्मिन् शास्त्रे गाढः परिचयः, ग्रन्थानां मुद्रणोपयोगितया सज्जीकरणे कौशलमिति इयती सामग्री ग्रन्थमुद्रणे प्रवृत्तानामवश्यापेक्षिता । एतद्व्यतिरेके मुद्रणं सर्वथा असमीचीनं अनादरणीयं भवति । इदं श्रीमद्वेदान्तदेशिकग्रन्थमालायां कैश्चित् स्थलैर्निदर्शयामः ।

१ अकृतम् ।

'ईश्वरोऽहमहं भोगी' इत्यत्र तात्पर्यचन्द्रिकायां

पूर्वापरानुगुण्यात् भोगीति भोगसामर्थ्यपरम् । तत्राहं चेत्, न धर्म-स्वभावादेवंभूत इत्यहंशब्दाभिप्रायमाह स्वत एवेति ।

इति दृश्यते । अत्र 'चेत् न' इति अर्थशून्यं अनन्वितमिति ग्रहणे विदुषां न क्लेशः स्यात् । 'रत्न' इति लेखनीये तालपत्रलेखकाः प्रायः तकारस्य संप्रत्यधस्तात् नकारमनिवेश्य किञ्चित् दक्षिणतो निवेशनशीला आसन् । तत्र आपाततः 'रतन' इति प्रतीतिर्भवेत् । एवं शब्दस्वरूपस्य विरहं पर्यालोचयतां तु 'रत्न' इत्यवधारणं भवेत् । एवं लेखनसंप्रदायोऽस्तीति जानन्तः अव्युत्पन्नाः अस्थानेऽप्येवं संयुक्ताक्षरं गृह्णन्ति । 'जगदभिन्न' इति स्थिते जगद्भिन्नमिति पठन्ति लिखन्ति च । अनया वासनया प्रकृते 'चेतन' इति स्थितं 'चेत् न' इत्यपठन्निति निस्सन्देहं प्रतीयते । इदमेव गतानुगतिकतया विमर्शलवलेशमप्यकृत्वा नेत्रे निमील्य मुद्रितम् । 1

'अनेकचित्तविभ्रान्ताः' इत्यत्र तात्पर्यचन्द्रिका— 'ईश्वरे न्यस्तभरा हि प्रायशो निश्चिताः । तद्व्यतिरेकमाह— स्वेनैव सर्वमिति ।' इति । अत्र 'निश्चिन्ताः' इति भाव्यमिति आपाततोऽपि प्रतीयते । 2

'परिचर्यात्मकं कर्म' इत्यत्र तात्पर्यचन्द्रिकायां याज्ञवल्क्यस्मृतिश्लोक उदाहृतः । तत्र

शूद्रस्य द्विजशुश्रूषा तया जीवन् वणिग्भवेत् ।

इति विमर्शलेशमन्तरा अनन्वितं मुद्रितम् । 'तयाऽजीवन् वणिग्भवेत्' इति तु तत्र स्थितम् । 3

तात्पर्यचन्द्रिकायामेव अन्ते 'अध्यायैः शिष्यमोहः' इति अष्टादशाध्यायार्थाः संगृह्यन्ते । अत्र गणने कृते अयमयं अस्यास्य अध्यायस्यार्थ इति विवेचनं स्वयं प्रवर्तेत । ततः उत्तरार्धे 'भक्तिशैघ्र्यादि जीवः' इतिवत् पूर्वार्धेऽपि 'तत्सौकर्यादि योगः' इति विच्छिद्य मुद्रणीयमिति प्रतिभा जायेत । तदभावेन तु तत्सौकर्यादियोगः' इति संहितमेव मुद्रितम् । 4

## २ सन्दिग्धम् ।

तत्त्वटीकायाम्—

1　१४६ पुटे 'अथ किञ्चिति भा[ष्य]षते ।'

2　५८ ,, निगु[गृ]ह्य

3　१४७ ,, वित्त्यन्तरेण [विचित्वैनेव] तु धियः

4　५८ ,, सर्वभेद[धी] भ्रमनिवृत्तिरिति भावः ।

5　तात्पर्यचन्द्रिकायाम् ९, ६, विचित्र [सृष्टि] शक्तिमूला

6　,, १५, १४, अन्नमशनं पानं खाद[त] इति ।

7　,, १५, १७, अत्रावेशभरणेश्वरत्वानां कर्मकर्तृभावेन [निर्दिष्टयोः] अन्यत्वोपस्थापकत्वम् ।

एषु स्थलेषु कुण्डलीकरणेन किं ज्ञाप्यत इति न निश्चेतुं शक्यम् । पूर्वमुद्रणपर्यालोचनेन तु तत्त्वस्थितिं ज्ञातवन्तो वयमत्रत्यामव्यवस्थां दुरवस्थां चावागच्छाम । एषु प्रथमे स्थले 'ष' इति स्थितम् । तत्र 'ष्य' इति भाष्यमिति स्वयमन्यैर्वा उत्प्रेक्षितं कुण्डलयित्वा पूर्वं निवेशयन्ति । द्वितीये तु स्थितस्य कुण्डलना क्रियते नोत्प्रेक्षितस्य । षष्ठे स्वोत्प्रेक्षितस्य तकारस्यैव कुण्डलना । अपि तु तस्य पश्चान्निवेशनम् । न तु पूर्ववत् पूर्वम् । एवं स्थितवर्णस्थाने वर्णान्तरकल्पनमेषु स्थानेषु । पञ्चमे स्थितं कुण्डलीकृतमित्येतावन्मात्रम् । न कल्पना काचित् । सप्तमे अस्थितमेव किञ्चिदुपक्षिप्तम् । न तु स्थितस्य कस्यचित् स्थाने परिष्काररूपेण । चतुर्थे पूर्वमुद्रणे पुटस्य अधस्तात् दर्शितं पाठान्तरमेव कुण्डलीकृत्य स्थितात् पूर्वं निवेशितम् । तृतीये पूर्वमुद्रणकारैः कृतमवकुण्डलीकरणं तथैवेह निवेशितम् । इति । एवं च अस्मिन् नवीने मुद्रणे कुण्डलीकरणं संशयकारि अतिदुःस्थमिति सुगमम् ।

## ३ विपरीतम् ।

स्थिते स्वन्विते बहुषु स्थलेषु वैपरीत्येन अनन्वितं कल्पितं दृश्यते ।

1 दर्शिते षष्ठे स्थले अन्नविभागपरे वाक्ये खाद इत्येव समञ्जसं न तु खादत इति ।

2 सप्तमे 'कर्मकर्तृव्यपदेशाच्च' इति सूत्ररीत्या 'कर्मकर्तृभावेनान्यत्वोपस्थापकत्वम्' इत्येव सङ्गतम् । निर्दिष्टयोरिति मध्ये घटनमनपेक्षितमनन्वितञ्च ।

3 तात्पर्यचन्द्रिकायाम् (१७, २३)

"लक्ष्येषु [दुष्टेषु] उद्दिष्टेषु लक्षणविधिस्त्वपेक्षितः ।"

इति मुद्र्यते । अत्र 'दुष्टेषु' इति किं पूर्वस्य उत उत्तरस्य स्थाने इति न शक्यं ज्ञातुम् । सर्वथा तु असङ्गतमेतत् । उद्देशो लक्षणं परीक्षेति त्रिविधा शास्त्रस्य प्रवृत्तिरिति शास्त्रकारा अभिदधुः । तदिह बुद्धौ कुर्वन्तो देशिकचरणाः 'लक्ष्येषु उद्दिष्टेषु लक्षणविधिः' इत्याचक्षते । हा हन्त तपस्विन इमे दुष्टानां दोषनिवर्तनाय लक्षणप्रणयनमिति गृहीत्वा परिष्करणे प्रवर्तन्ते । इदमाकर्ण्य

आपि कल्पान्तकालं यो हसेदनलसो जनः ।
अत्र कर्तुमलंबुद्धिं कुत्र कोन्वस्त्यलं बुधः ॥

4 तत्रैव मूले (१८, ३३)

'योगेन प्रयोजनभूतेनाव्यभिचारि(ण्यः)ण्या योगोद्देशेन प्रवृत्ताः तत्साधनभूता मनःप्रभृतीनां क्रिया यया धृत्या धारयते सा सात्विकीत्यर्थः ।

इति दृश्यते । 'योगेनाव्यभिचारिण्या' इत्येव श्लोकः । धृत्या इत्यस्य विशेषणमिदमिति लिङ्गवशेन निर्णयः सुकरः । भाष्येप्येवमेव । एवं स्थितस्योपपन्नत्वाग्रहणमेको दोषः । 'मनःप्रभृतीनां क्रियाः' इत्येतद्विशेषणत्वभ्रमोऽपरो दोषः । धारयति-धात्वर्थनिरूपितकर्मत्वाश्रयभूतानां मनःप्रभृतिक्रियाणामिह द्वितीयान्तशब्दवाच्यत्वात्, भ्रान्तैरत्र क्रियमाणाऽपि कल्पना (णीः) इति द्वितीयान्ततयैव युज्यते ; न तु (ण्यः) इति प्रथमान्ततयेति अन्यो महत्तमो दोषः ।

चित्रं चित्रं बत बत महच्चित्रमेतद्विचित्रं
यज्जात्यन्धो रविरथपथादेशनोद्यमचेष्टः ।

### ४ कृताकृतम् ।

तत्रैव 'एवंविधान्यन्ये च परिवेषोपराग....प्रभञ्जनभ्रमणादयोऽत्यद्भुत-प्रकाराः सर्वे ....' इति मुद्रितम् । पूर्वमुद्रणे 'एवंविधान्यानि च' इति स्थितम् । विशेष्याणां प्रकाराणां पुल्लिङ्गत्वात् नपुंसकलिङ्गता विशेषणस्य नोपपद्यते । अतः पुल्लिङ्गता सम्पाद्येति स्पष्टमेतत् । तत्र अन्यानीत्येकं विशेषणं पुल्लिङ्गत्वेन परिणमितवद्भिः एवंविधानीति विशेषणान्तरलिङ्गं तथैव स्थापितम् ।

### ५ वञ्चितम् ।

दर्शितरीत्या 'अन्यानि' इत्यस्यान्यथाभावे कृतेऽपि कुण्डलनेन न तद् ज्ञापितम् । अन्यत्र चैवं अन्यथाकृत्य तद्ज्ञापनमुपेक्ष्य तूष्णीं भवन्ति । तत्रेदं निदर्शनम् । तात्पर्यचन्द्रिकायामेव 'असौ मया हतः शत्रुः' इत्यत्र (१६. १४)

> परिकल्पितेनेति । न तु लोकायतशास्त्राविवक्षितप्रत्यक्षान्वयव्यतिरेक-रूपप्रमाणासिद्धेनेत्यर्थः ।

इति मुद्रितं पश्यामः । अत्र 'शास्त्र'पदस्थाने 'शब्द'पदं प्राचीनमुद्रणे स्थितम् । शास्त्राविवक्षितेत्येतदपेक्षया शब्दविवक्षितेत्येतदेव स्वरसमित्य-स्माकमभिप्रायः । एवं प्राक्तनपाठं सर्वथा प्रच्छाद्य अन्यदिह निवेशितम् । न च तद्ज्ञापितमिति अकुशलमुद्रणस्वरूपस्थित्यवगमौपयिकतया दिङ्मात्रमिह दर्शितम् ।

> मुद्रणकौशलमीदृशमिति परमुद्रणविमर्शनिष्ठानाम् ।
> कथितं विवेकसिद्ध्यै सन्त इदं क्षन्तुमर्हन्ति ॥

---

# आद्यन्तौ टकितौ ॥

(V. R. Srinivasa Tatacharya Siromani)

एतत्पाणिनिसूत्रं कौमुद्यां 'टिटकितौ यस्योक्तौ तस्य क्रमादाद्यन्तावयवौ स्तः' इति व्याख्यायत । अत्र शेखरे 'यद्यप्यत्र मिलितस्य नैकत्वान्वय इति द्वन्द्वो न प्राप्नोति । तथापि समूहयोरन्वयबोधोत्तरं यथासंख्यसूत्रारम्भसामर्थ्यात् पुनः प्रत्येकान्वयः । लोके त्वेवंरीत्या प्रयोगोऽसाधुरेवेति भाष्ये स्पष्टम्' इत्युदैर्यत । हलन्त्यसूत्रशब्दरत्ने हल् च ल्चेति समाहारद्वन्द्वसाधुत्वादिप्रतिपादनपरशङ्काग्रन्थे 'आद्यन्तौ टकितौ' इत्यादौ यथासङ्ख्यमन्वयेऽपि प्रथमतस्साहित्यावच्छिन्ने साहित्यावच्छिन्नान्वयमात्रेण सहविवक्षामाश्रित्य यथा द्वन्द्वसाधुत्वम्' इति दृष्टान्तः प्रादर्श्यत । शब्दरत्नव्याख्यानभावप्रकाशे 'इतरेतरद्वन्द्वे साहित्यं विशेषणमिति तन्मतेनाह साहित्यावच्छिन्न इति । मुख्यमते तु साहित्ये साहित्यान्वयेति बोध्यम्' इत्यभण्यत । भावप्रकाशस्यायमाशयः 'चार्थे द्वन्द्व' इति सूत्रे मनोरमादिषु 'मेलनं च समुदायः स च वर्तिपदार्थं प्रति विशेषणं विशेष्यं चेति द्वैधम् । तत्राद्ये इतरेतरयोगद्वन्द्वः द्वितीये समाहारद्वन्द्वः' इत्याद्यभ्यधीयत । तद्रीत्या 'आद्यन्तौ टकितौ' इति इतरेतरयोगद्वन्द्वविषये साहित्यावच्छिन्ने साहित्यावच्छिन्नान्वयमात्रेण इत्याख्यायत । तत्रैव सूत्रे 'यथा तु चार्थ इति सूत्रे भाष्यं तथोभयत्रापि समुदायस्य विशेष्यत्वं आद्ये उद्भूतावयवभेदः अन्त्ये तिरोहितावयवभेदः' इति स्वोक्तरीत्या 'आद्यन्तौ' 'चार्थे' इति सूत्रशेखरादिषु स्वशिष्यनागेशोक्तरीत्या च साहित्ये साहित्यान्वयमात्रेण इति वक्तव्यमिति ।

साहित्यं मेलनं समुदायः समूह इति शब्दाः समाहारपदपर्यायास्तत्र तत्राश्रीयन्त । यत्तु भैरवमिश्रेण शब्दरत्नशेखरव्याख्यानयोः साहित्यावच्छिन्नस्समूह इत्यगद्यत । तत्र बहुग्रन्थाविरोधाय साहित्यपदं एकक्रियान्वयित्वादिपरमङ्गीकार्यम् । अत्र द्वेधा बोधाश्रयणवैफल्यसाफल्यादिविचारः शब्देन्दुशेखरव्याख्यानेषु वरीवर्ति ।

अत्रेयमाशङ्का भवति– आद्यन्तसमूहस्य टितिकित्समूहस्य चाभेदान्वयबोधः प्राथमिकः प्रत्युपाद्यत । टकितावित्यस्य टश्च कुच टकौ इश्च इश्च इतौ, टकौ, इतौ ययोस्तौ इति विग्रहः । अत्र द्वन्द्वगर्भबहुव्रीहिः अन्यपदार्थे धुट्तुगादौ शक्तिः न तु समूहे । एतद्घटकस्य टागिति द्वन्द्वस्य यद्यपि समूहे शक्तिः तथाऽपि स समूहोऽन्यपदार्थे विशेषणमिति स्वतन्त्रद्वन्द्वाद्यन्तपदार्थसमूहस्य परतन्त्रद्वन्द्वटकुपदार्थसमूहस्य चाभेदान्वयो न संभवत्येव । पदार्थः पदार्थेनान्वेति न तु तदेकदेशेनेति न्यायात् । अत्र शब्दरत्नशेखरव्याख्यानेषु समूहान्वयबोधानुपपत्तिरपि नोदघाटयत । व्युत्पत्तिवादे 'सम्पन्नो व्रीहिरित्यत्र स्वाश्रयप्रकृत्यर्थतावच्छेदकवत्वसम्बन्धेन प्रकृत्यर्थ एवैकत्वान्वयः व्रीहित्वजातेः स्वरूपत एव व्रीह्यादिपदशक्यतावच्छेदकतया अन्वयितावच्छेदकरूपेणानुपस्थितेस्तत्र पदार्थान्तरस्यान्वयानुपपत्तेः' इति ग्रन्थेन पदार्थः पदार्थेन इत्यादिव्युत्पत्तिसङ्कोचस्यानाकरत्वं इयवमभ्यधीयत । समासशक्तिनिर्णयभूषणसारतद्व्याख्यानयोः 'राजपुरुष इत्यादौ पूर्वपदस्य राजसम्बन्ध्यादिलाक्षणिकत्वादेव राज्ञः पदार्थैकदेशतया न तत्र शोभनस्येत्यादिविशेषणान्वयः । तादृशव्युत्पत्तेः ससंबन्धिव्यतिरिक्तविषयतया चैत्रस्य नप्तेत्यादौ एकदेशान्वयेऽपि क्षतिविरहः' इत्यकथ्यत । परमलघुमञ्जूषायां 'यत्तु पदार्थः पदार्थेनेति वृत्तस्य विशेषणयोगो नेति वचनद्वयेन (राजपुरुष इत्यादौ) ऋद्धस्येत्यादिविशेषणान्वयो न भवति तत्तु समासे एकार्थीभावे स्वीकृते अवयवानां निरर्थकत्वेन विशेषणान्वयासंभवात् फलितार्थपरमस्माकं युष्माकं तु वाचनिकमिति गौरवम्' इति नैयायिकमीमांसकादयो न्यवेद्यन्त । अत उक्तसमूहयोरभेदान्वयोऽनुचित इति भाति । व्युत्पत्तिवादप्रकाशे तु 'जगदीशतर्कालङ्कारैरपि महाकविर्महाविज्ञः श्लोकनम्रा इत्यादावेकदेशान्वय एव शब्दशक्तिप्रकाशिकायामुक्त इति बोध्यम्' इत्यादि व्याह्रियत । एतद्रीत्या उक्तसमूहयोरभेदान्वयो युज्यत एव । पदार्थ इत्यादिव्युत्पत्तेस्ससंबन्धिव्यतिरिक्तस्थलेपि कचित्सङ्कोच आवश्यक इत्येतदाशयः ।

---

# रामस्य प्रेष्ठः सुहृत् कः ॥

(अनुवृत्तम्)

**सुग्रीवविभीषणयोः कः प्रेयान् रामस्य ।**

रामसुग्रीवयोः पारस्परिकी मैत्री प्रथमत एव पाणिपीडनपुरस्सरं अग्निसाक्षिकतया परस्परसाहाय्यकरणसङ्कल्पेन साकं साङ्गं निष्पन्ना । एवंविधः सौहार्दसंघटनाविधिः सुहृदन्तराणां विषये नैव निर्वृत्तः । किं च रावणवधानन्तरं लङ्कातः साकेताय प्रस्थिते दाशरथौ सुग्रीवादयो वानराः विभीषणप्रमुखा राक्षसाश्च सकौतुकं साकेतं दिदृक्षवो रामं अनुजिगमिषन्ति । तदनुमत्या ससुग्रीवा समस्ता च वानरसेना विभीषणस्तु केवलं चतुर्भी राक्षसैरनुचरैस्सह श्रीरामं अनुजग्मतुरिति युद्धकाण्डस्यावसाने वयं पठामः । इह विभीषणकुटुम्बस्य तदीयसुहृज्जनानां वा अयोध्यायै सामान्यौपचारिकेण क्रमेणापि आह्वानविषये जानकी जातादरा बभूवेति वा दाशरथिर्दत्तश्रद्धोऽभूदिति वा न काचिदपि सूचना रामायणादिषु परिदृश्यते । लङ्कातः प्रस्थानावसरे विभीषणस्य विषये सत्येवं निर्वृत्ते को वा व्यतिकरस्समुपनतः सुग्रीवविषय इति विचारयामः । विमानेन वियत्पथे सीतामानीय सुग्रीवविभीषणादिभिः सह रामे क्षिप्रमुड्डीयमाने अधस्तात् किष्किन्धां समुपस्थितां सीतायै रामः प्रदर्श्य 'अत्र सुग्रीवमैत्रीविषयकः पारस्परिकः समयः कृतो वाली च निहतः' इत्यब्रवीत् । सपदि जानकी जातोत्सुका 'अथ दृष्ट्वा पुरीं सीता किष्किन्धां वालिपालिताम् । अब्रवीत् प्रश्रितं वाक्यं रामं प्रणयसाध्वसा ॥ सुग्रीवप्रियभार्याभिः ताराप्रभृतिभिः सह । अन्येषां वानरेन्द्राणां स्त्रीभिः परिवृता ह्यहम् ॥ गन्तुमिच्छे सहायोध्यां राजधानीं त्वयानघ ।' इति राममभ्यर्थयामास । समनन्तरमेव, सीतायाः प्रियं सुग्रीवस्य संभावनां च युगपच्चिकीर्षुः काकुत्स्थः 'एवमस्त्विति किष्किन्धां प्राप्य संस्थाप्य राघवः । विमानं प्रेक्ष्य सुग्रीवं वाक्यमेतदुवाच ह ॥ ब्रूहि वानरशार्दूल सर्वान् वानरपुङ्गवान् । स्वदारसहिताः सर्वेऽप्ययोध्यां यान्तु सीतया ॥ तथा त्वमपि सर्वाभिः स्त्रीभिः सह महाबल ।' इति सुग्रीवं सावरोधं सबन्धुमित्रं आह्लादभरितः साकेताय आकारयामास । अथ

'तारया चाभ्यनुज्ञाताः सर्वा वानरयोषितः । नेपथ्यं विधिपूर्वेण कृत्वा चापि प्रदक्षिणम् ॥ अध्यारोहन् विमानं तत् सीतादर्शनकांक्षया ।' इति (रा. ६. १२४) सपरिवारं तारां अपराश्च वानरवध्वः सीताप्रीणनाय साकेतावलोकनाय च ससंभ्रमं प्रतस्थिरे । एष च व्यतिकरः सुग्रीवविषये जानकीरघुनन्दनयोर्विद्यमानं सौहार्दातिशयं काममावेदयति । सुग्रीवविषये प्रदर्शितस्यैतादृशस्य आदरातिशयस्य प्रेम्णश्च शततमी च कला लङ्कातः प्रस्थानावसरे विभीषणकुटुम्बस्य विषये नैव रामेण नापि च सीतया सूचिताऽभूत् । पुनस्तत्रैव लङ्कायां आरूढविमानो राम आदरस्य आधिक्यं सुग्रीव एव प्रदर्शयतीति, विभीषणं तदानन्तरिकमित्रत्वेनैव परिगणयतीति च रामायणवचनमन्यदपि स्फुटयति । यथा—पूजयन् सर्ववानरान्, सुग्रीवं च महावीर्यं काकुत्स्थः सविभीषणम् ।' इति (रा. ६. १२५) अस्मिन्वाक्ये सुग्रीवं महावीर्यविशेषणप्रयोगेण सर्ववानरैः सह पूजनीयत्वेन चाभिनन्द्य, अन्ततः सविभीषणमिति विभीषणस्याप्रधान्यमपि निर्दिष्टमास्ते । एतदानन्तरिकं रामायणवचनं इतोऽपि रामस्य सुग्रीवविषयकं प्रणयं प्रबलतरं ज्ञापयति । 'मित्रकार्यं कृतमिदं भवद्भिर्वानरोत्तमाः । यत्तु कार्यं वयस्येन सुहृदा वा परंतप ॥ कृतं सुग्रीव तत्सर्वं भवता धर्मभीरुणा ।' इति सुग्रीवविहितसाहाय्यं अत्युच्चैः प्रशंसन् लङ्कायाः प्रस्थानावसरे विभीषणविषयं नैव स्पृशति । एवमेव बहुषु स्थलेषु सुग्रीवस्य अग्रिमं स्थानं विभीषणस्य चानन्तरिकं पदं रामायणे प्रदृश्यते परिकल्पितम् । 'सुग्रीवप्रमुखा राममुपासन्ते महौजसः । विभीषणश्च....' (रा. ७. ३७) इति सुग्रीवं प्रथमं निर्दिश्य, तस्य च तदनुचराणां च महौजस्त्वादिविशेषणमपि प्रयुज्य, रामान्तिके सातत्यनिवासार्हं आप्ततमत्वमपि सूचयित्वा विभीषणः पश्चात् क्वचिदिह पातितो दृश्यते । रीतिरियमेवापरत्र च विभीषणसुग्रीवयोः तारतम्यप्रकाशने स्पष्टमनुरुध्यते । 'एवमुक्त्वा तु सुग्रीवमाश्लिष्य च पुनः पुनः । विभीषणमुवाचाथ रामः....' (रा. ७. ४०) इति वचनमेतदपि रामस्य सुग्रीवविभीषणयोर्विषये प्रदर्शितस्य प्रेम्णो महदन्तरमावेदयति ।

## सुग्रीवः प्रेष्ठः

कालेन सुदीर्घेण देशे दवीयसि च स्थितो भरतश्च सुग्रीवमेव विभीषणादपि प्रेयांसं पर्यगणयदिति युद्धकाण्डस्य पर्यवासनभागश्च विशदमाचष्टे । दिव्यविमानात् अवतरणानन्तरं रामेण विभीषण-सुग्रीवादिषु प्रमुखेषु तत्तन्नामनिर्देशपूर्वकं भरताय आवेदितेषु तान् सपदि भरतः कुशलमापृच्छ्य, क्रमश एवं सम्भावयति—'परिष्वज्य महातेजा भरतो धर्मिणां वरः । त्वमस्माकं चतुर्णां तु भ्राता सुग्रीव पञ्चमः ॥ विभीषणं च भरतः सान्त्ववाक्यमथाब्रवीत् ।' इत्येष श्लोकः साधु, राम-सुग्रीवयोः सुग्रीव-रामकुटुम्बयोश्च यादृशी सौहार्दसम्पदासीत् तत्सर्वस्वप्रतिपादक इति, सुग्रीवे विभीषणादपि विशिष्टां मैत्रीं न केवलं रामः, किन्तु तस्य कृत्स्नं कुटुम्बकमपि अवहदिति चोपपादयति । प्रतिपुरुषं प्रभिद्यमानस्य प्रणयधर्मस्य प्रमाणपदनिर्णेता भरत इति सूचयितुं 'भरतो धर्मिणां वरः' इति सुग्रीव-विभीषणयोः प्रीतिविषयकतरतमभावनिर्देशपूर्वकं भरतस्य स्वभावधर्मश्च आविष्कृतोऽनेन वचनेन । परिष्वङ्गपूर्वकं सुग्रीवं स्वेषां पञ्चमं भ्रातरं हार्देनादरेण अभिहितवता भरतेन रामकुटुम्बकस्य सुग्रीवविषयकः प्रणयभरः परां कोटिमधिरोपितः खलु । रामसुग्रीवयोः सौहार्दं सुदूरं रूढमूलमिति, उच्चैरभिवृद्धमिति च विषयस्यास्य उपसंहारे दृढतरेण प्रमाणेन उपपाद्यते । उत्तरश्रीरामायणस्यावसाने रामे महाप्रस्थानाय प्रयतमाने, सद्धर्माननुपदिश्य विभीषणं स्वात्मनो राज्यस्य शासनाय रामः प्राहिणोत् । सुग्रीवं मर्त्यलोके विहाय, स्वयमभौमं पदमधिगन्तुं नैव स आचकाङ्क्ष । सुग्रीवे रामस्य प्रमाणातीतं प्रणयातिरेकं अवसाने स कथं प्रदर्शयतीति रामायणवचनमिदं विशदयति—'सखे शृणुष्व सुग्रीव न त्वयाहं विनाकृतः । गच्छेयं देवलोकं वा परमं वा पदं महत् ॥' इति (रा. ७. १०८) । सुग्रीवमपहाय सुरलोकवासं, परमपदाधिगमं वा नाहमभिलषामीति यदि रामः स्वयं वदति, वयमपि विहाय सुग्रीवं, अपरं कतमं वा पुरुषं तस्य प्रेष्ठसुहृत्त्वपदे निर्देष्टुं प्रभवामः । 'न सर्वे भ्रातरस्तात

भवन्ति भरतोपमाः । मद्विधा वा पितुः पुत्राः सुहृदो वा भवद्विधाः ॥' इति (रा.६.१८) । रामः स्वयमेव सुग्रीवसदृशः न कोऽपि सुहृदन्यो मान्यतमः स्वस्यास्ति इति मुक्तकण्ठमभिदधाति ।

नेता स नैषादकुलस्य वृद्धगृध्रः पुराणर्क्षपतिर्हनूमान् ।
रामस्य मित्राणि विभीषणाद्याः प्रेष्ठं तु सुग्रीवममीषु विद्मः ॥

मेल्पाक्काभिजनो नाम्ना दुरैस्वामी विमर्शकः ।
एतद्विषकलाभिज्ञो व्यतानीत् कृतिनां मुदे ॥

---

# पुस्तकपरामर्शः

1. श्रीरामानुजदिव्यचरितम् । धार्मिकरत्नप्रदीप श्री एन्.आर्. कृष्णस्वामि अय्यङ्गार्-स्वामिनिर्मितम् । द्राविडीमयम् ।

देवकोटानगरे प्रवृत्त श्रीरामानुजावतारादिनमहोत्सवे प्रकाशितेऽस्मिन् अष्टपुटात्मके लेखे अभिज्ञः आस्तिकशिखामणिः अयं ग्रन्थकारः यथा सर्वेषां जनानां भगवद्रामानुजदिव्यचरितं अनायासं क्षिप्रं विदितं स्यात् तथा अवतारप्रभृति साकल्येन संक्षेपेण प्रतिपादितवान् ।

---

2. परामर्शपरीक्षणम् । पण्डित-श्रीनिवासाचार्यकृतम् ।
Sri. K. Pichumani Iyengar, Siromani, Sri. Ramanuja Sanskrit College, Nanguneri. एतैः प्रकाशितम् ।

पाठशोधनं, तस्य काचन परीक्षा, तन्निराकरणपरः कश्चन विमर्शः, तस्य कश्चन परामर्श इतीयं परम्परा पूर्ववृत्ता । अत्र चरमं परामर्शं विषयीकृत्य प्रवृत्तोऽयं पुटषट्कात्मा ग्रन्थः । अल्पेऽप्यस्मिन्, शास्त्रार्थानां यथावद्ग्रहणे प्रकाशने च स्वपाटवं श्री श्रीनिवासाचार्याः सम्यक्प्रकाशयन्ति । आशास्महे बहून् महतो ग्रन्थान् लेखितुमिमे सम्पन्नसौकर्याः स्युरिति ।

---

Registered No M 2300.

Book XX ॥ श्रीः ॥ Nos. 5 & 6

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. २०] कलि- ५०४७ } व्यय

मकर—साधारण सं ३
कुम्भ—शास्त्रानुबन्धः सं ३
आहत्य ,, ६

# The UDYANA PATRIKA.

A SANSKRIT MONTHLY

January } 1947
February

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription Re. One only.
Do. With Sanskrit Supplement Rs. 2—0—0

उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यमेकं रूप्यम् । सानुबन्धाया द्वे रूप्ये ।
२. कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।
३. ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।
४. वर्षमध्ये ग्राहकीभवतामपि कन्यासंचिकादिरेव पत्रिका प्रेष्येत ।
५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।
६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसंपादकाय प्रेषणीयाः।
७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः (संस्कृतेन आङ्गल्या द्राविडया वा न तु भाषान्तरेण)।
८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor*, The Srinivasa Press,
Tiruvadi P. O. Tanjore Dt.

निर्वाहकसम्पादकः— *Mimamsarnava*, *Mimamsakesari*
*Panditaraja* **D. T. Tatacharya Siromani M. O. L.,**
Lecturer, Sri Venkateswara College,
TIRUPATI.

# विषयाः ॥

शास्त्रानुबन्धः—

कुवलयानन्दः । [बुधरञ्जनीसमेतः] १८९—१९६

1 मेनका ।
2 सुभाषितनीवी ।
3 विमुञ्चथ (२) ।
4 वैदिकम् (२) ।
5 प्रतिबोधनम् ।
6 षष्ठीहेतुप्रयोगे ।
7 यथाभिमतम् नाम नाटकम् ।
8 पुस्तकपरामर्शः ।
9 प्रकीर्णकम् ।

मैना — स मान्त्रिक इति कथं त्वं विजज्ञिथ ?

वैद्य् — स वीथीमार्गेण आगच्छन् आसीत् । तदा आतपस्य तैक्ष्ण्य-मसह्यमभूत् । पादौ अदह्येताम् । तदा वीथ्यां रिक्तपादमागतो मान्त्रिकः उष्णालुः अस्मद्गृहवेदिकामुपविष्टः बुद्बुदितं स्वपादं मे प्रादर्शयत । गृहे अस्ति चेत् स्फोटेषु लेपाय किञ्चिन्मधु देय-मिति प्रार्थयत । अहं किञ्चिन्मधु अददाम् । तत् प्रतिगृह्य लिम्पन् पादनाडिकाकालं उपविष्ट आसीत् । ततः परं उत्थाय गमिष्यन् स्वयं केरलदेशीयो मान्त्रिक इति तस्य गृहस्य स्वामी इदानीं महति कष्टे लग्नो निलीय वर्तत इति च मयि आवेद-यति स्म । सम्भ्रान्तोऽहं तमवेक्ष्य 'कीदृशं कष्टम्' इत्यपृच्छम् । स्त्रीविषयं कष्टमिति, तत्र समुचितप्रवृत्तिविरहे गृहस्वामिनः कारापवेशो ध्रुव इति चाभिधाय उत्थायागच्छत् । अहं तम-मुक्त्वा अनुसरन् तदीयं सर्वं विवरमावेदनीयं प्रार्थये । सप्तविं-शतेरवरा काचित् सङ्ख्योच्यतामित्यब्रवीत् । अहं 'दश' इत्य-वोचम् । स सपदि "साधु । तस्य श्वशुर एव पालकेभ्यः 'प्रतिज्ञां' विलिख्य प्रेषयामास । इतो रक्षणमशक्यम्" इति वदन्नेव त्वरितं परिक्रामति स्म । अहमनुज्झन् तमनुगम्य 'अत्र यः कोऽपि परिहारो मान्त्रिकरीत्या क्रियेत चेत् स्वामिनो बहु-मानं दापयिष्यामि' इति प्रार्थनामकरवम् । स तु 'न मे बहु-मानोऽपेक्षितः' इति, परोपकारबुद्ध्यैव साहाय्यं क्रियत इति, नागूर्-सदनाय द्वे सहस्रे रूप्याणि दातव्यानीति चाब्रवीत् । 'तथैव भवतु' इत्यवदम् । भवत्सकाशमागन्तव्यमित्यभ्यर्थना-मकरवम् । अद्य प्रातरागमिष्यामीत्यभिहितवान् । तदागमन-कालोऽभूत् । युष्मद्गृहद्वारे प्रतीक्षमाणस्तिष्ठेत् । अहं गत्वा आनयामि ।

---

N. B. अतीतसञ्चिकायां तृतीये पुटे 'पञ्चदशस्याधिकारस्यान्ते' इत्यस्याः पङ्क्तेः पूर्वं "23. अधिकारः" इति योजनीयम् ।

नैना— किमपि शोभनायैव कालाय लोकनाथः एतं महान्तं प्रेषितवान् । आतपस्तपतीति यदसद्वहे स उपाविशत् तदेव लोकनाथस्य कार्यम् । त्वं त्वरितं गत्वा तं इहानय ।

सपदि सैयद् इमां स्वगृहाद् बहिर्गत्वा 'अङ्गपनायक' वीथ्यां स्थितं नैनामहम्मदस्य सदनमवाप । ततः अर्धनाडिकाकालोऽगच्छत् । मान्त्रिकः 'प्रसन्नो' बभूव । सोऽपि माहम्मद एव । तस्य ईषन्न्यूनाधिकं पञ्चविंशतिर्वयः स्यात् । अतिगौरगात्रः । शिरसि 'कुल्लां' तत उपरि 'शीट्टि' वस्त्रमयं महदुष्णीषं च बभार । कृष्णनिबिडा दाढिः पार्श्वयोः कर्णपर्यन्तं अधः उरःपर्यन्तं च प्रसृता पुष्टा बभूव । कट्यां लुङ्गीं उपरि काषायकञ्चुकं चाधारयत् । कण्ठे जपमणिमालास्फटिकमणिमालाप्रभृतिकं च । नेत्रयोरञ्जनमक्तवान् । दीपितां धूपवर्तिकामेकां दक्षिणकर्णस्य उष्णीषस्य च मध्ये निवेशितवान् । तत उत्थितो धूमः परिमलं बहुदूरं प्रासारयत् । करे एकः अर्धचन्द्रशिरस्को धारणदण्डः, अल्पो वस्त्रमूतः, अलाबूफलं तद्वा निर्मितं पात्रं, तालपत्रकोशश्चावर्तत । तं महान्तं दृष्टवान् सैयद् इमां उत्थाय भूस्पर्शमवनम्य 'सलाम्' अकरोत् । सोऽपि प्रश्रितं तस्मै 'सलाम्' अकरोत् । सद्यः सैयद् इमां तमादाय अनन्तरवीथ्यां स्थितं स्वगृहं गत्वा तेन सह अन्तरगच्छत् । स मन्त्रवित् असम्भाषमाणोऽनुगच्छन्नपि कमपि मन्त्रं जपन् गुणगुणायमान एव चचार । तावुभौ आगतौ दृष्टवान् नैनामहम्मदः त्वरितमुत्थाय सप्रश्रयं मान्त्रिकाय 'सलां' कृत्वा तं कस्मिंश्चिदासने उपवेश्य विनीतोऽतिष्ठत् । स 'महान्' हस्तसंज्ञया तस्य उपवेशनानुमतिमदात् । सोऽपि तथैव उपविष्टोऽभवत् । ततो मान्त्रिकः सैयद् इमां इमं दृष्ट्वा 'भवदध्युषितस्य तस्य गृहस्य कवाटं अपावृतमेव कृत्वा हि आगता अभूत । काचिन्न तत्र गन्तव्यम्' इत्यब्रवीत् । तदाकर्णितवान् कर्मकरः 'स्वस्य तत्र अवस्थानं माभूदिति मान्त्रिको वदती'ति तर्कितवान्, 'आम् । अहं गच्छामि' इत्युक्त्वा बहिरचलत् । अथ नैना-महम्मदः मन्त्रवादिनं प्रति 'आर्य महन्, को

भवतः स्वग्रामः? अत्र आगतस्य कति दिनानि आसन्?' इत्यपृच्छत्। मान्त्रिकः 'मम निवासः केरलेषु तिरुच्चूर्। अत्र कस्यचिन्महामनुष्यस्य गृहे मन्त्रकर्मनिर्वर्तनाय मामानयन्। ह्य एव इदं पुरमागच्छम्। धूमशकटचीट्यपि मय्येव वर्तते। चीटीग्राहिणः न मां चीटीं प्रार्थयन्त। इमां पश्यत' इति स्वकञ्चुकभस्त्रास्थितां काञ्चन चीटीमादाय ददौ। सा तिरुच्चूर् - अस्मात् मद्राय दिनद्वयात् पूर्वं क्रीता चीटी बभूव। समीपकाल एव आगतः सः यस्मात् बहुभ्यो दिनेभ्यः पूर्वं वृत्तान् स्वविषयान् ज्ञात्वाऽवदत् तस्मात् परमार्थत एव सोऽतिमहानिति मनितवान् नैनामहम्मदः तास्मिन् अनल्पं गौरवं मर्यादां च कृत्वा भाषितुमुपक्रम्य, 'महन्, मम जातां विपदं इयमिति ज्ञात्वाऽभिधाय तस्या उचितं प्रतीकारं च त्वमेव अन्विष्य कर्तुमर्हति। भवदाज्ञानुसारेण नागूर् - सदनाय सहस्रं रूप्याणि अद्यैव समर्पितवान् भवामि।" इत्यवदत्

सपदि मन्त्रवित् साडम्बरमुपविशन् स्वकीयं मूतं विस्रस्य तस्मात् लिखितचक्राणि कानिचित् तालपत्राणि 'मात्रा दण्डं' च आदाय बहिरास्तृणोत्। तालपत्रकोशं हस्ते धारयित्वा परिवर्तयन् शून्ये प्रदेशे किमपि चक्रं विन्यस्यन्निव हस्तं व्यापारयन् नेत्रे निमील्य मुणमुणायते स्म। तथा पादनाडी व्यतीयाय। अथ स नयने उन्मील्य 'अल्ला महान्। अधीश्वरो महान्। भवदीयः श्वशुरः व्यवहारं विलिख्य पालकेभ्यः प्रहितवान्। भवता रहस्यमानीतायाः कन्यायाः पतिः मोटारशकटेन पीडितः वैद्यशालायां शेते। स इतो द्वित्रेषु दिनेषु गृहमागमिष्यति। अद्यापि भवच्छ्वशुरगृहे वसन्ती सा ब्राह्मणकन्या पत्युर्वैद्यशालाया गृहागमनानन्तरं तं गता भविष्यति। ततः परं पालकाः व्यवहारं वर्तयिष्यन्ति। भवन्तं नागपट्टणे स्थितं मत्वा भवद्ग्रहणाय तत् पुरं गताः सन्ति। भवद्गृहिणी च इतःपरं भवत्सकाशं नागमिष्यति। भवान् दुश्चरित इति मन्यमानास्ते भवद्बन्धुता मा भूदिति परिहृतवन्तः' इत्येवाचत्।

तदाकर्णितवान् नैनामहम्मदः विस्मितो विभ्रान्तश्च भयेन प्रक-

म्पितो बभूव । 'अतीव सुगुणा मय्यपारप्रीतिमती नूर्जहान् अपि नु इदं सम्मन्यते स ? तत् परं न मे मानसं विश्वसिति" । इत्यब्रवीत् ।

मान्त्रिकः— साधु यदि भवान् विश्वसिति साधु च यदि न तत्रं तु तदेव । स्त्रीणां त्वेको गुणो भवतो न विदितः । स्वभर्तृविषये ताः प्राणानपि परित्यजेयुः । परं तु भर्तारमन्यस्यामासक्तं दृष्टवत्यश्चेत् तासां स्वशिरसोऽप्यपाये न गणना । ततः परं ताः दाक्षिण्यं न पश्यन्ति । यत् किमपि प्रति सज्जा भवन्ति ।

तदाकर्ण्य नैनामहम्मदः आकुलीबभूव । स्वगृहरहस्यानि सर्वाणि तावद्दूरं ज्ञातवान् स महान् तस्या आपद आत्मानं रक्षितुं कमपि मार्गमन्विष्येदिति मेने । तथापि सन्देहोऽबाधत । स तमालोक्य 'महन्, यन्मे श्वशुरः मां प्रति व्यवहारमलिखत् तत्र किं मम गृहिणी सम्मतिमदादित्येतदेव मे अतीव सन्दिग्धं भवति' इत्यवदत् ।

तच्छ्रुतवान् मान्त्रिकः 'साधु । अद्यैव भवतस्तदहं सत्यापयामि । कच्चिद् भवान् भवच्छ्वशुरलिपिं प्रत्यभिजानीयात् ?' इत्यपृच्छत् ।

नैनामहम्मदः— प्रत्यभिजानीयाम् ।

मान्त्रिकः– 'साधु । तथा चेत् इदमहं मदीयां यक्षिणीं देवतामाहूय भवच्छ्वशुरेण पालकेभ्यो लिखितं व्यवहारं पालकस्थानकादानाययामि । इदं पश्यतु भवान् ।' इत्यभिधाय सद्यः स्वकीयं तालपत्रकोशमादाय बहुधा परिवर्त्य चक्रं विन्यस्य निर्मीलितनेत्रः आकाशे निहितदृष्टिः गृहस्योर्ध्वं सज्जं स्थितां यक्षिणीं देवतामाहूय आज्ञापयामास । पादनाडिकावधि मुणुमुणायित्वा मन्त्रोच्चाटनमकरोत् । कोशस्य बन्धं विस्रस्य 'फू' इति फूत्करोति स्म । सपदि कोशात् काकदपुटः कश्चित् अग्रे पपात । तदाश्चर्यं दृष्टवान् नैनामहम्मदः विचेताः निश्चलः उपविष्टोऽभवत् । सपदि मन्त्रवित् काकदपुटमादाय विवृत्य पठित्वा नैना-महम्मदस्य हस्ते दत्वा 'कस्येयं लिपिरिति पश्यतु भवान्' इत्यवोचत् ।

तेन च मुनिना कुरुपाण्डवसन्धिकरणाय गतः श्रीकृष्णः इति विजानता तादृशसन्धिनिर्वर्तनवृत्तान्तमनुपृष्टः कथयंश्च यथाक्रमं तेषां सन्धिकरणाशक्यतां युद्धादिप्रवृत्तिं मरणं च कुरूणां तदाकर्णनजनितक्रोधेन तेन मुनिना शक्तस्याप्यस्य सन्ध्यकरणात् शापप्रयोगोद्यतेनाधिक्षिप्तो निखिलजगद्रक्षणार्थं स्वस्यावतरणं कालवशेन लोकसंहरणादिकं चोपदिश्य प्रदर्श्य च विश्वरूपं परितोषितेन तेन मरुकान्तारे तीर्थतोयविरहात् परितप्यमानेन संप्रार्थितो यदा यदा तोयार्थं स्मरसि मां तदा तदा दिव्यं तीर्थं तव समीपे प्रादुर्भविष्यतीति तस्मै वरं प्रदाय द्वारकां प्रविवेश । स च मुनिस्तत्रैव तपश्चरन् कदाचित् तृष्णार्दितः कृष्णमनुस्मरन् तत्क्षणमेव भगवता अमृतमस्मै प्रदेहीत्यादिष्टेन शतक्रतुना मर्त्यस्यास्यामर्त्यार्हामृतप्रदानमनीहमानेनापि भगवन्निर्बन्धवशात् कथंचिदभ्युपगच्छता स्वयं चण्डाळवेषं प्रधार्य श्वभिः परिवारितेन चर्मदृतावमृतं प्रपूर्य तदन्तिकमागतेन तीर्थमिदं परिगृह्णीष्वेति संप्रार्थितोऽपि चण्डाळत्वधिया तमधिचिक्षेप । अधिक्षिप्तश्च स सद्य एव द्युलोकमाचक्रामेति । अथ भगवान् साक्षादागत्यास्मै यथावृत्तं कथयन् कांश्चन मेघान् यथेच्छवर्षुकानस्यादिश्य स्वपुरीमगमदिति । ततश्चायमर्थः— दान्तस्तपस्वी उतङ्कः तत्सम्बन्धिना केनचित् कृत्येन उदकाहरणादिरूपेण । यद्वा चिता ज्ञानेन भगवदुपदिष्टेन दान्तः दमितः निवृत्तदर्पः चिद्दान्तः तस्य यत् कृत्यं तेन । कीदृशेन, केन जलरूपेण, जलाहरणरूपमुनिविषयककर्मणेत्यर्थः । अथ वा चिच्छब्द एवकारार्थः जलरूपेणैव कर्मणेत्यर्थः । कुलगोत्राः कुलाचलाः अद्रिगोत्रगिरिग्रावेत्यमरः, तेषां विमर्दिनं विभेत्तारं मदेन मदनाम्ना च्यवनप्रयुक्तेन केनचिदसुरेण वक्ष्यते चानुपदं तद्वृत्तान्तः बहुधा भिन्नं बहुप्रकारेण विभीषितं देवेन्द्रमित्यर्थः जनः उतङ्कादिः मातङ्गं मन्यते । चण्डाळं मत्वा सुदूरमपयाति । तादृशजलाहरणकृत्येन मातङ्गं मन्यत इत्यन्वयः । ततो दिग्वाससं धीमान् मातङ्गं मलपङ्किनम् । अपश्यत मरौ तस्मिन् श्वयूथपरिवारितम् ॥ इति श्लोकानुसारकोऽत्र मातङ्गशब्दः । मदवृत्तान्तश्चा-

नुशासनिके प्रसिद्धः । कदाचिदश्विनोर्भिषक्कर्मकरतया स्वेन सह तयोस्सोमपानमसहमानो देवेन्द्रः च्यवनाख्येन महर्षिणा अश्विदेवाश्रितेन स्वाश्रितयोरश्विनोरिन्द्रेण सह सोमपानं कारयामीति प्रतिजान(ज्ञातव)ता सद्य एव स्वं सर्वदेवतासहितमाहूय अद्यैव त्वमश्विभ्यां सह सोमपानं कुर्वित्यादिष्टोऽपि ताभ्यां सह न सोमं पास्यामीति प्रतिक्षिपन् प्रक्षिपंश्च वज्रमपि तदुपरि ततो महाक्रोधाविष्टेन तेन मुनिनना तीर्थप्रोक्षणमात्रेण सवज्रमिन्द्रं संस्तंभयता प्रतिप्रयुक्तं मदनामानमाहुतिमयं कश्चिदसुरं महाघोरदर्शनमालोक्य परित्रस्तश्च्यवनं शरणमागम्याश्विभ्यां सहैव सोममपिबदिति । मदलक्षणं चोक्तं तत्रैव । मदन्नामाहुतिमयं व्यादितास्यं महामुनिः । तस्य दन्तसहस्रं तु बभूव शतयोजनम् । द्वियोजनशतास्तस्य दंष्ट्राः परमदारुणाः । हनुस्तस्याविशद्भूमिमेकान्या न्यविशद्दिवम् । जिह्वामूले स्थितास्तस्य सर्वे देवास्सवासवाः । तिमेरास्यमनुप्राप्ता यथा मत्स्या महार्णवे ॥ अन्यत्र चाश्वमेधिकपर्वणि मरुत्तोपाख्याने, इन्द्रं प्रत्यग्निवाक्ये 'ततो रोषात् सर्वतो घोररूपं सपत्नं ते जनयामास भूयः । मदनामानमसुरं विश्वरूपं यं त्वं दृष्ट्वा चक्षुषी सन्न्यमीलः । हनुरेका जगतीस्था तथैका दिवं गता महती दानवस्य । सहस्रं दन्तानां शतयोजनानां सुतीक्ष्णानां घोररूपं बभूव । वृत्तास्स्थूला रजतस्तंभवर्णा दंष्ट्राश्चतस्रो द्वे शते योजनानाम् । स त्वां दन्तान् विदशन्नभ्यधावत् जिघांसया शूलमुद्यम्य घोरम् । तस्माद्भीतः प्राञ्जलिस्त्वं महर्षिमागच्छेथाश्शरणं दानवं चेति ।

एवमेव दुर्मत्तलुब्धप्रभुपरतयापि । केनचिद्दान्तकृत्येन दन्तसम्बन्धिकटकटात्काररूपकृत्येन, कुलगोत्रविमर्दिनं कुलगोत्रादिकमपरामृश्य स्वदर्शनार्थमागतान् महाकुलीनानवजानन्तं, मदेन धनमदेन बहुधा भिन्नहृदयभेदनौषयिकोष्मविशेषशालिनं दुर्मत्तहृदयमिति यावत् । जनः अर्थिजनः महाजनश्च मातङ्गं मन्यते । चण्डाळं मत्वा सुदूरमपसरति । अत एव निर्विण्णानेकधा कविभिः 'तदिदमरुन्तुदं यदुत बह्वघाय भिया धन-

मदमेदुरक्षितिभृदङ्गणचंक्रमणम्, मीलच्चक्षुषि, वेल्लितभ्रुणि मुहुर्दत्तावमानाक्षरे भीमे कस्यचिदाढ्यकस्य वदने भिक्षाविलक्षां दृशम्, सोढ्वा संक्षेपं भ्रुकुटीकटाक्षकुटिलं दृष्टं खलानां मुखम्, तृष्णे देवि यदन्यदिच्छसि पुनस्तत्रापि सज्जा वयम्, फलं स्वेच्छालभ्यं प्रतिवनमखेदं क्षितिरुहां पयः स्थाने स्थाने शिशिरमधुरं पुण्यसरिताम् । मृदुस्पर्शा शय्या सुललितलतापल्लवमयी सहन्ते सन्तापं तदपि धनिनां द्वारि कृपणा इति ।

एवं मतङ्गोपाख्यानपरोऽपि कश्चिदर्थः । तथा ह्यानुशासनिके महाभारते, क्षत्रियो यदि वा वैश्यश्शूद्रो वा राजसत्तम । ब्राह्मण्यं प्राप्नुयाद्येन तन्मे व्याख्यातुमर्हसि ॥ तपसा वा सुमहता कर्मणा वा श्रुतेन वा । ब्राह्मण्यमथ चेदिच्छेत् तन्मे ब्रूहि पितामह ॥ इति युधिष्ठिरप्रश्नमुपक्षिप्य ब्राह्मण्यं तात दुष्प्रापं वर्णैः क्षत्रादिभिस्त्रिभिः । परं हि सर्वभूतानां स्थानमेतद्युधिष्ठिर । बह्वीस्तु संस्मरन् योनीः जायमानः पुनः पुनः । पर्याये तात कस्मिंश्चित् ब्राह्मणो नाम जायत इत्येकजन्मनि जातिद्वयमेळनासम्भवमुक्त्वा तत्प्रमाणतया मतङ्गगर्दभीसंवाद उपाख्यातः । तथा हि । द्विजातेः कस्यचित्तात तुल्यवर्णस्सुतस्स्वभूत् । मतङ्गो नाम नाम्ना वै सर्वैस्समुदितो गुणैः । स यज्ञकारः कौन्तेय पित्रोत्सृष्टः परन्तप । प्रायाद्गर्दभयुक्तेन रथेनाप्याशुगामिना । स बालं गर्दभं राजन् वहन्तं मातुरन्तिके । निरविध्यत् प्रतोदेन नासिकायां पुनः पुनः । तत्र तीव्रव्रणं दृष्ट्वा गर्दभीपुत्रगर्धिनी ॥ उवाच मा शुचः पुत्र चण्डालस्त्वधितिष्ठति । ब्राह्मणे दारुणं नास्ति मैत्रो ब्राह्मण उच्यते । आचार्यस्सर्वभूतानां शास्ता किं प्रहरिष्यति । अयं तु पापप्रकृतिर्बाले न कुरुते दयाम् । एतच्छ्रुत्वा मतङ्गस्तु दारुणं रासभीवचः । अवतीर्य रथात्तूर्णं रासभं प्रत्यभाषत । ब्रूहि रासभि कल्याणि माता मे येन दूषिता । कथं मां वेत्सि चण्डालं ब्राह्मण्यं येन नश्यते । तत्त्वेनैतत् महाप्राज्ञे ब्रूहि सर्वमशेषतः । गर्दभ्युवाच । ब्राह्मण्यां वृषळेन त्वं मत्तायां नापितेन ह । जातस्त्वमसि चण्डालो ब्राह्मण्यं तेन तेऽनशदिति । अथ च मतङ्गो दुःखपङ्कनिमग्नो

ब्राह्मण्यप्राप्तीच्छया सुचिरं तपस्तप्यमानः स्वतपोवेगेन देवगणांस्तापयामास । असहमानश्च तत्तपस्साक्षादागत्य महेन्द्रः वरं ददामि यथेच्छं वृणीष्वेति वदन् तेन च ब्राह्मण्यमेव मे देहीति प्रत्युक्त उवाच— 'मतङ्ग दुर्लभमिदं विप्रत्वं प्रार्थ्यते त्वया । अप्राप्यं प्रार्थयानो हि न चिराद्विनशिष्यसीत्या-रभ्य बह्वीस्तु संविशन् योनीः जायमानः पुनः पुनः । पर्याये तात कस्मिं-श्चित् ब्राह्मण्यमिह विन्दतीति । अतश्चानेकसंवत्सरसहस्रं सुतीव्रतपश्चरणेपि दुष्प्रापमेवाभूत्तेन विप्रत्वमिति समापितम् । तथा चायमर्थः । केनचित् दान्तकृत्येन तपश्चर्यादिरूपेण कुलगोत्रविमर्दिनं स्वीयजातिविनाशाय प्रयतमानं । मदेन ब्राह्मण्यमदेन बहुधा भिन्नं वियुक्तं गर्दभ्युपदेशतो निवृत्तं(त) ब्राह्मण्यमद(दं) वास्तवस्वजातिमवबुध्यमानमिति यावत् । जनः इन्द्रादिः मातङ्गं मन्यते । तं मतङ्गं चण्डालमेव मन्यते । अपूर्वजात्यना-विर्भावात् यथापूर्वं चण्डालमेव जानाति । मतङ्ग एव मातङ्ग इति विग्रहात् मतङ्गमेव जानातीत्यापि कश्चिदर्थः । अनेन चोपाख्यानेन पाशुपतवैष्णवैक-देशिमतमपि निर्धूतम् । तथा हि । दीक्षाप्रवेशमात्रेण ब्राह्मणो भवति ध्रुवम् । कापालं व्रतमास्थाय यतिर्भवति मानवः ॥ इति पाशुपततन्त्रप्रसिद्धव्रत-विशेषेण ब्राह्मण्यादिप्राप्तिमभिमन्यन्ते शैवाः । अपरे चास्मन्मतैकदेशिनो न शूद्रा भगवद्भक्ता विप्रा भागवतास्स्मृता इत्यादिप्रमाणानामन्यथार्थ-कथनेन भागवतत्वादिगुणविशेषेण ब्राह्मण्यावाप्तिमभिदधति । तत्रापि सुती-व्राभिनिविष्टाः केचन सर्वजातिविनाशं भागवतत्वादिजातिविशेषाविर्भावं च वर्णयन्ति । तेषां कण्ठे गडूयत इदमुपाख्यानमिति द्रष्टव्यम् । अतश्चाय-मर्थः । केनचित् दान्तकृत्येन दीक्षाप्रवेशादिरूपेण । कृत्यशब्दो गुणविशेषस्या-प्युपलक्षकः । तादृशगुणप्रयुक्तकैङ्कर्यादिकृत्यपरो वा । कुलगोत्रविमर्दिनं प्राचीनकुलगोत्रादिविनाशमुद्दिरन्तं मदेन बहुधा भिन्नं कुत उत्कृष्टा विप्राः अहमपि भागवतो ब्राह्मणोऽभूवमित्यादिदुरहङ्काराभिनिविष्टं मातङ्गं मन्यते । मतङ्गमतप्रविष्टमेव मन्यते । तद्वत् परिभवभाजं जानातीत्यर्थः । यद्वा

॥ श्रीः ॥

# उद्यानपत्रिका ॥

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्बुधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

| | | |
|---|---|---|
| पु. २०] कलि ५०४७ व्यय | मकर साधारण<br>कुम्भ शास्त्रानुबन्ध | सं ५<br>सं ६ |


# विमुञ्चथ (२) ॥

—◇—

पत्रिकाया मुखपुटे 'अन्या वाचो विमुञ्चथ' इति शीर्षकवाक्यं यच्चिराद् विन्यस्तं भवति तत्र 'विमुञ्चत' इति परिष्करणौचित्यं केचिदाशङ्कन्ते । इदमुपनिषद्वाक्यम् । तस्मादत्र नास्माकं किमपि कर्तुमधिकार इत्यावेदयाम । तत्र पुनः प्रश्नान् कुर्वन्ति । तेषामुत्तरमद्य ब्रूमः ।

1 'उपनिषद्वाक्यमिति को न वेद ?' —यो वस्तुतो वेद स न कदाचित् परिष्करणीयत्वशङ्कां कृतवान् भवेत् ।

2 'थकार एवात्र न तकार इति द्रढिमा कथमभूत् ?' । —'भद्रं कर्णेभिः' इति भिस् एव न ऐस् ; 'तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थितः' इति पुल्लिङ्गमेव न स्त्रीलिङ्गमिति यथा तथा । अशब्दप्रमाणकत्वं अवशात् शिर उत्थापयतीव ।

3 'उपनिषत्त्वेनैव विन्यसनमावश्यकमिति को नियमः ?' । —उपनिषत्त्वेनैव विन्यसने न दोषः कश्चिदस्ति । अथ च इदमुपनिषद्वाक्यं परे ब्रह्मणि यादृशमादरं कर्तव्यं बोधयति तादृशमादरं इह संस्कृतशब्दब्रह्मणि कर्तव्यं व्यञ्जयतीति प्रकारान्तरेणालभ्यमिदं प्रयोजनमत्र उपनिषत्त्वेनैव निवेशने नियमकारि ।

4 'मध्ये दीर्घविरामकल्पनं महत् खलु पातकम्' । ....वेदमुद्रणकृतः सर्वे हन्त एवं महापातकिनः । पूर्वपुटान्ते एकं पदं पदावयवमक्षरं वा मुद्रयित्वा हि ते बहुव्यवधानेन पुटान्तरे ऊर्ध्वं पदान्तरमक्षरान्तरं वा मुद्रयन्ति । अथ वा मषीरेखात्मकलिपेः तद्व्यञ्जयस्य वर्णस्य च।विवेकहेतुभूतं पातकमिह नूनं परेषु पातकाभिधानं कारयति ।

5 'अस्तु । नात्र किमपि प्रत्युत्तरं प्रतीक्ष्यते ।' ....एवं तर्हि मौनाविभूषणैर्भवितुं युक्तम् । किमस्थाने मुखरीभवनेन ।

---

# वैदिकम् (२) ॥

**"अबहुश्रुतसम्भवं श्रुतीनां जरतीनामयथायथप्रचारम् ।**
**विनिवर्तयितुं" मया स देवस्तनुते "ताः स्थिरनीतिपञ्जरस्थाः ॥"**

1 तिङन्तम् ।

वेदेषु तिङन्तं पदं अज्ञातज्ञापनरूपविधिपरं चेत् सर्वानुदात्तं भवति । अनुवादकं चेत् सोदात्तम् । अनुवादकत्वं यच्छब्दहिशब्दादिसमभिव्याहारात् ज्ञायते ।

अस्त्यस्य उत्सर्गस्य बहुधा अपवादः । विधिपरमपि पादारम्भे वाक्यारम्भे वा स्थितं सोदात्तं भवति । 'आ देवान् वक्षि यक्षि च' इत्यत्र यक्षि चेति पृथग्वाक्यम् । तस्यादौ स्थितत्वात यक्षीत्येतत् सोदात्तम् । एवं स्वोत्तरतिङन्तसापेक्षमपि पूर्वतिङन्तं सोदात्तं भवति । यथा 'नान्येषां पशूनां तेजन्या अवघ्नन्ति । अवघ्नन्त्यश्वस्य' इत्यत्र । 'समश्वपर्णाश्चरन्ति' इत्यत्र च ।

यच्छब्दसमभिव्याहारेण अनुवादरूपत्वेऽपि क्वचित् सर्वानुदात्तैव भवति न सोदात्तता । यथा योऽहमास्मि ; योऽसि सोऽसि ; यदनेन हविषाशास्ते ; इति । शब्दतोऽनुवादरूपत्वेऽपि वस्तुतोऽज्ञातार्थत्वादत्र न सर्वानुदात्तत्वपरित्याग इति ज्ञेयम् ।

## 2 उपसर्गः।

एतावता सर्वानुदात्तं सोदात्तमिति तिङन्तानां द्वैराश्यमुक्तं भवति। अथ तिङन्तैः प्रतिपाद्येष्वर्थेषु विशेषविवक्षायां उपसर्गाः प्रयुज्यन्ते। ते च अवद्यन्तीत्यादाविव अव्यवहिता वा समश्वपर्णाश्चरन्तीत्यादाविव व्यवहिता वा भवन्ति। तत्र व्यवहितविषये न किमपि सम्प्रति वक्तव्यमस्ति। अव्यवहितत्वे तु यदि परत्र विद्यमानं तिङन्तं सोदात्तं तर्हि 'तिङि चोदात्तवति' इति पाणिन्यनुशासनरीत्या उपसर्गे सर्वानुदात्तता भवति। अस्य विशेषस्य ज्ञापनाय पदकारः उपसर्गं तिङन्तेन सह एकपदवत् पठति। यथा प्रस्कन्देदिति। एवंविधादुपसर्गात् पूर्वं यत्र पुनरर्थविशेषविवक्षया उपसर्गान्तरं प्रयुज्यते तत्र तदुपसर्गान्तरमपि 'गतिर्गतौ' इत्यनुशासनानुसारेण सर्वानुदात्तं भवति। एतद्ज्ञापनाय च एकपदवत् पाठः। यथा यदेताभ्यामुपाकरोतीति। यदि तु परत्र स्थितं तिङन्तं न सोदात्तं अपि तु सर्वानुदात्तमेव तर्हि निमित्ताभावात् उपसर्गे नः स्वरस्यान्यथाभावः कश्चिद् भवति। तेन ज्ञापनीयविशेषविरहात् स्वाभाविकस्वरेण पृथक्पदतयैव पाठः। यथा प्र, अर्पयतु इति। यदा त्वत्रैव उपसर्गान्तरं प्रयुज्यते तदा गतिर्गताविति तस्य सर्वानुदात्तत्वं भवति। एतज्ज्ञापनाय तस्य स्वोत्तरसोपसर्गतिङन्तेन सह एकपदवत्पाठः यथा समाहन्तीति।

व्याचष्टे व्यादिशत् इत्यादौ वि इत्यस्य स्पष्टमनुदात्तत्वाश्रवणेऽपि गतिर्गताविस्यनुशासनेन तदवगमात् समाहन्तीत्यादिवदेव एकपदवत्पाठः। एवं तिङि चोदात्तवतीत्यनुशासनेन प्रस्कन्देदित्यादाविव यत् त्रिः प्रायच्छादित्यत्र प्रोपसर्गस्य अनुदात्तत्वावगमात् एकपदवत् पाठे न्याय्येऽपि सन्धिसाधारण्येन स्वाभाविकोदात्तत्वेन पृथक्पदतया पाठस्यापि सम्भवात् पदकार उदात्ततया पृथगेव इममुपसर्गमपठत्। प्रत्यातनुष्वेत्यादौ दृष्टस्य व्यत्ययस्यापि क्वचिदाश्रयणं युक्तमिति ज्ञापनाय।

3 उपागुः ।

एवं स्थिते 'वृत्रघ्नः स्तोमा उप मामुपागुः' इत्यत्र उपागुःपदे उपोपसर्गस्य यदनुदात्तत्वं तत्र किं निमित्तमिति युक्तो विमर्शः। अगुरित्याख्यातस्य सोदात्तत्वे तिङि चोदात्तवतीति उपसर्गस्यानुदात्तत्वं भवति। अथवा आख्यातस्य सोदात्तत्वे वाऽन्यथात्वे वा आङुपसृष्टत्वे उपेत्यस्य प्रथमोपसर्गस्य गतिर्गतावित्यनेनानुदात्तत्वं भवति। किमत्र युक्तमिति। ज्ञातार्थतया वा सापेक्षतया वा अगुरित्यस्य सोदात्तत्वमुपपद्यत इति द्रष्टव्यम्। एवं विमर्शे सति मामुपागुरिति वक्त्रा स्तोमानां स्वसान्निध्यप्राप्तिवचनात् 'सा नो जुषाणोपयज्ञमागा'दित्यादिवत् आगमनविवक्षाऽवगम्यत इति तदनुगुणतया आङः सत्त्वं प्रथमोपसर्गानुदात्तत्वस्य तन्निमित्तकत्वं च अवसीयत इति सर्वं सुस्थम्। विस्तरः परस्तात्। अन्यत्र कृतश्च। (अनुवर्ति)

---

# प्रतिबोधनम् ॥

1 रङ्गनाथपदपङ्कजद्वयं नेत्रवर्ति मम, युज्यते बत।

इति मुनिवाहनगाथाखण्डविवरणावसरे श्रीदेशिकसूक्तिरेवं दृश्यते।

''चरणाम्बुजयोः निहितदृष्टिनिवर्तनाक्षमत्वकारिणं भोग्यतातिशयं कयाचिदुत्प्रेक्षया प्रतिपादयति नेत्रवर्ति मम युज्यते बतेति। देवादिषु श्रेष्ठानां चतुर्मुखप्रभृतीनां सनकादीनां योगिनां च दिव्यचक्षुषोरपि दविष्ठे(चरणाम्बुजे) मनुष्यमात्रस्य मम मांसचक्षुषोरपि अत्यासन्ने भवत इति विस्मयते'

इति। अत्र अवतारिकायामुक्ता उत्प्रेक्षा श्रीरङ्गनाथपदपङ्कजयोः मुनिवाहननेत्रवर्तित्वरूपवस्तुविषया। न हि वस्तुनो भगवतः पदपङ्कजे तन्नेत्रवर्तिनी। तस्मादुत्प्रेक्षा। इवादिशब्दाभावाद्गम्या। अननुरूपघटनजनितो विस्मयः 'युज्यते बत' इत्यनेन व्यज्यते; स स्फुटीकृतः देवेष्वित्यादिना उत्तरमन्थेन। न तु युज्यते बतेत्यत्र काचिदुत्प्रेक्षा अस्ति अभिमता वा।

2 "विभीषणप्रपदने अदुष्टत्वादेव विभीषणः परिग्राह्य इति मारुतिपक्षमपि तिरस्कृत्य दुष्टत्वादेव परिग्राह्य इति विलक्षणं स्वमतं भगवान् प्राकाशयत्' इति श्रीमदभयप्रदानसारे श्रीदेशिकचरणाः अनुजगृहुः" इति पदे पदे लिखन्ति । न तु तथा तत्र देशिकश्रीसूक्तिः । सदोषत्वात् शङ्कनीय इत्यङ्गदादीनां मतम् । निर्दोषत्वात् परिग्राह्य इति हनूमतो मतम् । एतदुभयविलक्षणं यद्यपि सदोषः तथापि शरणागतत्वात् परिग्राह्य इति भगवतो मतम् । शरणागतिः परिग्रहे हेतुः । परिग्रहहेतौ प्रपदने सत्यपि दोषाणां तत्प्रतिबन्धकतया स्वीकरणाभावरूपो योऽनादरः अदर्शनशब्दवाच्यं तत् वात्सल्यम् । तदिह यद्यपीत्यादिना व्यञ्जितम् । एवं परिग्रहानन्तरं शरणागतस्य परित्यागहेतुतया तदीयदोषाणां स्वीकरणाभावरूपोऽनादरोऽपि वात्सल्यम् । एषां शरणागतसम्बन्धिनां पूर्वपश्चिमदोषाणां 'अवश्यमनुभोक्तव्यं कृतं कर्म शुभाशुभम्' इत्युक्तरीत्या अवश्यंभावि यत् फलं तत् प्रति भगवानेवं सङ्कल्पयति– इदं फलं प्रपन्नाय अत एव मदीयायास्मै न प्रदास्यामि, इति । अयं क्षमा नाम गुणः । प्रपन्ना वयमपि, अस्मत्तो येऽवरास्तेऽपि अनयोः क्षमावात्सल्ययोर्भगवद्गुणयोः पात्रभूताः । न तु लोकातीतो यः कश्चिदेव । अप्रपन्नविषयं भगवतो यथाऽपराधदण्डत्वमित्यतिसंक्षेपः ।

अल्पोप्ययं विवेको महता भाग्येन नूनमधिगम्यः ।
बह्वपि लिखितं यस्य व्यतिरेकाद् भवति निस्सारम् ॥

अत्र विस्तरः

न स्वरूपं विशेषं वा क्षमावात्सल्ययोर्विदुः ।
तेऽभिषेकं बतेच्छन्ति सम्प्रदायार्थशिक्षणे ॥

इति शोकविस्मयप्रकाशनपुरस्सरमन्यत्र कृतः । तदेवम्—

दुष्टत्वादेव संग्राह्य इत्यमन्यत राघवः ।
इति श्रीदेशिकैरुक्तमिति यत् तन्न वास्तवम् ॥

# षष्ठी हेतुप्रयोगे ॥

(V. R. Srinivasa Tatacharya Siromani)

एतत् पाणिनिसूत्रं कौमुद्यां 'हेतुशब्दप्रयोगे हेतौ द्योत्ये षष्ठी स्यात् । अन्नस्य हेतोर्वसति ।' इति व्याख्यायत । काशिकादिषु अस्य सूत्रस्यायमेवार्थ आश्रीयत । तत्त्वबोधिन्यां 'अन्नस्येति । 'हेतौ' इति तृतीयायां प्राप्तायामनेन षष्ठी । हेतुप्रयोगे किम् अन्नेन वसति ; हेतौ द्योत्ये किम् अन्नशब्दात् षष्ठी यथा स्यादित्येके । अन्नस्य हेतोस्तुभ्यं नम इत्यत्र युष्मच्छब्दान्माभूदित्यन्ये' इति प्रत्यपाद्यत । शेखरे 'हेतौ द्योत्ये इति । हेताविति वर्तते । हेतुहेतुमद्भावेनेतरान्वय इत्यर्थः । तेन अन्नं हेतुं पश्य इत्यादौ न । षष्ठीति । हेतुवाचकादित्यर्थः' इत्यभण्यत । चन्द्रकलायां 'यदुक्तं मूले हेतौ द्योत्ये' इति तत्फलमाह हेतुहेतुमद्भावेनेति । हेतुपदार्थस्य स्वनिष्ठहेतुत्वनिरूपितहेतुमत्त्वसंबन्धेनेतरान्वय इत्यर्थः । हेतुवाचकादिति । हेतुवाचकत्वं च विशेषणविशेष्ययोरुभयोरपि वाचकयोरिति हेतुशब्दात् अन्नशब्दाच्च षष्ठीत्यर्थः । षष्ठी हेतोरिति वक्तव्ये प्रयोगग्रहणात् यत्र हेतुबोधनाय हेतुशब्दस्य प्रयोगः तत्र हेतुवाचकसामान्यात् तस्मिन् वाक्ये षष्ठी यथा स्यादिति । अत एवान्नस्य शोभनस्य हेतोर्वसतीति भवतीति दिक्' इति व्याक्रियत ।

एभिरन्यैश्च ग्रन्थैः यत्र वाक्ये हेतुशब्दप्रयोगः हेतुहेतुमद्भावेनेतरान्वयश्च तत्रैव 'षष्ठी हेतु' इति सूत्रप्रवृत्तिरित्यवसीयते । श्रुतप्रकाशिकायां, 'दहराकाशः परं ब्रह्म कुतः उत्तरेभ्यो वाक्यगतेभ्यो हेतुभ्यः' इति श्रीभाष्यवाक्यगतं वाक्यगतेभ्य इति प्रतीकं 'न हि परमात्मधर्माणामुत्तरत्वाधरत्वादिकमस्ति तस्माद्धेतोरुत्तरत्वं वाक्यद्वारकमित्याह' इत्यवतारिकापूर्वकमुपादाय ''उत्तरेभ्य इत्युक्ते चतुर्थ्यन्तत्वशङ्का माभूदिति पञ्चमीस्फुटीकरणाय हेतुभ्य इत्युक्तम् ।

'षष्ठीहेतुप्रयोगे' इति नियमः प्रयोजनतया हेतुत्वविवक्षायां न सर्वदा। यथा अल्पस्य हेतोर्बहु हातुमिच्छन्निति'' इत्यभ्यधीयत । अत्र भावप्रकाशिकायां, ''वाक्यद्वारकमिति । उत्तरेभ्य इत्यस्य उत्तरवाक्यगतेभ्य इत्यर्थं इति भावः । पञ्चमीस्फुटीकरणायेति । ततश्च हेतुभ्य इत्येतत्पदं उत्तरेभ्य इत्यत्र विभक्त्यर्थस्फोरकमिति भावः । षष्ठी नियम इति । 'षष्ठी हेतुप्रयोगे' 'सर्वनाम्नस्तृतीया च' इति उत्तरशब्दस्य सर्वनामत्वात् षष्ठी वा तृतीया वा स्यात् न तु पञ्चमीत्याक्षेपाभिप्रायः । इदं च 'निमित्तकारणहेत्वर्थेषु सर्वासां प्रायदर्शनम्' इति वार्तिकानादरेणोक्तमिति द्रष्टव्यम् । प्रयोजनतयेति । ननु वृत्त्यादिग्रन्थेष्वेवमव्याख्यातत्वात् विद्याया हेतोर्यश इत्यादौ विद्याया यशःप्रयोजक(न)त्वाभावेन षष्ठ्यनुपपत्तिप्रसङ्गाच्च नेदं समञ्जसमिति चेन्न, शाब्दिकग्रन्थेषु अन्नस्य हेतोर्वसतीत्यादेरेवोदाहृतत्वात् विद्याया हेतोर्यश इत्यादिप्रयोगस्यासंप्रतिपन्नत्वात् 'षष्ठीहेतुप्रयोगे' इत्यस्य प्रयोजनतया हेतुत्वविषयत्वाभावे हेताविति सूत्रस्य निर्विषयत्वप्रसङ्गाच्च । न च हेतुशब्दप्रयोगविषयं 'षष्ठी हेतुप्रयोगे' इति सूत्रमिति वाच्यम् । 'हेतुशब्दप्रयोगे हेतौ द्योत्ये वा' इति कौमुद्यामुक्तत्वात् तस्याश्च संप्रतिपन्नत्वात् न काचिदनुपपत्तिरिति केचिद्वदन्ति'' इत्यगद्यत । हेतुशब्दप्रयोगे हेतौ द्योत्ये वा इति कौमुद्यां वा पदघटितव्याख्यानस्य सत्त्वादेव 'दहर उत्तरेभ्यः' इत्यत्र हेतुशब्दप्रयोगाभावेऽपि दहराकाशपरब्रह्मत्वस्य निरुपाधिकात्मत्वादिपरमात्मधर्माणां च ज्ञाप्यज्ञापकभावरूपहेतुहेतुमद्भावस्यावगमात् षष्ठ्याद्याशङ्का श्रुतप्रकाशिकायां कृता नानुपपन्नेति भावप्रकाशिकाशयः । हेतुशब्दोऽत्र फलपरः फलफलिभावरूपहेतुहेतुमद्भावेनेतरान्वय एव 'षष्ठी हेतु' इत्यादेः प्रवृत्तिः। उत्तरेभ्य इत्यत्र ज्ञाप्यज्ञापकभावरूपहेतुहेतुमद्भावेनेतरान्वयात् नास्य प्रवृत्तिः अपि तु 'विभाषा गुणेऽस्त्रियां' इति सूत्रेणोत्तरशब्दात् पञ्चमीति श्रुतप्रकाशिकासमाधानग्रन्थाशयः । अत्रेदं तत्त्वम् । 'हेतौ' इति सूत्रे महाभाष्ये 'निमित्तकारणहेतुषु सर्वासां प्रायदर्शनम्' इति वार्तिकस्य निमित्तकारणहेतु-

शब्दप्रयोगे सप्तस्वपि विभक्तिषु किन्निमित्तं वसतीत्यादीन्युदाहरणानि प्रादर्श्यन्त । अत्र प्रदीपे 'निमित्तेति । असर्वनाम्नोऽपि विधानार्थमत्र सूत्रे इदं पठितं न तु सर्वनाम्नस्तृतीया चेत्यत्र । तत्र प्रायग्रहणात् असर्वनाम्नः प्रथमाद्वितीये न भवतोऽन्यास्तु यथादर्शनं भवन्ति । पर्यायोपादानं केचित् पर्यायान्तरनिवृत्त्यर्थमिच्छन्ति । अन्ये तु उपलक्षणार्थमिच्छन्तः प्रयोजनादिप्रयोगेऽप्येतद्विभक्तिविधानं मन्यन्ते' इत्युदैर्यत । तत्र काशिकादिसम्मतमुपलक्षणत्वपक्षमाश्रित्य भावप्रकाशिकायां 'निमित्तकारणहेत्वर्थेषु' इत्यपठ्यत । 'हेतौ' इत्यत्र वा 'सर्वनाम्न' इत्यत्र वा अस्य वार्तिकस्य पाठेऽपि 'हेतौ' इत्यनुवृत्तेरत्र सर्वसम्मतत्वात् हेतुहेतुमद्भाव एवास्यापि प्रवृत्तिः । ततश्चानेन उत्तरशब्दात् पञ्चमी सिध्यत्येवेति पञ्चम्याक्षेपः कथं युज्यत इति शङ्कायां वार्तिकानादरेणोक्तमिति व्याह्रियत । तत्त्वबोधिन्यादिषु निमित्तेति वार्तिकेन 'षष्ठी हेतु' सर्वनाम्न इति सूत्रद्वयं गतार्थमिति कथनेन पदमञ्जर्यादिषु अन्नस्य कारणस्य वसतीत्यादि काशिकाकारासम्मतासर्वनामविषयोदाहरणदानेन च सूत्रद्वयवदस्यापि फलफलिभावात्मकहेतुहेतुमद्भाव एव प्रवृत्तिरित्यवगमात् सिद्धान्ते उत्तरशब्दादनेन पञ्चमी न भवत्येव । हेतुशब्दप्रयोगहेतुहेतुमद्भावाधीनेतरान्वययोरन्यतरस्य सत्त्वे सूत्रद्वयस्य प्रवृत्तिः हेत्वादिशब्दप्रयोगतदधीनेतरान्वययोरन्यतरस्य सत्त्वे वार्तिकस्य प्रवृत्तिरिति श्रुतप्रकाशिकासिद्धान्त इति, कौमुदीव्याख्यानमेतत्संवादीति 'सर्वनाम्न' इति सूत्रेण उत्तरशब्दात् षष्ठीतृतीयान्यतरप्रसंजने तस्य सूत्रस्य विषयव्यवस्थापने च कार्ये 'षष्ठी हेतु' इत्येतद्विषये श्रुतप्रकाशिकायां तत्करणं षष्ठी हेतु इति सूत्रस्य तत्रानुवृत्तिमभिसंधाय 'रषाभ्यां' इत्यस्य 'अट्कुप्वाङ्' इति सूत्रे अनुवृत्तिमनुसंधाय कुर्वन्तीत्यादौ रषाभ्यामिति णत्वमिति प्रतिपादनवत् इति च भावप्रकाशिकातः प्रतिपद्यते ।

---

॥ श्रीः ॥

षेक्स्पिअर् - कृतं

# यथाभिमतम्*

नाम

# नाटकम् ॥

—◇◇—

## अङ्कः प्रथमः ।

### प्रेक्षणकम् १. आलिवर्-अस्य उद्यानम् ।

आर्लण्डो अॅडम् च प्रविशतः ।

आर्लण्डो — यथाऽहं स्मरामि (तथा), अॅडम्, एवं तदभूत् । – शासने फल्गु 'वराह'सहस्रं मे दायमकल्पयत् । यथा त्वमात्थ (तथा) अहं सम्यक् परिपोषणीय इति मम भ्रातरं स्वाशिषं व्यपदिश्य न्ययोजयच्च । मम भ्रातरं जॅक्विस्-इमं सः कलाशालायां वर्तयति । तस्य कौशलमतीव श्लाघेत जनवादः । मम तु विषये ; ग्रामीणभावार्हं गृह एव मां रक्षति । अथ वा, युक्ततरं वदामि, गृह एव मामवस्थापयति अरक्षितम् । यतः— मादृशस्य अभिजातस्य किं तद् रक्षणपदाभिधानार्हं मन्यसे यत् वृषभस्य गोष्ठेऽवस्थापनान्न भिद्यते । तस्य अश्वाः सम्यक्तरां पोष्यन्ते । ते हि न परं आहारसमृद्ध्या रमणीया भवन्ति

---

* 'As you like it' इति तत्कृतं नाम । तदनुसारेण 'यथाभवदभिमतम्' इति युक्तम् । तथापि संक्षेपरुच्या सौन्दर्यातिशयबुद्ध्या च यथाभिमतमित्येवेह कृतम् । a स्थाने अॅ इतीह निवेद्यते ॥ टिप्पणी । यथेति । मम स्मृतिमनुसृत्येत्यर्थः । वराहेति । सार्धरूप्यकयार्घः पणः वराह इत्युच्यते । अकल्पयदिति । स्वपिताऽत्राभिप्रेतः । स्वाशिषमिति । 'अन्यथा ममाशिषस्ते न फलिष्यन्ति । प्रत्युत विपरीतं फलिष्यन्ती'त्यभिप्रायेति भावः ।

अपि तु गतिषु शिक्षामपि लभन्ते । एतदर्थं च सादिनः परिश्रम्य महता वेतनेन क्रीयन्ते । अहं तु तस्य भ्राता अन्यत् न किञ्चित् तस्माल्लभे, विना देहवृद्धिं यस्याः कृते यथा अहं तथा तदीयावकररा-शिस्था जन्तवोऽपि तस्याधमर्णा भवन्ति । विना इदं 'न किञ्चित्', यत् स मे भूयिष्ठं ददाति, तत् किञ्चित्, यन्न प्रकृतिरदात, तस्याधिकारः (मयि वृत्तिः) मत्तः अपहरतीव । भृत्यैस्सह मां भोजयति । भ्रातृपदं मे निरुन्धे । अपि च यावत् तस्य शक्यं तावत् मम आभिजात्यं विद्यया अवलुम्पति* । इदं तत्, अडम, यन्मां दुःखाकरोति । मम पितुरुत्साहगुणश्च यो मन्ये मय्यन्तर्वर्तते, इदं दास्यमभियोक्तुमा-रभते । नेतःपरं तदहं सहिष्ये, यद्यपि नाहमद्यापि जानामि कमप्युपायं येन तत् परिहर्तव्यम् ।

अडम् — अद्य आगच्छति मम प्रभुः तव भ्राता ।

आर्लण्डो — अन्यतोऽपसर, अडम् । आकर्णय च यथा स मामधिक्षिपति । [अडम् अपसरति]

(प्रविश्य)

आलिवर् — अद्य, आर्य, किमत्र त्वं विदधासि ?

आर्लण्डो — न किञ्चित् । नाहं यत् किमपि विधातुं शिक्षितः ।

आलिवर् — किं विबाधसे‡ तर्हि, आर्य ?

आर्लण्डो — हन्त आर्य, तव साहाय्यं कुर्वन्नस्मि, यं भगवान् ससर्ज तस्य, त्वदीयस्य अयोग्यस्य भ्रातुः, अलसतया विबाधने ।

---

* कुलीनताकृतं विशेषं समुचितविद्याप्रदानविरहेण विलोपयतीति भावः ।

‡ विबाधस इति । विधानं वा विबाधनं वेति अनयोः सह प्रयोगः प्रसिद्धः । तदिह विधानस्य प्रतिषेधे विबाधनस्य प्रश्न इत्याहुः ।

आलिवर्— हन्त आर्य, समाचीनं व्यापृतो भव । विनश्य ।

आलण्डो —किं नामाहं त्वदीयान् सूकरान् पालयन् तैः सह तुषान् भक्षयंश्च असानि ? कं अतिव्ययमहं कृतवानास्मि, येनेदृशं दारिद्यं मे प्राप्तम् ?

आलिवर्— आर्य, अपि जानासि कुत्र त्वं वर्तसे ।

आलण्डो— आम, आर्य, सम्यक् इह त्वदीये उद्याने ।

आलिवर्— जानासि कस्य पुरतः, आर्य ?

आलण्डो— आः । जानामितरां, यस्य पुरतः अहं वर्ते स यावन्मां जानाति ततः । जानाम्यहं त्वं मे ज्येष्ठो भ्राताऽसि । उदारायां* रक्तास्थितौ त्वयापि मामेवं‡ जानता भाव्यम् । देशाचारमर्यादा प्रथमजत्वेन भवन्तं मदपेक्षया श्रेयांसमनुमन्यते । स एव तु संप्रदायः न मम रक्तसम्बन्धमपनयति, विंशतावपि भ्रातृषु आवामन्तरा स्थितेषु । यावान् पितुरंशस्त्वयि तावान्मय्यस्ति । अथापि, अहमङ्गीकरोमि, मत्तः पूर्वं तवागमनं पितृप्रतिपत्तौ सन्निहिततरं भवति ।

आलिवर्— किं, वटो§ !

आलण्डो— एह्येहि, ज्येष्ठ भ्रातः, त्वमस्मिन् अतिबालः ।

आलिवर्— किं नाम ममोपरि हस्तौ निवेशयिष्यसि, धूर्त ।

आलण्डो— नाहं धूर्तः । अहं आर्य-रोलण्ड् डि बाय्स्-अस्य कनिष्ठः पुत्रः । स मे पिता । त्रिर्धूर्तः सः यो वदति एवंविधः पिता धूर्तान्

---

* उदारायामिति । उत्तमकुलजननानुरूपामिति भावः ।

‡ एवं, भ्रातेति । अलसतयेति । किमपि कर्तुं मामशिक्षयन् त्वमेव मां विबाधसे । नाहं किमपि विबाध इति भावः ।

§ वटो इति । एवं वदन् प्रहर्तुमिव हस्तमुद्धरति । अस्मिन् प्रहार-कर्मणि । एवं वदन् हस्ताभ्यां तं गले गृह्णाति ।

प्रासुवेति। यदि त्वं मम भ्राता नाभविष्यः अहमिमं हस्तं तावत् त्वत्कण्ठात् नापानेष्यम् यावदयमन्यो हस्तः तथा वदनाय* तव जिह्वामुत्पाटयति। त्वं त्वामेव विनिन्दितवानसि।

अडम्— [पुरस्तादागच्छन्] मधुरौ स्वामिनौ, प्रशान्तौ भवतम्। युष्मत्पितुः स्मरणेन सम्प्रतिपत्तिमन्तौ स्यातम्।

आलिवर्— मुञ्च मां गन्तुम्। अहं ब्रवीमि।

आर्लण्डो— न मोक्ष्यामि, यावदहं प्रसन्नो भवामि। शृणु मे। स्वकृते शासने पिता त्वां न्ययोजयत्—उचितं विद्याप्रदानं मे कार्यमिति। त्वं मां शिक्षितवानसि कृषीवलमिव, नागरिकोचितान् गुणान् मे अप्रकाकशयन्† तिरोदधच्च। पितुरुत्साहशक्तिः मयि बलवद् वर्धते। नाहमितः परं तत् सहिष्ये। तस्मात् नागरिकोचितान् व्यापारान्मे अनुमन्यस्व। अथ वा यं मे पिता शासने व्यादिशत् तमल्पं भागं मे देहि। तावता अहं गमिष्यामि। मम भाग्यं क्रेष्यामि‡।

आलिवर्—अथ किं करिष्यसि - याचनम्? - यदा स व्ययितो भवति। सम्यक्, आर्य, अन्तरेहि। नाहं चिरं त्वया क्लेशितो भवानि। अवश्यं गृहाण तव शासने कञ्चन भागम्। प्रार्थये भवन्तं, मुञ्च माम्।

आर्लण्डो— मम क्षेमाय यावदावश्यकं ततोऽधिकं त्वयि नापरात्स्यामि §।

आलिवर्— याहि तेन सह त्वं वृद्धशुनक!

---

* वदनायेति। तदुचितदण्डायेत्यर्थः। † अप्रकाशयन्निति। समानपुरुषसमागमप्रसक्तिं सर्वथा निरुन्धन्निति भावः।
‡ क्रेष्यामीति। इदं वित्तं विनियुज्य भाग्यानुरूपां वृत्तिं करिष्यामि।
§ नापरात्स्यामीति। एवमुक्त्वा भ्रातरं मुमोचेत्यनुसन्धेयम्।

अॅडम्— 'वृद्धशुनकः' ; अयं नु मे बहुमानः । परमं सत्यम् ; युष्मत्सेवायां मे दन्ताः अपतन् । देवो दयतां मम प्राचीनस्वामिने । स ईदृशं वचो नोक्तवान् भवेत् ।

निष्क्रान्तः मार्लेण्डो । अॅडम् च ।

आलिवर्— तथापि नु भवति ?। मयि त्वं विजृम्भितुमारमसे ? इमं ते मदं चिकित्सिष्ये। न च वराहाणां सहस्रं ते दास्यामि । अये, डेन्निस् !

(प्रविशति डेन्निस्)

डेन्निस्— किन्नु मां अत्रभवानाह्वयति ।

आलिवर्— राज्ञो मल्लः चार्लेस् किमिह आगतो नाभूत् मया सम्भाषितुम्।

डेन्निस्— प्रसीदतु स्वामी । स इह वर्तते उपकवाटम् । भवदुपगमनं अर्थयते च ।

आलिवर्— आह्वय तं अन्तः । (निष्क्रान्तो डेन्निस्) । स समीचीनो मार्गः । श्वश्च मल्लयुद्धं भवति ।

( प्रविशति चार्लेस् )

चार्लेस्—सुप्रभातम् अत्र भवते ।

आलिवर्—साधो, मान्य चार्लेस्, का अभिनवा वार्ताअभिनवे आस्थाने ?

चार्लेस्— आर्य, न कापि वार्ता आस्थाने विना प्राचीनां—प्राचीनो नृपः तस्य भ्रात्रा नवीनेन नृपेण निष्कासितः । त्रिचतुरा अनुरक्ताः प्रभवश्च स्वयंकृते प्रवासे तेन सह आत्मानं वर्तयन्ति । तेषां क्षेत्राणि धनागमाश्च नवीनस्य राज्ञः कोशं वर्धयन्ति। तेन स तेषां पर्यटनं निकाममनुमन्यते ।

आलिवर्— अपि ते शक्यं वक्तुं किं रोसलिन्द्, राज्ञी दुहिता, पित्रा सह निष्कास्येत ।

# पुस्तकपरामर्शः ॥

## A Hand-book of CLASSICAL SANSKRIT LITERATURE

by
Sri. N. Venkatakrishna Rao, M. A.
Lecturer in Sanskrit,
The Madras Christian College. Tambaram. Price Rs. 2

आङ्गलभाषामयोयं ग्रन्थः । महाभारतं पुराणानि रामायणम् गद्य-पद्यदृश्यश्राव्यादिभेदभिन्नानि सर्वाणि काव्यानि अलङ्कारग्रन्थाः इति सर्व-मिदं इह विषयीभवति । पाश्चात्यैः अस्मद्देशीयैश्चोक्तं सर्वं परिशील्य स्वय-मपि बहुविमृश्य सङ्ग्रहेण स्फुटं चेह विषयाः प्रतिपादिताः । अन्यैः कृता बहवो दुर्विमर्शा निरस्ताः । निदर्शनतया रामायणप्रकरणं निर्दिशामः । पञ्चैव काण्डाः प्रथममासन् इति विमर्शकाः । तदिह समाधीयते बि-ए-शिरोमणिकक्ष्यास्थानां सर्वेषामत्यन्तमुपकारकोऽयं ग्रन्थः ।

अस्मिन्नस्मिन् शतके एते एते ग्रन्थाः ग्रन्थकाराश्चेति दर्शयन्ती पट्टिका काचनान्ते योजिता बहूपकारिणी ।

---

# S. S. L. C. SANSKRIT TEXT 1946-47.

---

अत्र 33 पुटे स्थितः सुभाषितनीवीश्लोकः एवं पठनीयः—

गतिर्व्योम्ना किं तद् गरुडमभिटीकेत चटकः
पिबत्वम्भः क्षारं न किल कलशीसूनुरलसः ।
कलः कण्ठे नादः क इव मशकः किन्नरपतेः
कथञ्चित् साधर्म्यं क्षिपति न हि वैधर्म्यनियमम् ॥

---

# Intermediate Text

# नागानन्दः ॥

Sri Balamanorama Series Edition 1946

Page 7 'तेनास्ति कश्चिद्गुणः' । अत्र 'तत्रास्ति कश्चिद्गुणः' इति पाठान्तरम् ।

अत्र कश्चित् यः कश्चन इति नार्थः । अपि तु कः चित् को नु इति । 'कः स्विद् गुणः' इति तु तात्त्विकः पाठः स्यात् ।

,, 23 'अनयाऽन्योन्यसदृश्याकृत्या' ।

'एतयाऽनन्यसदृश्याकृत्या' । इति पाठान्तरम् ।

,, 32 'पश्यन्त्या अधिकतरं' । ' ....तरः'

,, 55 'मलयवती प्रतिग्राहयामि' । ' ....प्रतिपादयामि'

,, 60 'पक्षपातिना प्रत्याख्यातस्य मित्रावसोर्नाहं प्रतीच्छामीति श्रुत्वा जात.... '

'पक्षपातिना, प्रतिपादयतोऽपि मित्रावसोर्नाहं प्रतिगृहीतेति जात.... '

मित्रावसोरिति पञ्चमी ।

---

# प्रकीर्णकम् ॥

I

माणवकः— आर्य, गृहे कार्यमस्ति । 'कलाशालां गत्वा सन्निधानमावेद्य सद्योऽनुमतिं गृहीत्वा निवर्तस्व' इति मे जननी अवादीत् । तत् प्रार्थये गृहगमनाय अहमनुमन्तव्य इति ।

उपाध्यायः— गच्छ । किन्तु एवं यदि सर्वदा कञ्चन व्याजं कृत्वा कक्ष्यायामसन्निहितो भवसि । तव विद्या विद्यैव । पिता ते सम्भाषिष्ये ।

II

पिता— किमये बालकं सर्वदा किमपि गृहकृत्यं कर्तुमादिशन्ती वर्तसे ।

उपाध्यायो विमनायते।

माता— सम्यगेतत्। तेन मे गृहे किं कर्तव्यम्। किं कर्तुमहमादिशामि। स हि "उपाध्यायोऽस्मिन् दिने नागमिष्यति। 'स्वयं पठत गृहान् वा गच्छत। अद्य पाठो नास्ति' इत्युपाध्याय आह" इति पदे पदे वदन् कलाशालात आगत्य विहरन्नास्ते।

III

सखा— अरे अतीव नाम कुशलोऽसि। जननीं व्यपदिश्य उपाध्यायं वञ्चयसि। उपाध्यायं व्यपदिश्य जननीं वञ्चयसि। असत्यभाषणं शिक्षितवानसि। नाल्पापि ते शङ्का भवति।

माणवकः-- आमेर, ज्ञात्वा निष्कम्पं निश्शङ्कं असत्यं भाषे। मया कक्ष्यायां स्थातुं न शक्यते। अग्नाविव वर्तमानस्य तदानीं मे भवति। तस्योपद्रवस्य शान्तये यत् किमप्यहं तत्र तत्र वदामि. अत्र कस्य क उपद्रवः। न हि अन्यस्य कस्यचिदनेन हिंसा भवति। स्वक्लेशनिवृत्तये परहिंसालेशवर्जितं असत्यमेवंविधं न वक्तव्यमिति कथं भवान् अन्यो वा निश्चिनोति। तत् प्रथमं निरूपय। पश्चान्मां शिक्षयिष्यसि।

सखा– एवं नु।

[अस्य माणवकस्य समुचितमुत्तरं विलिख्य प्रेष्यमाणमिह प्रकाश्येत।]

[सम्]

---

न चिन्तयस्यङ्ग कदापि पाठं
सर्वं दिनं क्रीडितुमिच्छसि त्वम्।
न भोक्तुमप्यालयमागतोऽसि
त्वां दुष्टमद्य प्रहरामि पश्य॥

---

उदेति सूर्योऽस्तमुपैति चाय-
मुदेति चन्द्रोऽस्तमुपैत्ययं च।
चौर्येण दाहेन मिथो वधेन
जना विनश्यन्ति न कोऽपि नाथः॥

TIRUPATI

Registered No. M 2300.

29

Book XX ॥ श्रीः ॥ Nos. 7 & 8

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मानिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥


| | | |
|---|---|---|
| पु. २० | कलि { ५०४७ व्यय<br>५०४८ सर्वजित | मीन —साधारण सं ४<br>मेष —शास्त्रानुबन्धः सं ४<br>आहत्य ,, ८ |


# The UDYANA PATRIKA.

A SANSKRIT MONTHLY

March } 1947
April }

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription Re. One only.
Do. With Sanskrit Supplement Rs. 2—0—0

उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यमेकं रूप्यम् । सानुबन्धाया द्वे रूप्ये ।

२. कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्ध-सञ्चिकाश्च प्रकाश्यन्ते ।

३. ग्राहकीबुभूषद्भिर्दैयया प्रथममेव मूल्यं प्रेषणीयम् ।

४. वर्षमध्ये ग्राहकीभवतामपि कन्यासंचिकादिरेव पत्रिका प्रेष्येत ।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।

६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसंपादकाय प्रेषणीयाः।

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः (संस्कृतेन आङ्गल्या द्राविडया वा न तु भाषान्तरेण)।

८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor*, The Srinivasa Press,
Tiruvadi P. O. Tanjore Dt.

निर्वाहकसम्पादकः— *Mimamsarnava*, *Mimamsakesari*
*Panditaraja* **D. T. Tatacharya Siromani M. O. L.,**
Lecturer, Sri Venkateswara College,
TIRUPATI.

## विषयाः ॥

शास्त्रानुबन्धः—
कुवलयानन्दः । [बुधरञ्जनीसमेतः] १९७—२०४

1 मेनका ।
2 सुभाषितनीवी ।
3 वैदिकम् (२) ।
4 रावणप्रणतिः (२) ।
5 कुपथशब्दः ।
6 यथाभिमतम् नाम नाटकम् ।
7 पाठशुद्धिः ।

तत् प्रतिगृह्य अनुवाच्य अनुपदं नैना-महम्मदः विभ्रान्तः 'इयं मे श्वशुरस्यैव लिपिः' इत्याचष्ट ।

मान्त्रिकः— इयमेव भवच्छ्वशुरेण पालकेभ्यः प्रेषिता 'प्रतिज्ञा'। मदीयां पातालयक्षिणीं प्रेष्य आनीनयम् । इदं पश्यतु भवान्, पालकस्थानकमुद्रा अस्मिन् काकदे अवपन्ना वर्तते । अतस्तं विषयं भवान् पठित्वा ज्ञातुमर्हति ।

आश्चर्येण पिनद्धो नैना महम्मदः तस्मिन् काकदे स्थितां पालकस्थानकमुद्रामपश्यत् । अथ तदादाय पठितुमारभत । तत्र इत्थं लिखितमासीत्—

प्रतिज्ञा ।

मद्रराज्यनिर्वाहसभासभ्यस्य कानू-बहदूर् पेरियतम्बि-मरकायस्य सकाशात्

पालकप्रत्यवेक्षकाय—

आर्य,

तिरुवल्लिक्केणि - तोलशिङ्गप्पेरुमाळ्-कोविल्-वीथ्यां स्थितस्य वराहस्वामि अय्यङ्गार् इत्यस्य गृहिणी मेनका नाम कन्यां तस्य वागाजीवस्य अग्रजा 'पेरुन्देव्यम्बा' इत्येषा तदीयगृहपार्श्वगृहवासी श्यामार्य इत्ययं च नाटकदर्शनं व्यपदिश्य प्रतार्य अङ्गप्पनायकवीथ्यां— इत्येतत्कवाटसङ्ख्यावति गृहे स्थिताय नैनामहम्मदमरकायाय दशसहस्रेभ्यो रूप्येभ्यो व्यक्रीणाताम् । कामातुरतया तस्मिन् तस्याः पातिव्रत्यभङ्गाय यतमाने सा आक्रुश्य तत्र लब्धेन फलच्छेदिना असिना आत्मानं व्यापादयितुमयतत । गृहस्याभ्यन्तरे स्थिता मम पुत्री उक्तस्य नैनामहम्मदमरकायस्य भार्या च नूर्जहान्बीबी तत्र आगत्य तां कन्यां मोचयित्वा मत्प्रासादमानीतवती । सा कन्या भयातिशयजनितेन कम्पेन ज्वरिता मत्प्रासादे वर्तते । उपरि निर्दिष्टास्त्रयोऽपि मनुष्याः भारतीयदण्डशासनस्य 366 तमखण्डानुसारेण कस्याश्चिद्बालायाः वञ्चनया व्यभिचरणाय अपहरणं विक्रयणमित्येतदागः कृतवन्तो भवन्ति । अस्मिन् विषये भवता उचितां विचारणां कृत्वा आग-

खिनस्त्रयोऽपि निरुध्य बन्दीकर्तव्याः ।

इत्थं लिखितं लेखं नैनामहम्मदः कृत्स्नमपठत् । पेरियताम्बि-तम्य मनो भृशमाकुलमभूत् । भयेन पाणिपादमवेपत । मुखे शवच्छाया-ऽजनि । स्वकीये चक्षुषी अविश्वसन् सः लेखं पुनर्द्विरपठत् । लिपिः स्वश्वशुरलिपिरेवेति निश्चितमज्ञायत । पालकस्थानमुद्रा च तत्र अव-पन्ना अभूत् । स उत्तमो मान्त्रिक इति मत्वा स तथैव मोहितः बद्धः सर्प इव निश्चलः न्यमैक्षत । स्वगृहिणी सर्वान् विषयान् स्वपितरि उवाचेति सः स्वस्मिन् दाक्षिण्यलेशमपि विना 'प्रतिज्ञां' विलिख्य प्रेषयामासेति च प्रत्यक्षं निरूपितमभूत् । तस्मिन् आपत्काले इति-कर्तव्यतामूढः सः नेत्रे विष्फार्य मान्त्रिकमुखं दृष्ट्वा 'एतेभ्यः भवतैवाहं रक्षणीयः' इति कथयन् 'सलां' कृत्वा प्रार्थयामास ।

मान्त्रिकः— आर्य, एतत् प्रति भवता न मनागपि चिन्ता कार्या । अद्य एकां वेलां क्षान्त्वा श्वः किं भवतीति पश्यतु भवान् । अप-रिहार्या विपदः सर्वाः परिहृत्य, अनमतः सर्वान् नमयेयम् । अद्य निशि पञ्चदशनाडीसमये श्मशानं गत्वा जप्त्वा बलिं दत्त्वा पातालयक्षिणीमुच्चाटयामि । भवान् अद्यैव निशि स्वगृहं गतो भवतु । श्वः प्रभाते भवतः श्वशुरः पत्नी च भवन्तमुपेत्य पादयोः पतित्वा क्षमां प्रार्थयिष्येते । अपि च तौ इतः परं सर्वदा यथा भवानाह तथा नर्तिष्यतः । यावतीरपि स्त्रियः परिगृह्य रक्षतो भवतः अनुकूलावेव भविष्यतः । किञ्च महापतिव्रतावत् नटि-तवतीं तां ब्राह्मणकन्यामपि वश्यां करोमि । सा इतः परं स्वगृहं पुरुषं च अस्मरन्ती भवानेव गतिरिति यथा भवेत् तथा करि-ष्यामि । अलम् ? — इत्यवोचत् ।

तदाकर्णितवान् नैनामहम्मदः प्रमुदितः उत्थाय मान्त्रिकस्य पुरस्तात् जानुकारं प्रणम्य 'महन्' यदि भवान् एतानि कर्माणि कुर्यात् मादृशो भाग्यवान् को भविष्यति ? यदि भवान् मयि अयुतमपि रूप्याणि अपेक्षिष्यते, दास्यामि । भवतोऽनपेक्षितमपि वित्तं यस्मै देयं भवान् वदति तस्मै दातुं सज्जोऽस्मि । इत्यनुनाथति स्म ।

मान्त्रिकः— सर्वमिदम् अवसितमित्येव भवान् मन्यताम् । नैव मे वित्तमपेक्षितम् । श्वः कार्ये अवसिते 'नागूर्-तक्का कृते द्वे सहस्रे रूप्याणि प्रेष्यन्ताम् । अपि चास्मिन् पुरे अयुताय पाक्किरि (भिक्षु)भ्यः त्रयाणां दिनानां भोजनं दीयताम् । तदेव पर्याप्तम् ।

नैनामहम्मदः— अवश्यं तथा करोमि । कच्चित् सा ब्राह्मणकन्याऽपि श्व एव मत्सकाशमागता भवेत् ।

मान्त्रिकः— आः । अवश्यमागच्छेत् । तां प्रति अन्यदपि तवार्थे करिष्यामि । तस्याः कन्यायाः त्वयि स्थितिं यथा यः, कोऽपि नोपलभेत तथा प्रतिरोधं कृत्वा 'रक्षां' सज्जीकरोमि । तां तद्वासगृहद्वारदारुणोन्तः प्रहृत्य स्थापयतु भवान् । तस्याः कन्यायाः तत्र अवस्थानं न कश्चिदुपलभेत । जातु तस्यां रक्षायां केनाप्यपहृतायामपि व्यवहारो यथा त्वां नानुसरेत् तथा अन्यदपि कर्म कृत्वा गमिष्यामि ।

इमान् विषयान् श्रुतवान् नैनामहम्मदः पूरितः* पुलकाचितः विस्मृतात्मा प्रामोदत । अनमन्मौलिचक्रवर्ती स्वश्वशुरः नूर्जहान् च स्वपादे पतित्वा क्षमां प्रार्थयेते इति, स्वयं तौ न गणयतीति च तदानीमेव मनसि भावयति स्म । मेनकां च कस्मिंश्चित् पृथक् प्रासादे वासयित्वा तया सललितं संश्लिष्य सञ्जल्प्य सरससल्लापं क्रियमाणं मत्वा मनःप्रसादं निर्माति स्म । 'साधु, व्यवहारो यथा मां नानुसरेत् तथा किं भवान् करिष्यति ?' इत्यवदत् ।

मान्त्रिकः— तदर्थं भवत्सकाशे लेखेन केनचित् रक्षितेन भाव्यम् । पेरुन्देव्यम्बा कन्याया मातेति, श्यामार्थः कन्याया अग्रज इति, कन्या अविवाहितेति, तस्याः संरक्षणे अशक्त्या तौ तां भवति व्यसृजतामिति, तां महम्मदकन्यां कृत्वा परिणेतुं ताभ्यां भवते अनुमतिर्दत्तेति च ताभ्यां लिखितेन केनचिल्लेखेन भवत्सकाशमागतेन भाव्यम् । तं चेत् भवान् रक्षति व्यवहारतः न भवतः

* सन्तोषेण बृहत्त्द्भूत इति भावः ।

आगः किमपि भवेत् । तस्याः कन्याया भर्ता न यः कोऽपि व्यवहारः भवन्तं प्रति प्रवर्तयितुं शक्यः ।

नैनामहम्मदः—(किञ्चिद्विचिन्त्य) इयं समीचीना युक्तिः । किन्तु तादृशं लेखं विलिख्य न हि तौ दद्याताम् । श्यामार्यो जातु लिखित्वा दद्यादपि । सा अम्बा न खलु तत् सम्मन्येत । तत्र किं तन्त्रं कार्यम् ?

मान्त्रिकः—तत्र अहं वर्ते । न चिन्ता कार्या । मयि कोऽपि मोहनचूर्णोऽस्ति । तत्समीपं गत्वा भाषमाण एव सन् यदि तस्य चूर्णस्य अल्पां मात्रां वाते विसारयामि, यथाऽहं वदामि तथा तौ नृत्येताम् । सपदि तादृशं लेखं लेखयित्वा आनयामि । सर्वस्यापि कृते श्यामार्याय कञ्चन लेखं लिखित्वा ददातु भवान् ।

नैनामहम्मदः—कीदृशो लेखस्तस्मै लेख्यः ?

मान्त्रिकः—"'कन्या सम्मन्येत' इत्युक्त्वा अगच्छत । गृहमानीय कन्याया विसर्जनानन्तरं अहं तत्र अगच्छम् । मां दृष्ट्वा सा कम्पितकम्पिता कमपि विषयमजानतीव नटन्ती आत्मनो मोचनमयाचत । तत्र असम्मत्या मां बहुधा अनिन्दत् । बलात्कारेण तां ग्रहीतुं प्रवृत्ते मयि, मम सविधेऽप्यनागच्छन्ती धावंधावं अन्ते आम्रफलछेदिनमसिमादाय तेन आत्मानं कोथितुं* प्रावर्तत । अहं तस्याः समीपमप्यगत्वा, दूरे तिष्ठन् 'न कोथितव्यम्' इति 'बहिः प्रेषयिष्यामि' इति चाभिधाय बहिर्निर्गतोऽभवम् । श्रुततदाक्रन्दा मम गृहिणी सद्य आगम्य तां नीत्वा मम श्वशुरगृहमगच्छत् । अद्यापि सा ज्वरार्ता तत्र वर्तते । सा चेत् पुनर्युष्मद्गृहमागच्छेत् तद्युष्माकमापदि पर्यवस्येत् । एतल्लेखवाहः कश्चन मान्त्रिकः । अस्य साह्येन तां कन्यां वशयित्वा पुनरहं परिग्रहीष्यामि । उपरि विशेषान् अयं मनुष्यो वक्ष्यति ।" इति विलिख्य लेखं ददातु भवान् । अहमद्यैव गत्वा कार्यं क्षणेन अवसाय्य आगच्छामि ।

---

* कुथ to stab: कुथ्नाति ।

जनः कविताकिंकसिंहः स्वस्य कवलभूतं कलभमेव जानातीति वा अर्थः । प्रभावव्यवस्थाधिकारे विपुलं विदूषितत्वादिति ।

तर्हि मुनिवाहनमुनेः जात्यन्तरोत्पन्नस्य कथं भगवता स्वालयान्तस्स-मानय(न)मिति चेत् तत्राप्युत्तरमेतच्छ्लोकलभ्यम् । तथा हि । कुलगोत्रविम-र्दिनं अयोनिजतया वस्तुतः कुलगोत्रविरहितं केनचिद्दान्तकृत्येन उपलक्षितं शान्तो दान्त उपरतस्तितिक्षुस्समाहितो भूत्वाऽऽत्मन्येवात्मानं पश्येदित्युक्त-क्रमेण सदा भगवद्ध्यानैकनिरतं बहुधा भिन्नं निखिलजनगोष्ठीभ्यः प्रायशो विवि(भ?)क्ततयैव तिष्ठन्तं विभिन्ना भ्रातर इत्यादिप्रयोगवशात् भिन्नशब्दस्य विभक्तार्थकता । प्रायश इत्यनेन योगानुभवदशाव्युदासः । जनो लोकसार-ङ्गादिः । मदेन स्वब्राह्मण्यदर्पेण मातङ्गं मन्यते । मातङ्गपोषणमात्रेण तज्जा-तीयमभिमत्याधिक्षिपतीत्यर्थः । वस्तुतो मातङ्गस्यापि महाभागवतस्याधि-क्षेपो महापचाराय । किमुतायोनिजस्येत्यर्थः । अतश्चात्मगुणविरहिणां जाति-मात्रब्राह्मण्यमप्यकिञ्चित्करमिति प्रदर्शनायैव भगवता तद्वहनरूपं प्रायश्चित्तं लोकसारङ्गायोपदिष्टमिति द्रष्टव्यम् ।

एवं सततविष्णुद्वेषिमहावीरपाषण्डपरतयाप्यर्थः । केनचित् ब्रह्मा शिवश्शतमखः परमःस्वराडित्येतेऽपि यस्य महिमार्णवविप्रुषस्त इति भगवन्म-हिममहासमुद्रे एकजलबिन्दुलायं विलीनेन रुद्राख्यचेतनविशेषेण कथमिद-मवगम्यत इत्यत्र आह (दान्तेति) । दान्ता भगवता दमिता कृत्या रुद्र-वरप्रसादलब्धा काशीराजमुक्ता काचन पिशाचिका यस्य तथाविधेन पौण्ड्र-कवासुदेवसहायभूतस्वपितृवधामर्षितेन काशीराजेन द्वारकादलनार्थं विमु-क्तायां रुद्रवरप्रसादलब्धायां कस्याञ्चित् पिशाचिकायां रुक्मिण्या साकमक्ष-क्रीडासक्तेन भगवता अनादरेण मुक्तः श्रीसुदर्शनः सद्य एव तां कृत्यां तं च काशीराजं तत्पुरीं वाराणसीं च युगवत् भस्मीचकारेति श्रीभागवते । अति-मानुषस्तवेऽपि "अक्षेषु सक्तमतिना च निरादरेण वाराणसी हरपुरी भवता विदग्धेति । बदरिकाश्रमे श्रीमन्नारायणेन सह युद्धमारभ्य इषीकास्त्रेण पराज-

यप्राप्तिवृत्तान्तः केवलमुनिजनमात्रविदित इति तमुपेक्ष्य प्रसिद्धकाशीपत्तन-परिप्लोषणवृत्तान्त उपक्षिप्त इति ध्येयम् । यद्वा कृत्यशब्द एवात्र 'काशी-वृकान्धकशरासनबाणगङ्गासंभूतिनामकृतिसंवदनाद्युदन्त'परः । तथा च तत्त-द्वृत्तान्तेषु दर्शितेनेत्यर्थः । तादृशपुरुषमधिकृत्येति यावत् । कुलगोत्रवि-मर्दिनं कुलं स्थानविशेषः श्रीवैकुण्ठादिः गोत्रं नारायणादिनामविशेषः गोत्रं कुलाख्ययोरिति मेदिनी । तद्विमर्दिनं तद्विपरिवर्तनलोलुपं वास्तवपरमपुरुष-स्थानं तन्नाम च विपरिवर्त्य कैलासाख्यस्थानं शंभ्वादि नाम च परमपुरुष-स्यारोपयन्तं यद्वा विशेषेण मार्दनं निरुक्तादिनिर्वचनमुपेक्ष्य एकाक्षर-निघण्ट्वादिप्रसिद्धैरप्रसिद्धैरक्षरार्थैः नारायणादिनामानि निर्दयं मर्दयन्तं न हि नारायणादीनां नाम्नामन्यत्र संभवः । ऋते तमेकं पुरुषं वासुदेवं सना-तनमित्यादिप्रमाणगणानवधूय तेषां शिवपरत्वमाचक्षाणमित्यर्थः । तत्र हेतुमाह (मदेनेति) मीमांसापरिचयमदेन सर्वमप्यर्थं यथेच्छं साधयेमेति दुरभिनिवेशेन । बहुधा भिन्नं तत्तद्वादिभिः अनेकशः परिभूतं देशा-न्तरेषु पलायितं वा । 'भिक्षौ केचित् सुराजंभवमभिदधत' इति सूक्तिप्र-कारेण लक्ष्मीपतेः पुण्डरीकाक्षस्य पीताम्बरस्य किरीटिनः पुरुषोत्तमस्य निखिलजगदाधिराज्यकथनं समुचितमुपेक्ष्य विरूपाक्षस्य भिक्षोः श्मशाननिल-यस्य कपालिनः तद्व्यवस्थापयितुमुद्युञ्जा(नं?)दुराग्रहग्राहिलचित्तमित्यर्थः । जनः प्रामाणिकजनः मातङ्गं मन्यते । यः पुत्रः पितरं द्वेष्टि तं विद्यादन्यरेतसम् । यस्तु नारायणं द्वेष्टि तं विद्यादन्त्यरेतसमिति प्रमाणानुसारात् चण्डालमेव जानातीत्यर्थः । अत एव वेदान्तकौस्तुभे नारायण परं ब्रह्मेत्यत्र नारयणात् परमिति विग्रहकथकं दुष्कथकं प्रत्युक्तं नारायणः परं ब्रह्मेति सविसर्गपाठः श्वपचस्य जिह्वां छिनत्तीति । अन्यत्र च अहो भगवद्द्वेषाग्निदग्धस्य श्वपच-स्यानिबद्धः प्रलाप इत्यादिकम् । तथा चानन्यपरनिर्बाधपरिपठ्यमानबहु-श्रुतिमन्वाद्यासतमानेकस्मृतिविततिपञ्चरात्रश्रीरामायणहरिवंशभारतभागवतपा-द्मवैष्णवनारदीयवाराहवामनमात्स्यगारुडमार्कण्डेयब्रह्माण्डब्राह्मनारसिंहेतिहा-

ससाराथर्वणकल्पकल्पसूत्र शिल्पशास्त्रश्रीविष्णुधर्मायुर्वेदयोगज्यौतिषजितन्तादिसर्वाभ्युपगतशिष्टपरिगृहीतसुप्रसिद्धसात्त्विकोपब्रह्मणगणविरुद्धभ्रमविप्रलंभसंभवाशिष्टपरिग्रहबहुलपरस्परव्याहत पूर्वापरविरुद्धप्रण(न)ष्टकोशबहुविधप्रक्षेपोद्वापादिशङ्काकलङ्कितलिङ्गमाहात्म्यादिप्रश्नानुमिततन्मतदुरभिनिविष्टचित्तरञ्जनमात्रपर्यवसानमात्स्यादि-मध्यस्थपुराणोद्घुष्टतमोमूलकत्वनिर्धारणाप्रमाणतमपुराणान्तर्गतश्लोकगणोद्घोषेण मूढजनान् विमोहयतः सावित्रीघटकसकारान्तनपुंसकभर्गश्शब्दस्य तेजोवाचिनः अकारान्तादिपरिकल्पनक्लेशेन निजाव्युत्पत्तिकाष्ठामेवोद्घाटयतः हरिकेश इत्यत्र हरिकयोरीश इति विग्रहकरणेन पदपाठापरिज्ञानमेव प्रकाशयतः एको हवै नारायण आसीन्न ब्रह्मा नेशान इत्याद्यनन्यपरनिर्बाधश्रुतीनां ब्रह्मेशानादिनिखिलेतरगलहस्तिकाप्रदानपूर्वकं नारायणस्यैव कल्पाद्यकालिकावस्थानबोधिनीनां एकस्तिष्ठति विश्वात्मेति महाभारतोपब्रह्मणमवधीर्य धैर्यमात्रात् किमपि शशशृङ्गायमाणं परमशिवाभिधानं परब्रह्म परिकल्प्य सौबालमहृबृचबृहदारण्यकादिश्रुतिशतसिद्धमद्वारकं सद्वारकञ्च शिवस्य भगवत्सृज्यत्वकर्मवश्यत्वादिकमहृदयमेव कार्यशिवशिरसि समारोप्य पञ्चम्यन्तपरमशिवादिति स्थूलपदाध्याहारतस्सर्वलोकपरीहासगोचरतामापद्यमानस्यानभीष्टब्रह्मान्तरं वा विपरिकल्प्य तस्य सर्वोत्कर्षस्थापनेन प्रसिद्धपुरुषोत्तमोत्कर्षापलापमात्रलोलुपतयाऽस्य जगत्पितृविदूषकस्य श्वपाकपदपट्टाभिषेक एव समुचितः प्रतीकार इति भावः।

एवं परशुधरमुनिवरपरतयाप्यपरोऽर्थबोधः। केनचिद्दान्तकृत्येन 'जटां धत्ते मूर्ध्ना परशुधनुषी बाहुशिखरं प्रकोष्ठे रौद्राक्षं वलयमिषुदण्डानपि करः।' इत्युक्तयोगिवेषपरिग्रहणेत्यर्थः। कुलगोत्रविमर्दिनं 'वारानासन्नविंशान् विशसितविषमक्षत्रजातिप्ररोहः' इत्युक्तसर्वक्षत्रकुलविमर्दनदीक्षितं यद्वा चरुव्यत्यासादिभिः ब्राह्मणक्षत्रियजातिसाङ्कर्येण एककुलगोत्रविरहितमित्यर्थः। एकजातीयत्वेन निर्देशानर्हमिति यावत्। मदेन 'रे काकुत्स्थाः कथं वश्श्रुतिविषयमयं नागमद्भार्गवीय' इत्यादिदुर्मदोक्त्या बहुधा भिन्नं बहुप्रकारेणोद्भ्रा-

न्तहृदयं परशुरामं जनः मातङ्गं मन्यते । 'सैंहीं वृत्तिमधिष्ठितेऽपि हि मयि' 'सविधमुपसरन् समूलकाषंकषितनृपान्वयमद्य मां धिनोषि । हरिमिव करिकुंभकूटकोटिप्रकटकठोरनखाङ्कुरं कुरङ्गः' इति स्वस्य सिंहत्वमारोपयन्तमपि मध्यस्थजनो राघवसिंहेन दम्यमानं मत्तगजमेव मन्यत इत्यर्थः ॥ ६ ॥

---

**अनेकमुखपापात्मा छद्मसंदर्शिताश्रमः ।**
**कर्बुरप्रकृतिः कश्चित् कापेयकलहोचितः ॥ ७ ॥**

पूर्वश्लोके यत्यादिवेषं परिगृह्य प्रतिनिवृत्तौ दोष उक्तः । अत्र चाश्रमधर्मानविमुच्यैव गूढपापरतानां रीतिं प्रतिक्षिपति । (अनेकेति) अनेकमुखानि अनेकप्रकाराणि यानि पापानि महापातकातिपातकोपपातकसंकलीकरणमलिनीकरणादीनि तानि आत्मा स्वरूपनिरूपकधर्मो यस्येति तथोक्तः। पापीत्येव व्यवह्रियमाण इत्यर्थः। तान्यात्मनि अन्तःकरणे यस्येति वा । सदा पापमेव मनसि चिन्तयन्नित्यर्थः । छद्मना कपटेन संदर्शितः प्रकाशितः आश्रमः ब्रह्मचर्यसन्न्यासादिः येन सः । कर्बुरप्रकृतिः कलुषस्वभावः । चित्रकिंमीरकल्माषशबलैताश्च कर्बुरे इत्यमरकोशेन कर्बुरशब्दस्य अनेकसंकीर्णपरत्वावसायात् रजस्तमस्साङ्कर्यबोधकता वा अनुसन्धेया । यद्वा कर्बुरः पापरक्षसोरिति मेदिनीकोशात् पापोपादानक इत्यर्थः । इह जन्मनि पापकृत्त्वं पापात्मेत्यनेन विवक्षितमिति न पौनरुक्त्यम् । कश्चित् गूढपापः पुरुषः कापेयकलहोचितः । कपेर्भावः कापेयम् । कपिज्ञात्योर्ढगिति भावे ढक् । कपिधर्म इत्यर्थः । तथा च कपिस्वभावो यः कलहः अत्यल्पचापलजनितपरस्परतिस्कारः । तस्योचितः कामक्रोधादिबाहुल्यात् वञ्चनार्थवेषपरिग्रहाच्च वित्तादिलोभेन तद्विघातकैः स्वदोषरूपापकैरसकृत् कलहायत इत्यर्थः । उक्तं हि– 'काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् । व्यसनेन तु मूर्खाणां निद्रया कलहेन वा ॥ इति । उक्तं हि दिवाधूर्तचरिते—

॥ श्रीः ॥

# उद्यानपत्रिका ॥

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्वेधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु. २०] कलि { ५०४७ व्यय ... मीन साधारण ... सं ७
५०४८ सर्वजित मेष शाखानुबन्ध ... सं ८

## वैदिकम् (२) ॥

(अनुवृत्तम्)

### 4 समासः ।

उपागुरित्यस्मिन् मध्योदात्ते तिङन्तपदे अर्थानुरोधेन आङुपसर्गसत्ता ज्ञायत इत्यवोचाम । अर्थचिन्ताविरहे तिङः सोदात्तत्वं व्यत्ययेन परिकल्प्य तत एव उपेत्युपसर्गस्य श्रुतं निघातमुपपाद्य स्थातव्यं स्यात् । नोपसर्गान्तरकल्पने प्रवर्तितव्यम् । तिङि स्वरव्यत्ययकल्पने येषामाश्वासो न भवति तेषां उपेत्यत्र श्रूयमाणानुदात्तोपपादनाय आङ्कल्पनमावश्यकम् । पदकारस्याप्येवमेवाभिप्राय इति वाच्यम् । एवं चात्र सर्वथा समासस्पर्शमकृत्वैव विचारस्यावसानात् समासपर्यालोचनयैव आङ्सत्त्वावधारणमिति यत् केचिदातिष्ठन्ते तदयुक्तमिति वेदितव्यम् । तथा हि ।

1 इह समासप्रतीतिः उपसर्गस्वरविशेषश्रवणाधीना । श्रुतेन स्वरेणैव उपसर्गान्तरनिश्चये किं ततः प्रतीतेन समासेन ।

2 श्रुतस्य स्वरस्य समास एव प्रयोजकः । तेन तस्यैव साक्षात् प्रतीतिर्भवतीति चेन्न । गतिर्गताविति उपसर्गान्तरसत्त्वस्यैव प्रथमोपसर्गनिघातप्रयोजकत्वात् । तेन साक्षादुपसर्गान्तरस्यैव ततः प्रतीतेः । एतदनन्तरमेव 'गतेर्गतिमता उदात्तवता च तिङा समासो वक्तव्य' इत्यनुशासनसिद्धस्य

समासस्य प्रतीतेः । तस्यां च दशायां आङो नुपेयत्वाभावात् । प्रागेवानुमितत्वात् ।

3 समासस्य वैकल्पिकत्वेन इह समासो नास्तीत्यपि वक्तुं शक्यत्वाच्च । समासाभावे कथमेकपदतया पाठ इति चेत् 'स्वो वेद' 'स्वं वेद'त्यत्र यथा तथेति गृह्यताम् । अस्त्येव तत्र समास इति चेत् तर्हि रामो गच्छतीत्यपि समासः स्यात् । वेदे तथा भवतीति चेत् तर्हि पदकारो व्यत्ययमाश्रयतीति स्यात् । सिद्धे च समासे तदुपपत्तये व्यत्ययेन किञ्चिदुपपाद्येत । कथं तर्हि एकपदतया पाठ इति चेत् 'स्वमग्ने व्रतपा' इत्यादिषु स्थितात् स्वशब्दाद्विलक्षणोऽयं स्वशब्द इति ज्ञापनार्थमिति संक्षेपः । जीमूतस्येव, स्तनयन्निव, इत्यादौ एकपदतया पाठे शाकल्येन कृते, तद्दर्शनेन 'इवेन समासो विभक्त्यलोपश्च' इति वैयाकरणेष्वनुशासत्सु, इवेति पृथक्कृत्य पठन् अस्मत्पदकारः ईदृशेषु स्थलेषु समासो नास्तीति स्फुटं स्वाभिप्रायं प्रकाशयति । न परमेवं समासे प्रमाणाभावः समासाभावे प्रमाणमप्यस्ति–समासस्वरानुपलम्भरूपम् । समासे सति हि उपागुरित्यत्र देवभागमित्यादाविव अन्तोदात्तेन भाव्यम् । 'स्वो वेद' 'स्वं वेद'त्यत्र विभक्त्यलोपोऽपि समासाभावे प्रमाणम् । अन्यथा वायवः स्थेत्यपि कुतो न समासः । स्वामाहुतयः दूरअमित्र इत्यादौ पूर्वपदप्रकृतिस्वरः बहुव्रीहिसमासं गमयति ।

4 समासनिर्वाहाय उपसर्गं कल्पयति पदकार इति न क्वचिद्दृष्टम् । आङुपसर्गं विनैव संहितापाठे उपपद्यमानेऽपि, आङस्तीति वेदपुरुषेण मनागपि सूचनेऽकृतेऽपि, 'वैश्वानरो न ऊत्याप्रयातु' 'अर्यमायाति' इत्यादिषु आङं पठता तेन अर्थ एव प्रमाणीकृत इत्यसन्देहगन्धं प्रतीमः ।

(अनुवर्ति)

# रावणप्रणतिः (२) ॥

एकोनविंशे पुस्तके १४२ पुटे अयं विषयः प्रथमं प्राकाश्यत । तदुपरि कृताः शङ्का इह परिह्रियन्ते ।

अनभिज्ञतया स्फुरत्क्रुधो यदधिक्षेपकृतक्षणाः परे ।
तदुपेक्ष्य भवन्ति साधवः प्रकृतार्थप्रतिपत्तितत्पराः ॥

प्रणति विमुख दशमुखोक्त माङ्गदशक मच्छिदः

इत्येवमर्थके श्रीमद्वेङ्कटनाथीयगाथाखण्डे प्रणतिपदेन किं सामान्येन यस्य कस्यापि प्रणाम इत्यर्थो विवक्षितः उत विशिष्य श्रीरामस्य प्रणाम इत्ययमर्थ इति संशयः । अत्र आद्यः पूर्वपक्षः । अन्त्यः सिद्धान्तः ।

I

1 इमं सिद्धान्तमुपपादयन्तो वयं 'न नमेयं तु कस्यचित्' इति सामान्येनाभिधानेऽपि 'रामस्य न नमेयम्' इति विशेषे पर्यवसानं वाच्यम् । अन्यथा इदमसङ्गतं स्यादित्यवाचाम ।

2 अत्र वदन्ति । 'कुरुष्व नरराजेन सन्धिं रामेण रावण' इति वदता माल्यवता प्रणामप्रस्तावे अकृतेऽपि 'न नमेयं तु कस्यचित्' इति प्रत्युत्तरयन् रावणः अर्थात् स्वकीयदृढाध्यवसायभूमानं प्रथयतीति प्रतिपत्तव्यम् । सर्वप्रकारसमुत्तुङ्गताशालिव्यक्तिविशेषविषयेऽपि प्रणतिविमुखतैव स्वस्य नैसर्गिकीति कथयतीति बालिशोऽपि ह्यनायासं प्रतिपद्येत' । इति । एवं वदन्त इमे बुद्ध्या अबुद्ध्या वा असङ्गतमेवेदं रावणवाक्यमिति स्थापयन्ति । माल्यवान् 'रामेण सन्धिं कुरु' इत्याह, न 'तं प्रणम' इति । रावणस्तु उक्तसन्धिविषये न किंचिदाह । सर्वथाऽप्रस्तुतमपि स्वस्य प्रणामं प्रतिषेधन्नाह न नमेयमिति । इति किं केन संगतम् । बालिश एवेदं प्रतिपद्येतेति वक्तव्यं न तु बालिशोऽपीति ।

3 दृप्तं मानिनं रावणं प्रति 'राघवं शरणं गच्छ' इति कथनमनुचित-

मिति मन्यमानो धीमान् माल्यवान् सन्धिं कुरुष्वेत्याह । सीताप्रत्यर्पणे-नायं सन्धिरिष्टः । 'अज्ञानान्मयाऽपहृता । इमां प्रतिगृहाण । मां क्षमस्व' इति विज्ञाप्य सीतां प्रत्यर्प्य सन्धिः कर्तव्यः । किमिदं नमनं न भवति । त्रैलोक्याधीश्वरत्वे स्थितस्य तस्य ऊर्जितं स्वसङ्कल्पं परित्यज्य तद्विरुद्धपर-सङ्कल्पानुवर्तनेन यो निकर्षो भवेत् तदपेक्षया किमधिकः कोऽपि निकर्षः साक्षात् कायिकेन प्रणामेन भवेत् ? किञ्च युद्धारम्भोपरतिहेतुभूतसम्प्रति-पत्तिरूपं सन्धिमुपदिशता माल्यवता व्यङ्ग्यमर्यादया तदौपयिकं शरणवर-णमपि उपदिष्टमेव । विष्णुं मन्यामहे राममिति वदतोऽस्यायमभिप्रायः प्रस्फुटः । न हि परस्परभीतयोः अत एव युद्धानारम्भे तुल्याभिलाषयो-र्द्वयोः सामान्यनृपयोरिव रामरावणयोः सन्धिं बुद्धौ कुर्वता तेन रामस्य विष्णुत्वमभिधातव्यम् । तदत्र शरणागत्यभिप्रायः अवश्यं वाच्यः । दुरप-ह्नवः । वाच्यवृत्त्या अप्रकाशितमपि इमं सारांशं गृह्णन् रावणः 'न नमेयं' इति स्पष्टमाहेति विदुषां सुगमम् ।

4 'तेन मैत्री भवतु ते' इति सीतावाक्येऽपि तुल्यमेतत् । व्याख्यान एवेदं स्पष्टम् । शरणागतवत्सल इति पूर्वत्र उत्तरत्र च सीतया यदुच्यते तदन्यथा नोपपद्यत इति च द्रष्टव्यम् *

5 न नमेयं तु रामस्येति यद्विशिष्य रावणो नाह तत् तन्नाम-कीर्तनजुगुप्सयेत्यवोचाम । इतः पूर्वं पश्चाच्च तन्नाम कीर्तयत्येव रावणः । अत्र परं का जुगुप्सेति पृच्छन्ति । अत्र वदामः । कृपणं रामं, राघवं निहतं, रामः सह वानरसेनया, इत्युत्कटां जुगुप्सां व्यञ्जयन्नेव तत्र तत्र तन्नाम गृह्णातीति स्पष्टम् । इह तु राजपत्नी न व्यभिचारिणीत्यादिनोक्त्या प्रतिषेधार्थमपि राघवं नमेयमिति स्वकीयनमनकर्मत्वं तस्य वक्तुमयुक्तमिति

---

* பெருமாளோடு துல்யசீலையான பிராட்டியும் ... ... தேந மைத்ரீ பவது தே ... என்று சரணாகதி சப்தவிஷயத்திலே 'மைத்ரீ' என்று அருளிச்செய்தாளிறே **इत्यभयप्रदानसार-श्रीसूक्तिरिह विभाव्या ।**

ज्ञापयन् परमां जुगुप्सां प्रकाशयतीति ज्ञेयम् । परेऽप्येवं वदन्ति । अथापि ईदृशमिदं नामग्रहणयुक्तस्थलान्तरवैषम्यमिह ग्रहीतुं न शक्नुवन्ति । एवमपि न नमेयं तु वैरिणं, दुर्मतिम् इत्यादि कुतो नाहेति चेत् नामवर्जनमात्रस्य फलमेवमभ्यधाम । वैरिणामित्यादिपरिहारेण कस्यचिदिति सामान्येनाभिधानस्य फलमनुपदं वक्ष्यते ।

6 अपि च कस्य प्रणाम इति जिज्ञासायां शिरश्छेदकर्तृत्वेन वाक्ये उपस्थितं भगवन्तं विहाय अनुपस्थितसर्वान्वयकल्पनं वाक्यन्यायविरुद्धमित्यवोचाम । सर्वेषु भगवतोऽप्यन्तर्भूतत्वात् कथं भगवतो हानमिति पृच्छन्ति । उपस्थितभगवत्त्वावच्छिन्नं विहाय अनुपस्थितार्थान्तरसाधारणसर्वत्वावच्छिन्नान्वयकल्पनं न्यायविरुद्धमित्यस्मदुक्तेरर्थं इत्यग्रहणमत्रापराध्यतीति स्पष्टम् ।

7 "लोकनाथ भगवन् क्षितिलोके मां निधेहि सुचिर'मित्यत्र कस्य लोकस्य नाथ इत्याकांक्षायां भगवच्छब्दसमभिव्याहारेण सर्वस्य लोकस्येति निर्णयात्, क्षितिलोके सुचिरं निधेहि, न तु सहसा लोकान्तरं गमयेति उत्तरत्र लोकान्तरनाथत्वस्याप्यनुगुणत्वाच्च न क्षितिलोकनाथत्वप्रतिपत्तिः । 'लोकनाथ दिलीपेमं कृपया परिपालय' इत्यत्र दिलीपपदसमभिव्याहारात् क्षितिलोकनाथेत्येवार्थः । 'संस्थाप्य पौर्णमासीं वैमृधमनु निर्वपति' इति विहिता वैमृधेष्टिः वाक्ये संस्थापनकर्मत्वेनान्विताया: पौर्णमास्या एवाङ्गं न तु प्रकरणोपस्थितदर्शपूर्णमासोभयाङ्गमिति पूर्वतन्त्रसिद्धोऽयं वाक्यन्यायः । नास्माभिः स्वयमुत्प्रेक्षितः मुखमस्तीति भाषितः । यत्रैवं वाक्येन विशेषो न लभ्येत तत्र सामान्यविषयत्वमित्ययं असङ्कोचन्यायः तत्र तत्रास्मदाचार्यैरभिहितः ।

8 'मनुष्येषु गन्धर्वेषु यक्षेषु देवेषु वा यं कमपि न नमेयमिति कथयन्नेव रावणः स्वमुत्कर्षं प्रख्यापितवान् भवति' इत्याहुः । काममेवम् । ततः किम् । किमत्र रावणोत्कर्षमात्रं तात्पर्यपर्यवसानभूमिः । न हि राव-

णप्रशंसाप्रकरणमिदम् । अपि तु माल्यवद्वचनप्रतिवचनप्रकरणम् । एतत्सङ्गतेऽर्थे पर्यवसानमवश्यं वाच्यम् । "मनुष्याद्रामादत्यन्तमुत्कृष्टो यः कश्चन भवेत् तमपि न नमेयम् (एष मे सहजो दोषः) किमुत रामम् ।" इत्ययमेव प्रकरणसङ्गतोऽर्थः । अत्र पर्यवसानमनभ्युपगच्छद्भिः कवेः आत्मनो वा उन्मत्तताभ्युपगन्तव्या भवेत् । तदिह सर्वथा रामस्य न नमेयमित्येव रावणवाक्यस्यार्थः । सामान्येनाभिधानं तु कैमुत्येन रामप्रणामवैमुख्यप्रत्यायनाय । 'स इमान् लोकान् युद्धे हत्वाऽपि तान् न निहन्ति ; न केवलं भीष्मादीनित्यर्थः' इत्यष्टादशाध्यायगीताभाष्यविवरणे 'कथं भीष्ममित्यादेः प्रश्नस्य कैमुत्येन प्रतिक्षेपार्थं सामान्येनोच्यत इत्यभिप्रायेणाह—न केवलमिति ।" इति श्रीमत्तात्पर्यचन्द्रिकायां यदन्वगृह्यत तदवधेयम् ।

9 'अपराधिजनशिक्षको भगवान्' इत्यत्र भगवदपराधिजन एव ग्राह्यः । 'देवीभूषणहेत्यादिजुष्टस्य भगवंस्तव' इत्यत्र न खलु यस्य यस्य या या देवी यद्यद्भूषणं तज्जुष्टस्येत्यर्थः । इयं व्यवस्था वैसूचन्यायमुपेक्ष्य कथं लभ्येत । यः पितरि अपराधी यो मातरि यो भागवतेषु य आचार्येषु तस्य सर्वस्य जनस्य शिक्षको भगवानिति विवक्षितमिति चेत् तर्हि अनिपुणो वक्तेति स्यात् । अविवक्षितार्थप्रतिपत्तिकरशब्दप्रयोगात् । सोऽपि सर्वोऽपराधः श्रुतिस्मृतिरूपभगवदाज्ञातिलङ्घनरूपत्वात् भगवदपचार एवेति वा समर्थनीयम् ।

10 'विघाटितविशरारुशरारुताटकाताटकेय' इति रघुवीरगद्येऽपि विशिष्य रामं प्रति शरारुत्वं वाक्यन्यायेन स्यादेव । तत्तु रामायणप्रसिद्धस्य ताटकाचरितस्य ताटकापदेनोपस्थितत्वात् परित्यज्यते ।

11 "वरेण लब्धं स्वबलं विचिन्त्य न ते नमेदेष पदं हि मूर्ध्ना ।
अतो व्यधा माधव किं नृसिंहो भवन् हिरण्यस्य वपुर्द्विभागम् ॥"

इति सरोयोगिना कृतः प्रश्नः । अत्र उत्तरम्—

यदपराधसहस्रमजस्रजं त्वयि शरण्य हिरण्य उपावहत् ।
वरद तेन चिरं त्वमाविक्रियो विकृतिमर्भकनिर्भजनादगाः ॥

इति श्रीकूरनाथो वदति । इति परिष्कृत्य उपरि लिखन्ति— 'एतदुक्तं भवति । भगवान् स्वविषयिणीं प्रणतिमकुर्वन्तमपि धूर्तं न निगृह्णाति । स्वभक्तद्रोहिणमेव दुर्जनं निगृह्णातीति' इति ।

अर्थं बुध्वा शब्दो रच्यत इति शास्त्रविदां भणितम् ।
अर्थमबुध्वापि भवेत् तद्रचनेत्यद्य पश्यामः ॥

धूर्त इति नूनं भगवदपराधी विवक्षितः । भक्तद्रोहिण उपरि निर्देशात् । एवं च यः साक्षाद् भगवति अपराध्नोति तस्य भगवन्निग्रहप्रसङ्ग एव नास्तीति पर्यवस्यति । कुतस्तर्हि शिशुपालनिग्रहः । कथं च 'तानहं द्विषतः क्रूरान् संसारेषु नराधमान् क्षिपामी'ति सङ्कल्पः । अथ स्वभक्तद्रोहिणमेव निगृह्णातीत्यत्र किं स्वविषयां प्रणतिं कुर्वन्तमपि निगृह्णातीत्यभिप्रायः । उत अकुर्वन्तमेवेति । आद्ये कथं काकपरित्राणम् । यदि वा रावणः स्वयमित्यादेशनं च । अन्त्ये स्वस्मै प्रणतं न निगृह्णाति अप्रणतं निगृह्णातीत्यभ्युपगतं भवति । तथा च स्वप्रणामविमुखं रावणमवधीदिति आबालगोपालं सर्वसम्प्रतिपन्नं सर्वहृदयङ्गमं अनुपपत्तिलवलेशवर्जितेऽर्थे खण्डनसम्भ्रमं कुर्वाणाः अत्यन्तं विदुषां शोचनीया इति सिद्धम् ।

'प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः' इति तदन्तरप्रतिपत्त्यधिकरणोक्तन्यायेन माल्यवद्रावणवचनयोः स्थितं समानविषयत्वं न गृह्णन्ति । उत्प्रेक्षाविशेषमुखेन भगवत्प्रणामरहितस्य देहस्य वरं विनाश इति प्रतिपादयन्त्या दिव्यसूरिसूक्तेः भगवतः स्वापराधादपि भक्तापराधो दुःसह इति प्रतिपादयन्त्याः श्रीकूरनाथसूक्तेश्च अविद्यमानमेव मिथः प्रश्नोत्तरभावं हठात् कल्पयन्ति । केन किं क्रियताम् ।

12 'मह्यं नमोस्तु कवये' इत्यत्र नमस्कारे कः कर्तेति जिज्ञासायां पूर्वश्लोकेष्विव वैमृधन्यायेन प्राप्तोऽस्मदर्थः उद्देश्यस्य कर्तृत्वायोगात् परित्यज्यते । एवमस्मदर्थभिन्नत्वे कर्तुर्निश्चिते सङ्कोचे प्रमाणाभावात् अस्मदर्थभिन्नः सर्वो ग्राह्य इति लभ्यत इति सुस्थितमत्र श्रीदेशिकव्याख्यानम् । 'प्रथमसुजनाय पुंसे मह्यमपि प्रथमदुर्जनाय नमः' इति सुभाषितनीवीश्लोके

अस्मदर्थमेव कर्तारं कृत्वा 'मह्यं पदार्थः अहङ्कारविशिष्टः स्वात्मा । तत्र स्वकर्तृकनमस्कारोद्देश्यत्वस्य विशेष्ये स्वात्मनि बाधात् विशेषणे अहङ्कारे तदन्वयः' इति श्रीपट्टप्पाताताचार्यस्वामिनः । अतो विवेकिनां न किञ्चित् सङ्कटमस्ति ।

II

कामपरवशतया स्त्रीष्वपि अकृतप्रणामो रावण इत्येतद्बाधित-मिति सीतां प्रति तत्प्रणतिप्रदर्शनेनादर्शयाम । अत्राहुः—

"महापातकबीजं तच्चरितं हन्त पापिनः ।
गुणत्वेन गृणन् विद्वान् मेधाविष्वग्रिमो ध्रुवम् ॥" इति ।
सीताप्रणामं दशकन्धरेण कृतं गुणं को नु गृणाति विद्वान् ।
निजोक्तिबाधे निभृतं गृहीते मौनं हि युक्तं न मुधोक्तिलौल्यम् ॥

III

'यं कमप्यप्रणतवानिति सामान्यतः कथनेन कस्य रसस्य कथं परिपोषः' इत्यप्राक्ष्म । "अनमनशीलत्वं हि रावणस्य स्वभावः । अयं तस्य मानो दीप्तः सन्निह रसः" इति समाधित्सन्ति । अस्माकं प्रश्नो निरूपणं चात्र 'प्रणति विमुख' इत्यादिश्रीदेशिकश्रीसूक्तिविषयम् । न नमेयं तु कस्य-चिदिति रामायणे रावणोक्तिविषयतां कृत्वा तु परे यथाशीलं असंगतं पिष्ट-पेषणं बहु कुर्वन्ति । तत्र यद्वक्तव्यं तदुक्तपूर्वम् ।

---

न परमनभिज्ञभावो दृढविपरीतग्रहत्वमपि यस्मात् ।
तस्मात् पञ्चषकृत्वः प्रतिविषयं व्याक्रियामपेक्षन्ते ॥
आक्षेपमुद्रामवहेलनं च सन्त्यज्य सौजन्यत एव पृष्ट्वा ।
शक्येऽधिगन्तुं सकलार्थबोधे कुमार्गमाश्रित्य कुतः पतन्ति ॥
विनश्यत्वासुरीसंपद् विकसत्वामरी भृशम् ।
कलिं निहत्य कुटिलं करुणा जृम्भतां हरेः ॥
अपरिचितनीतिमार्गैर्दुर्मार्गाश्रयणरूढसंस्कारैः ।
ग्रन्थान् कदर्थ्यमानान् लोकानिव रक्ष पुण्डरीकाक्ष ॥

---

# कुपथशब्दः ॥

(V. R. Srinivasa Tatacharya Siromani)

'पथस्सङ्ख्याव्ययादेः' इति वार्तिकं कौमुद्यां 'संख्याव्ययादेः परः कृतसमासान्तः पथशब्दः क्लीबमित्यर्थः। त्रयाणां पन्थास्त्रिपथम्। विरूपः पन्था विपथम्। कृतसमासान्तनिर्देशान्नेह सुपन्थाः अतिपन्थाः।' इति व्याख्यायत। संख्याव्ययादेरित्युक्तेस्सत्पथ इत्यादीनां नपुंसकत्वं न भवतीति, अन्यार्थमवश्याश्रयणीयेनानेन वार्तिकेन 'अपथं नपुंसकम्' इति सूत्रं गतार्थमिति च तत्र तत्राभण्यत। एतद्वार्तिकममरकोशे लिङ्गादिसंग्रहवर्गे आदिपदमपनीय 'पथस्संख्याव्ययात्पर' इत्यपठ्यत। एतद्विरोधेन पूर्वत्र भूमिवर्गे 'विपथः कदध्वाकापथस्समा' इत्यत्र पुंलिङ्गतया पाठो न युक्त इत्याशङ्क्य सुधायां "विरुद्धः पथः। 'ईषदर्थे च' इति कादेशः कुमार्गोऽपीषन्मार्गो भवति। कुत्सितः पथः। 'वाटः पथश्च मार्गश्च' इति त्रिकाण्डशेषाददन्तः पथशब्दः। पथशब्देन समासेन पुंस्त्वं निर्वाह्यम्। पथिन् शब्देन समासे 'कापथ्यक्षयोः' इति कादेशे 'पथस्संख्याव्ययादेः' इति क्लीबत्वं भवति। 'सत्पथस्तु सुपन्थास्स्यादध्वा विपथकापथौ' इति रभसोऽप्येवम्" इति पुंलिङ्गविपथकापथशब्दसमर्थनं कृत्वा 'कुत्सितार्थे कुशब्दस्य पथशब्देन समासे कुपथोऽपि' इति न्यगम्यत। कौस्तुभे 'अत्र (व्यध्व इत्याद्यमरकोशे) क्षीरस्वामिदुर्घटादयो विपथं कापथं इत्येव पाठः कर्तव्यो लिङ्गकारिकाद्यनुरोधादित्याहुः। एवं तु 'व्यध्वो विपथकापथौ' इति रभसकोशेऽपि पुंस्त्वं प्रामादिकमिति लभ्यते। वस्तुतस्तु पथे गतावित्यस्मात् पचाद्यचि पथते व्याप्नोतीति पथः। अकारान्तोऽयम्। तथा च त्रिकाण्डशेषः 'वाटः पथश्च मार्गस्स्यात्' इति। तेन समासे पुंस्त्वम्' इत्याद्यभ्यधीयत। माधवीयधातुवृत्तौ पत्लृधातुनिरूपणावसरे पूर्वोक्तममरकोशमुपक्षिप्य 'अस्त्यन्योऽकारान्तः पथिपर्यायः पथशब्दोऽर्धर्चादिपाठादुभयलिङ्गः तेन समासात्पुंस्त्वमिति विपथकापथौ पुंनपुंसकाविति चाहुः सुभूतिचन्द्रादय' इत्याद्युदित्वा 'यदुक्तं अस्त्यकारान्तः

पथशब्द इति तत् 'पथोविभाषा' इति सूत्रविरुद्धम्। सति हि तेनापथम् इति सिद्धयति ।नकारान्तेन वा अपन्था इति ।तत्किं सूत्रेण' इति यदकारान्तपथशब्दसत्त्वाभिधानदूषणमुदैर्यत तत्पथेधातुरूपो-पन्यासावसरे स्वकीयेन पथ इति रूपप्रदर्शनेन विरुद्धयते । न केव-लमस्य स्वग्रन्थविरोधः अपि तु दुरुद्धरं दूषणमपि कौस्तुभे कृतं लक्ष्यते । इत्थं हि तदीयो ग्रन्थः—'यत्तु अकारान्तस्याभ्युपगमे 'पथो विभाषा' इति सूत्रं व्यर्थं स्यादिति माधवेनोक्तं तत्रायं समाधिः । 'अपथं नपुंसकम्' इति सूत्रे कृतसमासान्तनिर्देशसाम-र्थ्यात् 'नञस्तत्पुरुषात्' इत्यस्य नित्यं बाधः प्राप्तः । न च सोऽप्य-कारान्तस्य निर्देशः । 'पथस्संख्याऽव्ययादेः' इत्यत्रापि तथात्वा-पत्तौ सत्यामपथो विपथः कापथ इत्याद्यसिद्धयापत्तेः । किं च 'रात्राह्नाहाः पुंसि' इति सूत्रात्परं 'अपथं नपुंसकम्' इति सूत्रे वार्त्तिकं पठ्यते। तथा च प्रक्रमानुरोधात् कृतसमासान्तनिर्देश एव न्याय्यः संप्रदायसिद्धश्च । अत एव 'अपथं नपुंसकम्' इति सूत्रस्य वार्तिकेन गतार्थतामाशङ्क्य सूत्रस्य प्राचत्वाददोष इति कैयटः। एवं स्थिते अपन्था इत्येतत्सिद्धये 'पथो विभाषा' इति सूत्रम् अमरस्य न पूर्वापरविरोध इत्यवधेयम्' इति । शब्दरत्न-शेखरयोः, लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्येति भाष्येण विपथ-कापथशब्दयोः पथिन् शब्दघटितयोः पुंस्त्वं साधितमिति कथंतु सत्यां गतौ न युज्यते। इत्थं च कौस्तुभे माधवाचार्योक्तदूषणपरि-हारेण अस्त्यकारान्तः पथशब्द इति भाविते, सुधायामीदृशपथ-शब्दमुपपाद्यामरकोशपुंलिङ्गपाठस्य कुपथशब्दस्य च समर्थनं च निराबाधमेव भवति । अतः 'तदुपदर्शितकुपथप्रवृत्तिनि' इति श्रुतप्रकाशिकाव्याख्यानभावप्रकाशिकायां 'कुत्सितः पथः कुपथः । पथशब्देन समासो न पथिन् शब्देन । तेन 'कापथ्यक्षयोः' इति न भवति । पठितश्च काव्य(काण्ड)शेषे 'पथः पन्थाश्च मार्गस्स्यात्' इति पथिन् शब्दसमानार्थः पथशब्दोऽकारान्त' इति यत् कुपथशब्दोपपादनमंतन्यत तदत्यन्तं समञ्जसं बहुग्रन्थसंमतं चेत्यवसेयम् । 'पथि च छन्दसि' इति सूत्रसिद्धकुपथशब्दस्य तत्र

प्रयोग इत्यभिधानं तु न घटते । यद्यपि कौस्तुभे 'वयस्यासु मूर्ध्नो मतुप्' इति सूत्रे 'अथ वा सामान्यापेक्षं ज्ञापकं छान्दसा अपि कचिद्भाषायां प्रयुञ्जत (ज्यन्त) इति। तेन, तुरासाहं पुरोधाय अनुपस्थितपरिपान्थिभिः पार्थिवैरित्यादिसिद्धम्' इत्याख्यानात् भाषायां क्वचित् छान्दसप्रयोगस्य साधुत्वं लभ्यते । तथापि क्वचिदिति वचनेन तत्र प्रयुक्तस्य तस्य साधुत्वमेवेति न दृढं वक्तुं पार्यते । पदमञ्जर्यादिषु ण्व्यन्ततुराषाडादिशब्दानां छान्दसानां भाषायां प्रयोगस्यासाधुत्वप्रतिपादनात् 'मघवा बहुळम्' इति सूत्रे शब्दरत्ने "यत्तु छान्दसा अपि क्वचिद्भाषायामित्याश्रित्य भाषायां प्रयोग इति तन्न । तद्ज्ञापकस्य 'वयस्यासु मूर्ध्नो मतुप्' इति सूत्रप्रयोगस्य छन्दोवत्सूत्राणि भवन्तीति भाष्यकारोक्त्याऽन्यथासिद्धत्वादिति तदाशय" इत्युक्तेः, शेखरादिग्रन्थानां शब्दरत्नानुसारित्वाच्च भाषायां छान्दसकुपथशब्दप्रयोगस्य साधुत्वं दुर्भणमेव । श्रुतप्रकाशिकाप्रयुक्तकुपथशब्दस्य साधुत्वं यदि विवक्षितं तदा भावप्रकाशिकाद्युक्तप्रक्रियैव शरणीकरणीया ।

---

षेक्स्पिअर् - कृतं

# यथाभिमतम् ॥

-◇❀◇-

(अनुवृत्तम्)

चार्लेस्— आः, न । यतः अस्य राज्ञः पुत्री, तस्याः पितृव्यजा, डोलातः प्रभृति सहाभिवर्धिता, तथा तस्यां स्निह्यति यथा तस्याः प्रवासे इयमप्यनुप्रवसेत् । तां विना अवस्थिता म्रियेत वा । सा राजगृहे वर्तते, तावत्प्रिया राज्ञः यावत् स्वपुत्री । न तथा मिथः स्निग्धे द्वे स्त्रियौ कदाचिद्भवतां यथा इमे द्वे ।

आलिवर्— क्व प्राक्तनो राजा वसेत् ?

चार्ल्स्— 'स पूर्वमेव आर्देन्-वने वर्तते ; बहवश्च उत्साहिनः पुरुषास्तेन सह' इति वदन्ति। तथा ते तत्र वसन्ति, यथा पुरा आङ्गलो राबिन् हुड्* । 'प्रतिदिनं बहवस्तरुणाः तमुपगच्छन्ति, नयन्ति च चिन्तालेशरहिताः कालं कृतयुग इव' इति च वदन्ति।

आलिवर्— कच्चित् श्वो भवान् नवीनस्य राज्ञः पुरस्तात् मल्लते ?

चार्ल्स्— आम्। मल्ले, आर्य। अपि च कञ्चन विषयं ते ज्ञापयितुमागमम्। इदमहं, आर्य, गूढं ज्ञापितोऽस्मि यत् ते कनीयान् भ्राता, आर्लण्डो, वहति प्रावण्यं छन्नरूपमागत्य मया युद्धकरणे। आर्य अहं श्वः मम गौरवाय मल्लयुद्धं करोमि। तत्र यो नाम कश्चिदङ्गभङ्गं विना गच्छेत् स साधुकारी भवेत्। त्वदनुजः केवलं बालः, सुकुमारः। भवत्प्रीत्या नेच्छामि तं परिभवितुम्। स चेदागच्छेत् मद्गौरवपरिपालनाय तस्य परिभवनमवश्यं मया कर्तव्यम्। तस्मात् भवत्स्नेहवशेन अत्रागमं विषयं ते निवेदयितुं— यदि वा तस्य सङ्कल्पात् तं वारयितुमर्हसि, अथवा सोढुमर्हसि तस्य तं परिभवं यं स स्वप्रवृत्त्या प्राप्स्यति, यश्च सर्वथा मेऽनभिमत इति।

आलिवर्— अस्य प्रेम्णः कृते अहं त्वयि कृतज्ञोऽस्मि। अत्र अत्यन्तमादृतः प्रतिविधास्यामीति त्वं ज्ञास्यसि। अस्मिन् विषये मम भ्रातुरुद्देशमहं अवगतवानस्मि। तं ततो निवर्तयितुं गूढं यतितवान्। स पुनः दृढाध्यवसायः। अहं ते वदामि, चार्ल्स्, अयं फ्रान्स्-देशस्य मूर्खतमो वटुः ; आशापूर्णः ; मनुष्ये ये शोभना अंशाः तेषामसहिष्णुः स्पर्धाशीलः ; स्वभ्रातरि मयि द्रोहचिन्तापरः शठः ; तस्मात् विवेकं ते उपयुङ्क्ष्व ; कण्ठं तस्य भिन्धि, तन्मे तथैव प्रियं यथा अङ्गुलि-

---

* बहोः कालात् पूर्वं एतन्नामा कश्चिद्वीरपुरुषः देशान्निर्वासितः बहुभिर्वयस्यैः सह अरण्यवासी बभूवेति अस्ति किञ्चिदैतिह्यम्।

भञ्जनम् * । अपि च तत्र त्वया अत्यन्तमवहितेन भाव्यम् । यदि त्वं अल्पं कमपि परिभवं तस्य करोषि, अथ वा यदि सः तवोपरि अतिस्फीतं यशो न लभते, तव विषदाने, केनचित् पापच्छद्मना वागुरापातने, यतेत । न च त्वां कदापि तावद् विमुञ्चेत् यावत् केनचित् कुटिलेनोपायेन तव जीवितमपहृतवान् भवति, यतः— शपथं ते करोमि, अपि च प्रायः साश्रुरिदं वदामि— न कश्चित् सम्प्रति जीवन् वर्तते तथा बालः तथा नृशंसश्च । आत्मुचितमेवाहं तं प्रति भाषे । स तु वस्तुतो यथाविधः तथा ते प्रविभज्य यदि वर्णयेयम्, मया लज्जितव्यं रोदितव्यं च । त्वं च पाण्डुरो भवेः विस्मितश्च ।

चार्लेस्— मनसा सन्तुष्यामि यदिह त्वामागतोऽस्मि । यदि स श्व आगच्छेत् तस्मै देयं दास्यामि । जातु स स्वस्था गच्छेच्चेत् ततः परं न कदाचिदहं पारितोषिकस्य कृते मल्लिष्ये । तस्मादत्रभवन्तं भगवान् पालयतु ।

आलिवर्— कुशलोद्यमो भूयाः, सौम्य चार्लेस् । (चार्लेस् निष्क्रान्तः) अद्य इमं द्यूतकारं प्रोत्साहयामि । मन्ये तस्यान्तमहं द्रक्ष्यामि ; ममात्मा हि, न जाने कुतः, न किमप्यन्यत् तथा द्वेष्टि यथा तम् । एवमपि, स गम्भीरः ; न जातु कलाशालायां विनीतः अथापि विद्वान् ; उदारमनोरथभरितः, मन्त्रमोहितैरिव सर्वैर्जनैः कामितः, अपि च नूनं तथाऽधिकं लोकस्य, विशिष्य मम बन्धूनां, ये तं सम्यक् जानन्ति, हृदये स्थितः, यथा अहमत्यन्तं गर्हितोऽस्मि, परन्तु नेदं चिरं तथा भवितुमर्हति । अयं मल्लः सर्वं शोधयिष्यति । न किञ्चिदवशिष्यते बालस्य तत्र प्रोत्साहनादन्यत् । तदर्थमद्य यावद्गच्छामि । (निष्क्रान्तः)

* 'अवयवस्य कस्यचिद्भङ्गे सति ममाप्रीतिर्भवेदिति त्वं शङ्कसे । न तथा मनागपि शङ्कनीयम् । मम प्रीतिरेव तत्र । न परं कस्यचिदवयवस्य भङ्गे प्रीतिः अपि तु साक्षात् कण्ठभङ्गेऽपि' इति भावः ।

प्रेक्षणकम् २. राजगृहस्य पुरस्तात् शाद्वलम् ।

(प्रविशतः रोसलिन्द् सिलिआ च)

सिलिआ— अहं त्वां प्रार्थये, रोसलिन्द्, प्रियस्वसः*, मुदिता भव ।

रोसलिन्द्— प्रिये सिलिआ, यावतोऽहमीश्वरा ततोऽधिकं मोदं दर्शयामि । ततोऽपि मुदिततरा भवानि इति नु अपेक्षसे । निष्कासितस्य पितुर्विस्मरणं मे उपदिश, इदं विना कस्यापि प्रमोदातिशयस्य अनुभवं मां अध्यापयितुं सर्वथा न शक्नुयाः ।

सिलिआ— अत्र अहं पश्यामि यावत्या मात्रया अहं त्वां कामये न तावत्या मात्रया त्वं मां कामयस इति । यदि मम पितृव्यः, तव निष्कासितः पिता, तव पितृव्यं, राजानं मम पितरं, निष्कासितवान् अभविष्यत्, तथा (यथा) त्वं मया सहैव वर्तेथाः, त्वत्पितरं मदीयत्वेन ग्रहीतुं मदीयं स्नेहं अहं अशिक्षयिष्यम् । तथा त्वं कुर्याः, यदि मां प्रति त्वत्स्नेहस्य तत्त्वं तथा समञ्जसं प्रणीतं भवति यथा त्वां प्रति मत्स्नेहस्य ।

रोसलिन्द्— साधु ; मदीयमैश्वर्यं विस्मरिष्यामि त्वदीये प्रमोदितुम् ।

सिलिआ—त्वं जानासि न मां विना मत्पितुरपत्यमस्ति । न च सम्भाव्यते भविष्यतीति । सत्यं तस्य मृतौ त्वं तस्य दायभाक् भविष्यसि ; यतः यत् सः त्वत्पितुः सकाशात् बलात्कारेण जग्राह तदहं ते प्रीत्या प्रत्यर्पयिष्यामि । मम गौरवेण (शपे) अहं प्रत्यर्पयिष्यामि । यदि इमं सङ्कल्पमहं भञ्जयेयं राक्षस्यहं परिणमेय । तस्मात्, अयि मम स्वादु-रोस्, मम प्रिय-रोस्, मुदिता भव ।

रोसलिन्द्—इतः प्रभृति भविष्यामि स्वसः, विनोदांश्च उत्प्रेक्षिष्ये । पश्यामि† किं त्वं मन्यसे मन्मथगोचरे पतनं प्रति ।

---

* इह पितृव्यपुत्री अभिप्रेता ।

† तवाभिप्रायं ज्ञातुमिच्छामीति भावः ।

सिलिआ—आः, प्रार्थये, पत, तेन विनोदनं कर्तुम्। न तु वस्तुत उत्सुका सती कञ्चन पुरुषं कामयस्व। न च विनोदनेऽपि ततोऽधिकं, यावता केवललज्जामात्रं प्रकाश्य कुशलेन गौरवेण च परावर्तेथाः।

रोसलिन्द्—किं तर्हि विनोदनमस्माकं भवतु।

सिलिआ—उपविश्य उपहसेव साध्वीं गृहिणीं नियतिं तस्याश्चक्रात्* येन इतः परं तस्या दानानि समं दत्तानि भवेयुः।

रोसलिन्द्—अस्ति मे कामः तथा कर्तुं शक्नुयाञ्चेति, यतस्तस्या दानानि नितान्तं अस्थानगतानि भवन्ति। उदारा इयमन्धा अयथायथमाचरति स्त्रीभ्यो दानेषु।†

सिलिआ—तत् सत्यं, यतः याः सा रम्याः करोति प्रायस्ताः न ऋजूः करोति, याश्च ऋजूः करोति ता अत्यन्तमदर्शनीयाः करोति।‡

रोसलिन्द्—न। अद्य नियतेर्विषयात् प्रकृतेर्विषयं गच्छसि; नियतिः लोकानां भोगदानेषु अधिकरोति, न प्रकृतिसिद्धेषु आकारेषु।§

---

* नियतिः (fortune) भाग्यम्। नियतिः अन्धा स्त्रीति, सा चक्रं किमपि सर्वदा परिवर्तयन्ती वर्तत इति, तस्मात् जनाः स्वस्वभाग्यं लभन्त इति च चिरन्तनी प्रथा। चक्रभ्रमणाद्विरम्य अस्मदुक्तिमाकर्ण्य इतःपरं सर्वत्र समानुग्रहा यथा स्यात् तथा आवां तां बोधयेवेति भावः।

† स्वदशां विचिन्त्य एवमियमाह। ‡ तस्याः स्वदशाविस्मरणमुद्दिश्य इयं अन्याः स्त्रियः प्रति किञ्चिदाह। § सूक्ष्मे विमर्शे प्रकृतिनियत्योर्नातीव भेदः। रूपसौन्दर्यासौन्दर्ये सौजन्यदौर्जन्ये अपि हि भाग्यायत्ते एव। तेन सिलिआ-वचने नास्त्यनुपपत्तिः। अथापि प्रकृते स्वविवक्षाविशदीकरणाय प्रकृतिनियत्योर्विवेकं रोसलिन्द् करोति।

# पाठशुद्धिः ॥

—○—

श्रीन्यायपरिशुद्धौ शब्दाध्याये

स्वरलिङ्गविशेषोत्थमन्त्वलोपे न संस्क्रिया ।
विशिष्टवाचकत्वं तु तदायत्तं न मन्महे ॥

इति कारिका पठ्यते । अत्र पूर्वार्धे अर्थो न ज्ञायते । अयमपपाठः । पाठान्तरेणावश्यं भवितव्यम् ।

'....लिङ्गस्वरार्थं मतुब्लोपस्मरणम् । न तु गुण्यभिधानशक्तिविरहिणां गुण्यभिधानार्थम् ।

इति श्रुतप्रकाशिकोक्तोऽर्थ इहाभिधीयत इति स्पष्टं प्रतीयते । अतः 'स्वरलिङ्गविशेषार्थं मतुब्लोपानुशासनम्' इति युक्तः पाठ इति प्रतीतिरासीत् । अथानेनैव पाठेन अप्पय्यदीक्षितकृतायां पूर्वोत्तरमीमांसावादनक्षत्रमालायां (११९. पु) उदाहृतमिमं श्लोकं पश्यन्तः निस्संशया अभूम ।

शिन्नामु श्रीनिवासपाट्टराचार्यः

---

## Intermediate Text

---

नागानन्दे (बालमनोरमामालान्तर्गते ; तृतीये सम्पादने) २३ पुटे सप्तदशश्लोकानन्तरं स्थिते ग्रन्थे रसवान् अंशो गळित इति अन्यमुद्रितपुस्तकावलोकनेन जानीमः । तत्रत्यः पाठ इह उद्ध्रियते ।—

नायिका—हञ्जे, न शक्नोम्येतस्यासन्ने स्थातुम् । तदेहि अन्यतो गच्छावः ।

विदूषकः—भो बिभेति खल्वेषा । मम पठितविद्यामिव मुहूर्तं धारयामि ।

नायकः—को दोषः ।

विदूषकः—भवति किमत्र युष्माकं .... ....

---

Registered No. M 2300.

Book XX ॥ श्रीः ॥ Nos. 9 & 10

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मानिसद्मानि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥



| | |
|---|---|
| पु. २०\| कलि ५०४८ सर्वजित | वृषभ—साधारण सं ५<br>मिथुन-शास्त्रानुबन्धः सं ५<br>आहत्य ,, १० |



# The UDYANA PATRIKA.

A SANSKRIT MONTHLY

May } June 1947

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription Re. One only.
Do. With Sanskrit Supplement Rs. 2—0—0

उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यमेकं रूप्यम् । सानुबन्धाया द्वे रूप्ये ।
२. कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।
३. ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।
४. वर्षमध्ये ग्राहकीभवतामपि कन्यासंचिकादिरेव पत्रिका प्रेष्येत ।
५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।
६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसंपादकाय प्रेषणीयाः।
७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः (संस्कृतेन आङ्गल्या द्राविडया वा न तु भाषान्तरेण) ।
८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor*, The Srinivasa Press,
Tiruvadi P. O. Tanjore Dt.

निर्वाहकसम्पादकः— *Mimamsarnava*, *Mimamsakesari*
*Panditaraja* **D. T. Tatacharya Siromani M. O. L.**,
Lecturer, Sri Venkateswara College,
TIRUPATI.

SANSKRIT VIDYA PEETHA, TIRUPATI. LIBRARY

## विषयाः ॥

शास्त्रानुबन्धः—
कुवलयानन्दः । [बुधरञ्जनीसमेतः] २०५—२१२

1 मेनका ।
2 सुभाषितनीवी ।
3 वैदिकम् (२) । [अनुवृत्तम्]
4 परिपन्थिशब्दः ।
5 यथाभिमतम् नाम नाटकम् ।
6 वात्सल्यचन्द्रिका ।
7 कुमारसम्भवः ।
8 पाठविमर्शः ।
9 रावणप्रणतिः (३) । [in the wrapper]

इमामालोचनां श्रुतवान् नैनामहम्मदः अतीव प्रजहर्ष । स्वस्य यादृशमपि क्लेशं विना सर्वान् विषयान् सुखं निर्वर्त्य स्वदुःखानि सर्वाणि परिहर्तुं, उचिते समये तस्य मान्त्रिकस्य आगमनं प्रति आनन्दमविन्दत्। स्वस्य नितान्तं गुणशालित्वात् बहूनामुपकर्तृत्वाच्च ईश्वरः आपदि तं मान्त्रिकं प्रेष्य उपकरोति स्मेति मेने। सपदि उत्थाय तत्र स्थितं काकदमादाय तथैव श्यामार्याय कञ्चन लेखं लिखित्वा मान्त्रिकाय अदात् । तं प्रतिगृहीतवान् मान्त्रिकः सपदि नेत्रे निमील्य ज्ञानदृष्ट्या किमप्यद्राक्षीत् । "सम्यक् । श्यामार्यः इदानीं तद्गृह एव वर्तते । इतोऽर्धनाड्या बहिर्गतो भवेत् । तावदहं तमुपेत्य कार्यमवसाययामि । अद्य रात्रौ अहं श्मशानं गत्वा जपं करिष्यामि । श्वः उषसि ते त्रयोऽपि भवद्गृहमागच्छेयुः । अहमपि तदा आगत्य श्यामार्येण दत्तं पात्रमानीय दद्यामि" इत्युक्त्वा मान्त्रिकः उत्थाय अनुमतिं लब्ध्वा बहिरगच्छत् । नैनामहम्मदः स्वकीयमदृष्टं स्मारं स्मारं उद्घूर्णमनाः पूरिताङ्गश्च भवन् उत्थाय गृहे सोल्लासं चरित्वा उपरि वर्तिष्यमाणानि संविधानानि प्रति सङ्कल्पान् कुर्वन् तद्दिनं कथमत्येष्यतीति सोत्सुकः कालं निनाय ।

तस्मिन्नेवंविधे सति, तस्माद् गृहाद् बहिरागतो मान्त्रिकः द्वित्रेभ्यो गृहेभ्यः परस्तात् गत्वा कस्यांचन वेद्यामुपविष्टः, स्वभस्त्रिकायां स्थितं काकदं कठिनीं चादाय, श्यामार्यः पेरुन्देवीत्याभ्यां द्वाभ्यां विलिख्य देयस्य लेखस्य काञ्चन मातृकां सज्जीकृत्य गृहीत्वा उत्थाय किञ्चिद्दूरं पद्भ्यामगच्छत् । तत्र स्थितं अश्वशकटमेकं दृष्ट्वा तिरुवल्लिक्केणि-गमनाय तं परिकल्प्य प्रययौ । शकटः द्वित्रासु घण्टासु 'तोलशिङ्गप्पेरुमाळ्-कोविल्'-वीथ्यां स्थितस्य श्यामार्यगृहस्य द्वारे तं विसृज्य अगच्छत् । मान्त्रिकः तद्गृहदेहल्यां तिष्ठन् 'शामि ! शामि !' इत्याजुहाव । अन्तः स्थिता श्यामार्यगृहिणी मीनाक्ष्यम्बा 'कस्तत्र' इति पृच्छन्ती देहलीमाजगाम ।

मान्त्रिकस्य मीनाक्ष्यम्बायाश्च वृत्तस्य सम्भाषणस्य विवरणात्पूर्वं श्यामार्यसम्बन्धिनां विषयाणां यावतामपि कथनमावश्यकं भवति । तिरुवारूर्-अत्र गणिकायाः कमलाया गृहे चोरैर्गृहीतः

रात्रौ अयःपथे बद्धः श्यामार्यः गोणीमूतस्यान्तः गोलकाकारो भूत्वा हठयोगं कुर्वन्नासीत् । कस्मिन् निमेषे धूमशकटः स्वोपरि आरोक्ष्यति, अत्यादरेण पोषितोऽभिवर्धितो रम्यो देहः कस्मिन् क्षणे चक्राणामाद्धारीभविष्यतीति चिन्तया रणरणकेन त्रासेन च मरणवेदनामनुभवन्नवर्तत । तन्मुखान्तः महतो वस्त्रकन्दुकस्य प्रविष्टतया कपोलकण्ठादि कदा नु विदीर्णं भविष्यतीत्यस्यां स्थितौ स्थितत्वात् तन्मुखस्था रक्तधमनयः आन्त्राणि च विण् विणिति तन्त्रीवादनमारभन्त । यथावत् प्रवेशनिर्गमनयोर्विरहात् श्वासो दुःस्थोऽभवत् उदरमुच्छूनं सत् विदीर्यमाणावस्थां प्राप । उत्सरन्ध्रेभ्यो यथाऽम्बु स्रवति तथा तस्य देहात् घर्माम्बुस्रवदासीत् । तावतां दुःखानां वृद्धिवत् (वट्टिः वड्डि) तद्बन्धनस्थाने पिपीलिकारन्ध्राण्यवर्तन्त । व्यूढसेनावद्गच्छन्त्याः स्थूलपिपीलिकापङ्क्तेः क्रमं श्यामार्यदेहो यस्माद्व्यघटयत् तस्मात् ताः सर्वाः तस्मै कुपिताः तद्देहमभिसलग्नाः दष्टुमारभन्त । रज्जुबन्धनैस्तद्देहे रक्तवहनस्य तत्रतत्र प्रतिरुद्धत्वात् हस्तपादादीनि दारुभूयमगच्छन् । तेन अनन्तकोटिसूचीविधनवेदना कृत्स्ने शरीरे उदभवत् । स तादृश्या वेदनायाः निशि द्वादशघण्टाभ्यः प्रभृति व्यथमान आसीत् । किं धूमशकट आगत्य आत्मानं व्यापादयेदिति मत्वा आरम्भे तत् प्रति बहु त्रस्तः श्यामार्यः गच्छन्त्यां गच्छन्त्यां नाड्यां स्वदेहे नरकवेदनामसहमानः झटिति स्वजीवितोत्क्रमणमेव साधु मेने । न खलु शीघ्रमागच्छति धूमशकट इति मत्वा मत्वा तदेव जपति । शकटगमनध्वनिः यन्त्र- (एञ्जिन्) पूत्कारशब्दश्च सविधे मुहुरश्रूयेताम् । अयं शकट आगमत् । अनन्तरे निमेषे स्वकीयानरकवेदना ध्वस्ता भविष्यतीति मन्यते । तस्मिन्नेव निमेषे तद्विपरीतं मन्यते । भूलोके सुखानि सर्वाण्यननुभूय अकालमृत्युं प्राप्स्यामीति मत्वा व्यसनी उत्कण्ठ्योत्कण्ठ्य रोदिति । यावन्मनस्समाधानं रोदितुं च तस्य न शक्यमासीत् । कश्चिदात्मनो मोचनं शक्यमिति चिन्तयन् सः लोठितुमैच्छत् । मूतस्य अयःपथे दृढपिनद्धत्वात् तद्देहो मनागपि न चचाल । 'अहो, अनया अनन्तया मरणवेदनया विसंस्थुलीभवनात् सद्यः प्राणत्याग

एव वरम्' इति मन्यते। शकट आगत्य स्वात्मानमभिसङ्घट्ट्य किं स्वदेहं शकलशश्छित्त्वा विक्षिपेदिति तपस्यति । असकृत् शकट-ध्वनिः समीपे उदभवदित्येतद्विना न तत्प्रार्थना निरवर्तत । यतः तिरुवारूर् चतुर्णां शकटानां समागमस्थानं, यतश्च भाण्डशकटा एकतोऽपरत्र नेतव्या अभवन् ततः सन्निहितात् स्थानकात् शकट-ध्वनिः श्रूयमाण एवावर्तत। तज्जातः तिरुवारूर् गच्छतः शकटस्य मार्ग एव स्वयं पिनद्ध इति स मेने । अपि तु तत्र चिरात् शकट-स्यानागमनेन निशायां द्वयोर्घण्टयोः परतः किं तस्मिन् मार्गे शकटो नागच्छतीत्येवं स समशेत । अथापि अस्ति प्रभाते पञ्चसु घण्टासु तिरुवारूर्अस्मात् तत्रां गच्छतीति स निश्चितमजानात् । तावत्पर्यन्तं हि स्वेन तथा नरकवेदनाऽनुभाविना भाव्यमिति मत्वा विदीर्णमनाः पर्युत्सुकस्तस्थौ । उषसि आगच्छति शकटे किन्तु जातु सामि खण्डितस्य सतः स्वस्य इतोऽप्यधिका चित्तव्यथा अनुभाव्या भवे-दिति सन्देहश्च तदा तदा तस्य मनस्युत्थाय तं व्यथयति स्म । पूर्वेद्युः प्रभातात्प्रभृति रात्रौ एकघण्टावधि स्वानुभूतानि सुखानि स्वाधि-ष्ठितां उन्नतां स्थितिं च स्मारं स्मारं स पर्यतप्यत । नवनीतोत्पत्ति-समये पात्रभङ्गवत् प्रासादं कृत्वा तत्र कमलामावास्य महोन्नत-दशायां स्थित्वा सुखानुभवः कार्य इति स्वस्मिन् मतिं कुर्वति चोरैः प्रादुर्भूय स्वाशायां मृत्प्रक्षेपं कृतं स्मृत्वा स्मृत्वा सः द्रवीबभूव । स्वस्य अदृष्टहीनतां स्वात्मानं च यावन्मनःप्रवृत्ति गर्हयामास । चोराणामागमनं कमलाप्रेरणयेति स नामन्यत। यदृच्छया आग-तास्ते इत्येवामन्यत। क्रूरास्ते चोराः यथा आत्मानं तथा कमलां तन्मातरं च निबध्य तदीयं सर्वस्वं हृतवन्तस्स्युरिति मत्वा ते प्रति अनुकम्पां विषादं चाभजत् । नेत्रयोरमेयं सौन्दर्यं मनसोऽमेयं प्रेम च बिभ्रतीं रतिदेवीकल्पां तां कन्यामणिं प्रति स्वमनोरथो न निर्वृत्त इति मत्वा स द्रवति स्म । प्रत्यूषे पञ्चघण्टाकालः कञ्चिदागच्छे-दिति आगतो हि भवेदिति च सः व्यतिकरण मतिं कुर्वन् असह्य-दुःखदायां दशायामवर्तत । प्रत्यूषे पञ्च घण्टाश्च अत्यगुः । शक-टस्तु न तदुपरि आरुरोह । किन्तु तद्गमनध्वनिः श्रूयमाण एव

अवर्तत । तस्मिन् दिने स्वादृष्टेन स्वाधिष्ठितः पन्थाः किं खिलीभूत इति तेन किं तत्र शकटो नागत इति च मेने । कालः उपर्युपरि अगच्छत् । सूर्यश्च प्राच्यां दिशि उदियाय । पर्वशः आतपश्च तस्य वपुषि तप्तुमारभत । दिवाकालसंरम्भः मनुष्याणां भाषणध्वनिश्च सर्वत उद्भूत् । मनुष्याणां गतागतं तत्सम्भाषणेन अज्ञायत । स सपदि आक्रोशनं कर्तुमयतत । न तत् फलति स्म । स मूतरूपेण बद्धः स्थित इतीदं यः कश्चिदवगच्छति सोऽपि नाभात् । तथैव दिवा दशघण्टाकालोऽभवत् । धूमशकटकर्मकरयोः ययोः कयोश्चन द्वयोर्मनुष्ययोः समीपे भाषणध्वनिरश्रूयत ।

"अरे कण्णुच्चामि ! कोन्वरे अयं मूतः" इति सविस्मयं वदन् एकः समीपमधावत् ।

कण्णु—आमरे कन्द ! अयं ह्यः नावर्तत रे । कस्य नु कर्मेदम् । न ज्ञायते रे ।

कन्दः—अधःपथे पिनद्धो वर्तते रे । (पादेन मूतं लोठयन्) अरे रे शववद् दृश्यते रे । वधो वृत्तोऽस्ति रे ! —

कण्णु—चलति रे । प्राणास्सन्ति । मूतं विस्रंसय रे, पश्येम ।

सपदि द्वावपि त्वरया तं मूतं समया उपगम्य बहु परिश्रम्य तद्बन्धनानि गोणीं चापानयताम् । तस्यान्तः ग्लानं म्लानं प्लुष्टं श्वासाक्षमं मीलितनेत्रं निश्चलं मूर्छितं स्थितमार्यं गोणीभस्त्रिकातः क्षिप्रमाकृष्य न्यवेशयताम् । तन्मुखस्थं वस्त्रकन्दुकमपानयताम् । भुग्नौ हस्तौ पादौ च सम्यक् प्रसृतौ अकुरुताम् । 'अरे यः कोऽपि महामनुष्यः अरे । जीवितमस्ति रे । धावितं गत्वा जलमाहर रे ।' इत्यवोचत् कण्णुच्चामि । तदाकर्णितवान् कन्दः प्रधावितं गत्वा एकस्मिन् पात्रे जलमाहरत् । तदमृतसञ्जीवनं सपदि आर्यस्य आस्ये व्यमुच्यत । मुखे लिप्तं च । अनन्तरनिमेषे हस्तपादस्य दारुभावः अपैतुमारभत । श्वासश्च ऋजुः प्रावर्तत । प्राप्तप्रज्ञः आर्यः ब्रह्मानन्दमनुभवन्निवाभूत् । तथापि मुखस्य देहस्य च आर्द्रतामाभूतत्वात् दशनिमेषं भाषितुं चलितुं चाक्षमः सः तथैव धरातले शिश्ये । ततः शनैः नेत्रे उन्मील्य सन्निहितौ प्राणप्रदौ महोपकारिणौ कृतज्ञ-

'वेश्यावेश्मसु शीधुगन्धललनावक्त्रासवामोदितैर्नीत्वा निर्भरमन्मथोत्सवरसैरुन्निद्रचन्द्राः क्षपाः । सर्वज्ञा इति दीक्षिता इति चिरप्राप्ताग्निहोत्रा इति ब्रह्मज्ञा इति तापसा इति दिवा धूर्तैर्जगद्वञ्च्यते ॥' इति ।

अन्योऽपि रावणपरोऽर्थः—

अनेकमुखश्चासौ पापात्मा चेति विग्रहात् दशमुखः पापस्वरूपश्चेत्यर्थः । छद्मना सीताहरणार्थकपटेन संदर्शितः प्रकाशितः आश्रमः यतिवेषः येन सः । कर्बुरप्रकृतिः राक्षसजातीयः । कर्बुरो यातुरक्षसी इत्यमरः । कश्चित् रावणः । कापेयकलहोचितः कपिसम्बन्धियुद्धार्ह इत्यर्थः ।

अन्योऽपि । दुर्वादिपरः—

अनेकमुखं विविधं यत् पापं तत्स्वरूपः । अनेन च पापं प्रज्ञान्नाशयतीत्युक्तः प्रज्ञाविरहस्सूचितः । भक्त्या शास्त्राद्वेद्मि जनार्दनमिति शास्त्रज्ञानोपयोगिभगवद्भक्तिविरहोऽप्यनेन क्रोडीकृतः । अत एव भाषितं श्रीभाष्ये—परमपुरुषवरणीयताहेतुगुणविशेषविरहिणामनादिपापवासनादूषिताशेषशेमुषीकाणामित्यादि । अतश्चैवमर्थानवबोधेऽपि पुस्तकमात्रं सर्वदाऽवलोकयति परवञ्चनार्थमित्याह (छद्मेति) छद्मना कपटेन सन्दर्शिताश्रमो यस्य सः ; सन्दर्शी पुस्तकावलोककः तस्य भावस्सन्दर्शिता, तया यः श्रमः, अर्थबोधं विना व्यर्थावलोकनात् श्रम एव फलमिति भावः । परवञ्चनाय सदा पुस्तकद्रष्टेत्यर्थः । कर्बुरप्रकृतिः कलुषितहृदयः यथावस्थितकार्थानवबोधात् सदा संशयकलुषितचित्तः, कश्चित् परमतदुर्वादी कापेयकलहोचितः, उच्चैरुद्धुष्य जेतव्यमित्यादिशास्त्र(?)विषयो भवति । तत्त्वनिर्णयार्थवादानवतारात् परवञ्चनार्थं जल्पारम्भे मध्यस्थस्याप्यवशीभावात् कपिकलहवत् दैवादेव निवारणमित्यर्थः । उच्यते हि—'हंहो सभ्यानसभ्यस्थपुटमुखपुटा दुर्जना निर्जयन्ती'ति । एवं, अतत्तदिति वा न तत्तदिति वा वृथोद्यत्कथाकनत्कथककत्थनक्रमविकल्पितप्रक्रमा । जगद्विपरिवर्तिनी जनपदेषु जोघुष्यते कुतर्कशतशर्करानिकरकर्कशा पद्धतिरिति च ।

अनेनैव मुखेन(?) यादवप्रकाशपरोऽपि—

अनेकमुखं यत्पापं, अचेतनगतः स्वरूपविकारश्चेतनगतः स्वभावविकारश्च, तत् आत्मनि परमात्मनि यस्य सः । षष्ठ्यर्थोऽभिमतत्वे, मीमांसकस्य वायुः प्रत्यक्ष इतिवत् । तथा च चिदचिद्रूपजगतस्तद्रूपब्रह्मपरिणामत्वोक्त्या जगद्गतदोषाणां परमात्मन्येव पर्यवसानमित्याशयः । यद्वा पापात्मा पापस्वरूप इत्यर्थः । अत एव पापीयान् पक्ष इति वेदार्थसंग्रहे विदूषितोऽयं पक्षः । अतश्च ब्रह्मण एव स्वरूपनाशादिपर्यवसानान्नास्तिकोऽप्ययमास्तिकपदमभिनयतीत्याह (छद्मेति) छद्मना वञ्चनाय सन्दर्शितः आश्रमः यतिवेषः त्रिदण्डधारणादिः येन सः । असमीक्षितदशापरित्यक्तब्रह्मसूत्रैः यादवप्रकाशैस्समीक्ष्य सञ्जातानुशयैरित्यादिशतदूषणीश्रीसूक्त्या प्रामाणिकवदुपवीतादिवारणभावनात् कपटो व्यज्यत इत्यर्थः । यद्वा सन्दर्शितः यतिधर्मसमुच्चये प्रपञ्चितः आश्रमः यत्याश्रमधर्मः येन सः । आश्रमस्वीकार इत्यादाविव आश्रमशब्दो यत्याश्रमपर इति भावः । वस्तुतो नास्तिकस्यैतादृशग्रन्थनिर्माणं कपटायैवेत्याशयः । कर्बुरप्रकृतिः आसुरप्रकृतिः, कर्बुरं हेम्न्यघे तोये दैत्ये ना शबळे त्रिष्विति रत्नमाला । नैवासुरप्रकृतयः प्रभवन्ति बोद्धुमित्युक्तप्रकृतिविशेषवत्त्वात् यथावस्थितार्थावबोधाक्षमतया श्रुतीनामपार्थकरणशील इत्यर्थः । कश्चित् यादवप्रकाशः । कापेयः कपिशब्दसम्बन्धी यः कलहः असङ्गतार्थकथनेन श्रीभाष्यकारमनःखेदजननरूपः तस्योचितः । 'तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी' इत्यत्र सूर्यपरस्य कपिशब्दस्य वानरपरत्वकथनादेव परित्यक्तः श्रीभाष्कारैरिति कथाप्राचाम् ।

एवं शनिग्रहपरोऽपि कश्चित्—

अनेकमुखेन बहुप्रकारेण पापात्मा पापफलप्रदायितास्वभावः, आत्मा जीवे धृतौ देहे स्वभावे परमात्मनीति वैजयन्ती । भूयसां न्यायेन पापफलदानमेवास्य स्वभाव इति निश्चितेऽपि कश्चित् छद्मना कपटेन सन्द-

र्शितः आश्रमः यस्याश्रमरूपमोक्षोपयोगिशुभफलप्रदानं येन तथोक्तः । उक्तं हि—नवमस्थाने सौरो यदि स्थितस्सर्वदर्शनविमुक्तः । नरनाथयोगजातो नृपोऽपि दीक्षान्वितो भवति । इति शनेरेकस्यैव सन्न्यासाश्रमदायित्वम् । अत्र नरनाथेत्यादिसन्दर्भवशात् राज्यभ्रंशादिकरण एव शनेः कुतूहलम् । न तु मोक्षप्रदाना[दा]वित्यर्थसूचनात् छद्मेत्युक्तम् । कर्बुरप्रकृतिः पापारम्भकः आसुरप्रकृतिर्वा हिंसैकस्वभावत्वात् । कश्चित् शनिः । कपेस्सूर्यस्य सम्बन्धी यः कलहः स्वपित्रा सूर्येण सह सदा शत्रुभावः । उक्तं हि—सौरेस्सूर्यसितावरी इति । कं जलं पिबतीति कपिस्सूर्यः । कपयोर्केभवानरा इति च रत्नमाला ।

अन्योऽपि मेघपरः—

अनेकमुखशब्देन सर्वतोमुखशब्दार्थो जलं विवक्षितं तत् पिबतीत्यनेकमुखपः, अनेकमुखेन समुद्रजलं पिबतीति वा तदर्थपरता, अत एव आपात्मा जलसङ्घातस्वरूपः अपां समूह आपं अनेकमुखपश्चासौ आपात्मा चेति कर्मधारयः । छद्मना मायया, सन्दर्शिताः आश्रमाः ऋष्याश्रमोद्यानादिविविधाकारा गन्धर्वनगरशब्दिताः येन तथोक्तः, गगन इव गन्धर्वनगरमित्युक्तत्वात्, शान्तमिदमाश्रमपदमिति निर्देशानुगुण्येन विविक्तशीतत्वादिगुणद्योतनात् गन्धर्वनगरेऽप्याश्रमसाधर्म्यमभिहितमिति ध्येयम् । कर्बुराणां जलानां प्रकृतिः स्रष्टा, जनिकर्तुः प्रकृतिरिति सूत्रप्रयोगात् प्रकृतिशब्दस्य उपादानपरता स्पष्टा । कश्चित् मेघः । कपीनां गजानां सम्बन्धी, कपयोर्केभवानरा इत्युक्तम् । यः कलहः स्वकर्मैर्घाकर्षणरूपः, तस्य उचितः । जलरुचीनां दिङ्नागानां मेघादिभ्रमेण शत्रूनां मेवाकर्षणवे(षे?)ण गादिकुतूहलमद्यावादिति भावः । उक्तं हि मेघसन्देशे, 'अद्रेश्शृङ्गं हरति पवनः किंस्विदित्युन्मुखीभिर्दृष्टोत्साहश्चकितचकितं मुग्धसिद्धाङ्गनाभिः । स्थानादस्मात् सरसनिचुळादुत्पतोदङ्मुखः खं दिङ्नागानां पथि परिहरन् स्थूलहस्तावलेपान् ॥' इति । यद्वा कापिस्सूर्यः तत्सम्बन्धिकलहश्च तदाच्छादनमेव, तदानीं सूर्यस्यापि कोपोदयस्य कविना वर्णितत्वात् । तथा हि तत्रैव, 'प्रालेयास्रं कमल-

वदनात् सोऽपि हर्तुं नलिन्याः प्रत्यावृत्तस्त्वयि करुधि स्यादनल्पाभ्यसूय' इति । वस्तुतस्सुर्याच्छादने व्रीहिशोषाद्युत्सुकानामाक्रोशोदयः प्रात्यक्षिक एवेति भावः ।

एवं वामनभूमिकापरोऽपि—

अनेकमुखं पातीत्यनेकमुखपः, देवान् मनुष्यांश्च साक्षात् तच्छत्रुनिग्रहाद्वा अदुष्टशत्रोः(?) वञ्चनादिमार्गेण निराकरणाद्वा रक्षति भगवानिति प्रसिद्धमेव । उच्यते हि दैत्यौदार्येन्द्रयाच्नाविहतिमपनयन् वामनोऽर्थी त्वमासीरिति । अपात्मा अपगतशरीरः, 'अशरीरं शरीरेषु' 'न भूतसङ्घसंस्थानो देहोऽस्य परमात्मन इत्याद्यु(?)क्तत्वात्, छद्मने कपटाय सन्दर्शितः आश्रमः ब्रह्मचर्यरूपो येन तथोक्तः । देवेन्द्रराज्यमपहरतोऽप्यत्युदारस्य वधादिनिग्रहासम्भवात् याच्नयैव तत्सम्पादयितव्यमिति कपटवटुवेषः परिगृहीत इत्यर्थः । त्वन्निर्मिता जठरगा च तव त्रिलोकी किं भिक्षणादियमृते भवता दुरापेति श्लोकेनापि कपटभावना व्यज्यत इति बोद्धव्यम् । कर्बुरप्रकृतिः विचित्रस्वभावः, अतिवामनस्य सद्य एव सर्वोन्नताकारावलम्बनात् । कश्चित् वामनः, कापेयकलहः अत्यल्पव्यापारजनितः स्वाश्रितस्य प्रह्लादस्यापि अतृप्तिजनकः बलिपक्षीयैः कलहः तस्योचितः भगवताप्येवं वञ्चनं कृतमिति सर्वत आक्रोशोदयादिति ।

एवं प्राकृताण्डकोशपरोऽपि—

अनेकमुखं यत्पापं पुण्यरूपं पापरूपं च येषां(?) पुण्यस्यापि बन्धकत्वाविशेषात्तथात्वं, तद्विशिष्टा आत्मानः जीवाः यस्मिन् ; पुण्यपापरूपकर्मविशिष्टजीवात्मगणनिबिड इत्यर्थः । छद्मना स्वमायया सन्दर्शितः अश्रमः श्रमविरहः येन सः, प्रत्यक्षदुःखात्मकपदार्थेष्वपि स्वमायया भोग्यताबुद्धिमुत्पाद्य सुखभ्रमजनक इत्यर्थः । स्वविषयायाश्च भोग्यबुद्धेर्जननीमिति ह्युक्तम् । कर्बुरप्रकृतिः तदण्डमभवद्धैममित्युक्तसुवर्णगोळस्वरूपः हिरण्यं हेम कर्बुरमित्यमरः । कश्चित् अण्डकोशः । कापेयः सूर्यसम्बन्धी यः कलहः तत्साहश्या-

॥ श्रीः ॥

# उद्यानपत्रिका ॥

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्ब्रह्मखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु. २०] कलि ५०४८ सर्वजित { वृषभ साधारण सं ९ / मिथुन शास्त्रानुबन्ध सं १०

## वैदिकम् (२) ॥

(अनुवृत्तम्)

### 5 उपसर्गार्थः ।

'स्तोमा उप मामुपागुः' इति मन्त्रे उपागुरित्यस्मिन् मध्योदात्ते सोपसर्गे आख्याते एकपदवत्पाठे सत्यपि वस्तुतः समासो नास्तीति, पदकारस्यापि नास्तीत्येवाभिप्राय इति चास्माकं दृढा प्रतिपत्तिः । अथ यदि कृत्वा चिन्तया वार्तिकानुशिष्टो वैकल्पिकः समास इह इष्येत तथापि तस्य उपत्यस्मात् परतः आङ्रूपमुपसर्गान्तरमस्तीत्येतद्ज्ञापकत्वं न सम्भवति । प्रथमोपसर्गस्वरेण द्वितीयोपसर्गमनुमाय तत एव समासस्य प्रत्येयत्वेन चरमप्रतीतस्यास्य पूर्वप्रतीतोपसर्गप्रत्यायकत्वायोगात् । तदिदं पूर्वस्मिन् लेखे प्रत्यपादयाम । यदि शङ्क्येत—एकपदतया पाठेन समासस्तावत् प्रथमत एव प्रतीयते । तत्र किं 'उप-अगुः' इति छेदः उत 'उप- आगुः' इति, इति संशये, 'यत्र समासः तत्रोपसर्गान्तरं भवति, यथा समाहन्तीत्यादौ । अत्र च समासोऽस्ति । तेनोपसर्गान्तरेणावश्यं भाव्यम् । अतः 'उप-आगुः' इत्येव भवितुमर्हती'ति निश्चीयते । का नामात्रानुपपत्तिरिति—अत्र-वदामः । समासे पदपाठमात्रस्य प्रमाणीकरणे आगुरित्युपसर्गासिद्धावपि तस्यैव प्रमाणीकर्तुं शक्यत्वात् अगुर्वा आगुर्वेति सन्देहस्यैव नास्त्यवकाश इति कोऽत्र

विचारः । अपि च प्रोक्षणीश्चासादयतीत्यत्र आसादयतीति समासोऽस्ति । न च द्वितीय उपसर्गः । अतो व्यभिचारी समासरूपो हेतुः । ननु योऽहि-प्राप्तिस्थलतुल्यमिदं स्थलम् । तेन एकोपसर्गस्यापि समासो भवति । नोप-सर्गान्तरापेक्षा । तादृशस्थलभिन्नस्थलवृत्तिरेव समासो हेतुरिति कुतो व्यभि-चार इति चेन्न । प्रकृतस्य उपागुरित्यस्य तादृशस्थलभिन्नस्थलत्वनिश्चायका-भावेन हेतोरसिद्धत्वात् । उपसर्गरूपपदकल्पनापेक्षया समश्वपर्णाश्चरन्ती-त्यत्रेव तिङन्ते उदात्तस्वरकल्पनस्य लघुत्वेन लाघवसहकृतेन समासरूपहेतुना तादृशस्थलत्वस्यैव निश्चयाच्चेति संक्षेपः । तदिह आङ्निश्चयः आगमनरूपा-र्थानुसन्धानाधीन एवेति स्थितः सिद्धान्तः ।

अत्र पृच्छन्ति—उपसर्गाणामर्थवत्त्वे को निर्बन्धः । अर्थशून्या एव ह्युपसर्गा बहुलं प्रयुज्यन्त इति । तदिदं काव्यपठनावसरे बालानां बुद्धि-क्लेशपरिहाराय उपसर्गार्थविशेषोपपादने अध्यापकैर्यदुदासीनैर्भूयते तस्य फलम् । अर्थवन्तं शब्दं निरर्थकतया कः सामान्योऽपि चेतनः प्रयुञ्जीत । कवयस्तु पदप्रयोगे अत्यन्तमवहिताः । तेषां प्रयोगेषु निरर्थकस्य अक्षर-स्यापि नास्ति सम्भावना । काव्येषु यदुक्तं किञ्चित् स्यात् ततः सहस्रगुण-गाम्भीर्यशालिनि वैदिकपदगुम्भे नतरां युज्यते तत्सम्भावना । तस्मादुत्सर्ग-सिद्धं पदानामर्थवत्त्वं परिपालनीयम् । अस्थाने तदनादरेण वादं कुर्वन्तः सर्वथा अनुपादेयवाचो भवन्ति । (अनुवर्ति)

# परिपन्थिशब्दः ॥

(V. R. Srinivasa Tatacharya Siromani)

'छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरि' इति पाणिनि-सूत्रम् । अस्य व्याख्यानं महाभाष्ये न दृश्यते । अर्वाचीनग्रन्थेषु परिपन्थिन् परिपरिन् एतौ शब्दौ छन्दसि निपात्येते पर्यवस्थातरि वाच्ये पर्यवस्थातृशब्दात् शत्रुपर्यायात् स्वार्थे इनिप्रत्यये अवस्थातृ-शब्दस्य पन्थ इत्यादेशे अकारलोपे परिपन्थिन् शब्दः । तस्मा-

तथाविधात् तत्रैव इनिप्रत्यये अवस्थातृशब्दस्य पर इत्यादेशे अकारलोपे परिपरिन् शब्दः । मात्वा परिपरीविदत् । मात्वा परिपन्थिनो विदन् इत्येवंरीत्या श्रौतोदाहरणसंवलितं विवरणं लक्ष्यते । अत्र छन्दसीत्युपादानं मनसिकृत्य 'भाषायां परिपन्थिशब्दस्यासाधुः प्रयोग' इति पदमञ्जर्यां 'लोके तु परिपन्थिशब्दो न न्याय्यः' इति कौमुद्यां चाभ्यधीयत । यतिराजसप्ततिमालतीमाधवमुद्राराक्षसादिषु 'पन्थानं परिपन्थिनां निजदृशा रुन्धानमिन्धानया', 'नाभविष्यमहं तत्र यदि तत्परिपन्थिनी', 'पर्वतेश्वर एवार्थपरिपन्थी महानरातिः' इत्यादिवाक्यानि पठ्यन्ते । अत्र दृश्यमानः परिपन्थिशब्दः शिष्टप्रयुक्तत्वादसाधुरिति वक्तुं न युज्यते । अतो येन केनापि प्रकारेण तस्य साधुत्वं वक्तव्यम् । 'वयस्यासु मूर्ध्नो मतुप्' इति सूत्रकौस्तुभे "अथवा सामान्यापेक्षं ज्ञापकं छान्दसा अपि क्वचिद्भाषायां प्रयुञ्(ज्यन्त)त इति । तेन, 'तुरासाहं पुरोधाय' अनुपस्थितपरिपन्थिभिः पार्थिवैः' इत्यादिसिद्धम्" इत्यकथ्यत । 'इत्थं लौकिकशब्दानां दिङ्मात्रमिह दर्शितम् । विस्तरस्तु यथाशास्त्रं दर्शितः शब्दकौस्तुभे ॥' 'इत्थं वैदिकशब्दानां दिङ्मात्रमिह दर्शितम्' इति कौमुदीसार्धश्लोकेन, कौमुदीसंक्षिप्ता । अनया शब्दतत्त्वज्ञानं विशदं न भवेत् । विस्तृतेन शास्त्रानुसारिणा कौस्तुभेन तु विशदं भवेत् । अतः कौस्तुभोक्तरीत्यैव शब्दतत्त्वनिर्णयः कर्तव्य इति सूचनात् लोके तु परिपन्थिशब्दो न न्याय्य इति भाषायां तस्यासाधुत्वं प्रतिपादयन्ती कौमुदी तत्र पूर्वपक्षग्रन्थ एवेत्यभ्युपगन्तव्यं भवति । छान्दसाध्वर्युपदघटितस्य 'अध्वर्युक्रतुरनपुंसकम्' इति सूत्रस्य करणात् छान्दसा अपि क्वचिद्भाषायां प्रयुज्यन्त इत्यर्थो ज्ञाप्यते । तेन छान्दसानामपि भाषायां प्रयुज्यमानानां परिपन्थ्यादिशब्दानां साधुत्वं भवतीत्यपरेषां वादः । तथा च कौस्तुभाद्युक्तरीत्या भाषायां प्रयुज्यमानस्य छान्दसपरिपन्थिशब्दस्य साधुत्वं वक्तव्यम् । परन्त्वयं साधुत्वसमर्थनोपायो न समञ्जसः । क्वचित् प्रयुज्यन्त इति ज्ञाप्यते । तत्र क्वचिदित्यस्य स्थलविशेष इत्यर्थो वर्णनीयः । यद्यनुपस्थितपरिपन्थिभिः पार्थिवैः इति वाक्यं तदर्थत्वेनोपादीयते तदा मालतीमाधवादेरग्रहणात् तत्र प्रयुज्यमानस्य तस्य साधुत्वं न स्यात् । यदि तस्य ग्रहणं तदा तदन्यस्थले प्रयुज्यमानस्य तस्य साधुत्वं न स्यादिति चालनीन्यायेन सर्वेष्वपि स्थलेषु

प्रयुक्तस्य तस्यासाधुत्वप्रसङ्गः। अतः क्वचित् प्रयुज्यन्त इति ज्ञापनमन्ततो विफलं भाति।

शब्दरत्नशेखरादिषु छान्दसानां भाषायामसाधुत्वमस्याप्यत। तत्र शब्दरत्ने मघवन्शब्दप्रकरणे "यत्तु छान्दसा अपि क्वचिद्भाषायामित्याश्रित्य भाषायां प्रयोग इति तन्न। तद्ज्ञापकस्य 'वयस्यासु मूर्ध्नो मतुप्' इति सूत्रप्रयोगस्य छन्दोवत्सूत्राणि भवन्तीति भाष्यकारेष्ट्याऽन्यथासिद्धत्वादिति तदाशय" इति ग्रन्थेन सूत्रे छान्दसवयस्याशब्दप्रयोगः छन्दोवदिति भाष्यकारेष्ट्योपपन्न एवेति तस्य छान्दसा अपीत्याद्यर्थज्ञापकत्वं प्राचीनोक्तं न सम्भवतीत्यदूष्यत। 'अध्वर्युक्रतुरनपुंसकम्' इति सूत्रस्थस्याध्वर्युशब्दस्यापि छान्दसा अपीत्याद्यर्थज्ञापकत्वं न सम्भवतीति नव्यवैयाकरणानामाशयः। तथा हि—अध्वर्युशब्दो द्विविधः। तत्रैकः अध्वरमिच्छतीत्यर्थे अध्वरशब्दात् क्यजन्तात् 'क्याच्छन्दसि' इति सूत्रेणोप्रत्यये कव्यध्वरेति सूत्रेण रेफाकारलोपे निष्पद्यते। शब्दोऽयं छान्दसः। अन्यस्तु अध्वरं यातीत्यर्थे अध्वरोपपदकात् याधातोः मृगय्वादेराकृतिगणत्वेन कुप्रत्यये अकारादिलोपे च सति निष्पद्यते। अयं तु लोकवेदसाधारणः। विषयोऽयं सुबोधिन्यादिषु स्पष्टः। ब्रह्मवर्गे सुधायां तु छान्दसाध्वर्युशब्दं पूर्वोक्तरीत्योपपाद्य लोकवेदसाधारणे नामलिङ्गानुशासने छन्दोमात्रगोचराध्वर्युशब्दस्य पठनमनुचितं विचिन्त्य 'यद्वा न ध्वरति ध्वृ कौटिल्ये—विच् अध्वरं याति यौति वा मितद्र्वादित्वाड्डुः' इति व्युत्पत्त्यन्तरं प्रादर्श्यत। अध्वर्युक्रतुरित्यत्र तस्य छान्दसस्यैव ग्रहणे मानाभावेन लोकवेदसाधारणस्य तस्य ग्रहणसम्भवेन छान्दसा अपीत्याद्यर्थज्ञापकत्वं न सम्भवतीति। छान्दसानां भाषायामुक्तरीत्या साधुत्वस्यालाभात् परिपन्थिशब्दप्रयोगस्य भाषायां साधुत्वसिद्धये व्युत्पत्त्यन्तरमेव स्वीकार्यम्। व्युत्पत्त्यन्तरं तु सुधायां "परि दोषाख्याने पन्थयितुं शीलः। पथि गतौ चुरादिः। णिनिः। परिशब्दश्च प्रकृते 'दोषाख्याने निरसने पूजाव्याप्त्योश्च भूषणे' (इति मेदिनी)" इति प्रादर्श्यत। शब्दकल्पद्रुमेऽपि सुधोक्तप्रक्रियैवाश्रीयत। मद्रनगरराजकीयकलाशाला (Presidency College) संस्कृतपण्डितैर्वैयाकरणैः नरसिंहाचार्यैः प्रणीते शिष्टप्रयोगसंग्रहे "परिपन्थिन् शब्दः 'छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरि' इति निपातनात् लोके न न्याय्य

RASHTRIYA SANSKRIT VIDYA PEETHA TIRUPATI 49

इति भट्टोजिना उक्तोऽपि लोकेऽपि प्रयोक्तव्य एव । अमरेण 'अभियाति परारातिः प्रत्यर्थिपरिपन्थिनः ।' इति शत्रुपर्याये पठितत्वात्, वैजयन्त्यां 'दुर्हृद्द्वेष्यभियातिश्च परिपन्थी विरोध्यपि ।' इति च पठितत्वात्, टीकासुधायाममरव्याख्यायां पथि इति धातोश्चौरादिकात् 'सुप्यजातौ' इति णिनिप्रत्ययेन साधयितुं शक्यत्वादित्युक्तत्वाच्च लोकेऽपि साधुरेव" इति प्रत्यपाद्यत । छान्दसानां शब्दानां सति सम्भवे प्रक्रियान्तरेण भाषायां साधुत्वं महाभाष्ये गिरिशशब्दस्य छान्दसस्य व्युत्पत्त्यन्तरप्रदर्शनेन सूच्यते । इत्थं हि महाभाष्यम्— 'गिरौ डश्छन्दसि । गिरावुपपदे छन्दसि डो वक्तव्यः । गिरौ शेते गिरिशः । तद्धितो वा—तद्धितो वा पुनरेष भविष्यति गिरौ शेते गिरिरस्यास्तीति गिरिश' इति । अत्र-प्रदीपे 'छन्दसीति वचनाद्भाषायां गिरिशशब्दस्यासाधुत्वमाहुः ।' इत्यन्यमतेनासाधुत्वप्रतिपादनात् असाधुत्वं कैयटस्यानभिमतमिति प्रतीयते । (अनुवर्ती)

---

[N. B. पूर्वसञ्चिकोपपादितकुपथशब्दलेखनिरूपिताकारान्तपथ-शब्दसद्भावे प्रमाणत्वेन "त्वचि त्वचः किरोऽपि स्यात्किरौ प्रोक्तः पथः पथि' इति द्विरूपकोशेषु विश्वः" इति प्रौढमनोरमादिकमप्यनुसन्धानमर्हति ।]

षेक्स्पिअर् - कृतं

# यथाभिमतम् ॥

(अनुवृत्तम्)

सिलिआ—न ? यां काञ्चन रमणीयां सृष्टिं प्रकृतिः कृतवती, सा किं नियत्या अग्नौ न पतेत् ? यद्यपि प्रकृतिर्बुद्धिमस्माकं दत्तवती नियतेरुपहासाय, तथापि किं न नियतिः इमं जडं प्रेषितवती वादस्य विच्छेदाय ?*

---

* रमणीयां सृष्टिम् सुन्दरीं स्त्रियमित्यर्थः । इमं जडम् । अनेन पात्रान्तरप्रवेशः सूचितः । प्रकृतिनियत्योः कार्यभेदं रोसालिन्द् प्रतिपादयामास । तदाक्षिपति सिलिआ । प्रकृतिः रूपसौन्दर्यं करोति । तदेव सौन्दर्यं नियतिरग्नौ निपात्य नाशयति । एवं प्रकृतिनियत्योरेकविषयत्वं भवत्येव । न विषयभेदनियम इति । इदमभ्युपगम्य रोसालिन्द् उपरि वदति ।

ततः प्रविशति निकषोपलः* ।

रोसलिन्द्—सत्यम् ; नियतिः अतिकठिना प्रकृतेः§ भवति, यदा सा प्रकृतेः प्रकृतिजं¶ प्रकृतेः प्रज्ञाया† विच्छेदकं करोति ।

सिलिआ—जातु इदमपि न नियतेः कर्म ; अपि तु प्रकृतेः, या प्रकृतिसिद्धामस्मद्बुद्धिं ईदृशीनां देवतानां विमर्शने अतिमन्दां पश्यन्ती इमं प्रकृतिजं अस्माकं तेजनोपलार्थे प्रेषितवती, यतः सर्वदा जडानां मान्द्यं बुद्धिमतां तेजनोपलो भवति ।|| कथमद्य बुद्धिमन् ; क नु त्वं अटसि ?

निकषोपलः—स्वामिनि, त्वया त्वत्पितरं प्रति आगन्तव्यम् ।

सिलिआ—किं त्वं दूतीकृतोऽसि ?

निकषोपलः—न ; मम गौरवेण (शपे) । किं तु त्वदर्थमागन्तुमादिष्टोऽसि ।

रोसलिन्द्—कुत्र त्वं तं शपथमध्यैष्ठाः, जड ?+

निकषोपलः—कस्माच्चन वीरात् यः स्वगौरवेण शपथमकरोत् अपूपाः समीचीना इति, तथा स्वगौरवेण शपथमकरोत् तेमनं असमीचीनमिति ।

---

* Touchstone. § षष्ठीविभक्तिः । ¶ प्रकृत्या यथा सृष्टः तथैव वर्तमानम् । यथाजातम् ; अविवेकिनम् ; जडमित्यर्थः ।

† प्रकृत्या दत्ताया अस्मद्बुद्धेरित्यर्थः ।

|| इदमपीति । न परं सौन्दर्यबुद्धिमत्त्वादिप्रदानं अपि तु इदानीन्तनं जडप्रेषणमपीति । तेजनं तीक्ष्णीकरणम् । जडव्यवहारदुरवस्थादर्शनेन बुद्धिमन्तो बुद्धिमत्तरा भवन्तीति भावः ।

$ जडोचितं व्याहतं भाषणम् । दूत इति समाख्यां प्रतिषेधति तदर्थं तु अनुमन्यते । वस्तुतस्तु आपातमात्रेण अयं व्याघातः । उपरि उपपाद्यमानरीत्या आत्मनो दूतीकृतत्वमयमङ्गीकरोत्येव ।

+ विदूषकोऽयं एवं सम्बोध्यमानो न कुप्यति । व्याहतभाषिणो जडस्यास्य किं गौरवम् । तथा शपथं कर्तुं कथमयं वेदेति रोसालिन्द् शङ्कते ।

सम्प्रति अहमातिष्ठे अपूपा असमीचीनाः तेमनं समीचीनम् । अथापि स वीरो न हीनप्रतिज्ञ इति ।

सिलिआ—कथमिदं साधयसि, महति ते प्रज्ञाराशौ ?*

रोसलिन्द्—हन्त भोः प्रज्ञां ते अपावृणु ।

निकषोपलः—उभे युवामद्य उत्तिष्ठतम् । युष्मच्चिबुकं परामृशतम् । अथ युष्मद्दाढिभ्यां शपथं कुरुतम् अहं धूर्त इति ।

सिलिआ—अस्मद्दाढिभ्यां (शपावहे) यद्यस्माकं ते स्तः त्वं धूर्तः ।

निकषोपलः—मम धूर्ततया (शपे) यदि मे सा अस्ति अहं (धूर्तः) अभविष्यम् । अपि तु यदि यन्नास्ति तेन शपध्वे न यूयं मिथ्याप्रतिज्ञा भवथ । स वीरश्च तद्गौरवेण शपथं कुर्वन् न भवति (मिथ्याप्रतिज्ञः), यतस्तस्य न किमपि (गौरवं) अस्ति । अथवा, यद्यासीत् तत् सः तेषां अपूपानां तेमनस्य च दर्शनात् चिरात्पूर्वमेव अपजानीते स्म ।§

सिलिआ—प्रार्थये ; कः सः यं बुद्धौ करोषि ?†

निकषः—कश्चित् यस्मिन् वृद्धः फ्रेडेरिक्, तव पिता, स्निह्यति ।

सिलिआ— मत्पितुःस्नेहः पर्याप्तः (हेतुः) तं पर्याप्तं मानयितुम् ।‡

---

* अनन्तासु प्रज्ञासु कतमया इदं साधयसीति भावः ।

§ अपजानीते मिथ्याप्रतिज्ञाकरणेन अपहारयति । चिरात्पूर्वमेव नष्टसर्वगौरव इति यावत् । यथाऽयं वीरो न मिथ्याप्रतिज्ञः तथा आत्मनो दूरीकरणाभावं प्रतिजानानोऽहमपीति निकषेण व्यञ्जितं भवति ।

† सन्निहितमेव कञ्चन वीरमभिप्रेत्य निकषा भाषत इति जानती सिलिआ एवं पृच्छति ।

‡ तस्य गौरवमस्ति न वा । मत्पितृस्नेहपात्रत्वमात्रेण सोऽतीव माननीय इति भावः । विपरीतोऽत्राभिप्रायः । मत्पितृस्नेहविषयतयैव तस्य परमायोग्यत्वं ज्ञातुं शक्यमिति । परन्तु निकषहितार्थिनी उपदिशति नैवं वाचं विसृजेति ।

नेतःपरं तं प्रति भाषस्व । परिवादहेतोः एषु दिनेषु कचित् कशाघातं लभेथाः ।

निकषः—अतितरां शोच्यम्, यत् बुद्धिमन्तो यदनिपुणं कुर्वन्ति तत् जडैर्निपुणं न वक्तव्यम् ।

सिलिआ—अहं प्रत्येमि परमार्थं त्वं भाषसे ; यतः जडानां या अल्पा धीः तस्यां जोषम्भावं गमितायां धीमतां यदल्पं जाड्यं तन्महान्तमुल्लासं करोति । अयं आर्यो लि बा आगच्छति । (अनुवर्ति)

# वात्सल्यचन्द्रिका ॥

(T. E. Viraraghavacharya Siromani)

भगवतस्सौलभ्योपयुक्तान् गुणान् विवृण्वन्तो व्यासार्याः 'वात्सल्यं दोषानादरहेतुः स्नेहः' इत्यन्तरधिकरणटीकायां निरणैषुः । अथ च परत्वं प्रस्तुत्य मनुष्यादिसाजात्येऽपि तत्प्रयुक्तशोकमोहाद्यस्पृष्टत्वमभिप्रयन्नाह—निरस्तेति । जीवानुप्रवेशेषु शोकादयो जीवांशगताः साक्षादवतारेष्वभिनयमात्रम् इति च व्याचख्युः । दोषेऽपि गुणत्वबुद्धिस्तु मोहः भ्रान्तिज्ञानं भगवन्तं न स्पृशति केवलमभिनयमात्रमिति नासौ वस्तुसद्वात्सल्यं भवितुमर्हति । अत एव शरणागतिगद्यव्याख्याने, 'वात्सल्य दोषेऽपि गुणत्वबुद्धिरित्यत्र 'दोषेऽपीत्यपिशब्दोऽतिवादलिङ्गं प्रायोजितैरेव' । क्वचित् 'अपिशब्दस्यातिवादलिङ्गत्वं' 'चण्डालमपि वृत्तस्थं तं देवा ब्राह्मणं विदुः' इत्यादिप्रयोगेषु प्रसिद्धम् इति श्रीपाञ्चरात्ररक्षायां प्रथमाधिकारे शतदूषण्यामलेपकमतभङ्गे चोक्तमिहानुसन्धेयम् ।

न केवलं भगवत एव संसारिणामपि नास्त्येव दोषे गुणत्वबुद्धिः । 'यथार्थं सर्वविज्ञानमिति वेदाविदां मतम्' इति हि श्रीभाष्यम् । इयं पुनरतस्मिंस्तद्बुद्धिरूपान्यथाख्यातिः । 'अनिष्टहेतुर्दोषः इष्टहेतुर्गुणः' इति चण्ड-

मारुते महाचार्याः । अनिष्टहेताविष्टहेतुत्वं विषयीकुर्वतीयं अन्यथाख्याति-रेवेत्यत्र परेऽपि न विप्रतिपद्यन्ते । यतस्तद्ग्रन्थेषु भूयस्सुशिलालिपिरियं दृश्यते । सेयमन्यथाख्यातिश्शशशृङ्गायमाणा स्वात्मसत्तामेव न विन्दति, कुतः पुनरस्याश्चेतनान्तरेषु वा संसर्गः । कुतस्तरां हेयप्रत्यनीके कल्याणैक-ताने सर्वज्ञे । अत एव खलु स्नेह एव वात्सल्यमित्याहुरन्तराधिकरणश्रुत-प्रकाशिकायाम् । 'वत्सांसाभ्यां कामबले' इति च पाणिनिरसूत्रयत् । वत्सशब्दात् कामवदर्थेन लच्प्रत्ययेन वत्सलशब्दो निष्पाद्यमानः स्नेह एव वात्सल्यमिति सिद्धान्तमनुगृह्णाति । अस्थानभयशङ्कित्वं, दोषानवभासः, दोषेऽपि गुणबुद्धिरित्यादयः श्रुतप्रकाशिकाचार्यैराद्याधिकरणटीकान्ते स्नेह-विपाककोटावेव गण्यन्ते । न तु तेऽपि वात्सल्यमिति । न ह्याधानफल-मग्निसिद्धिरिति साप्याधानशब्दस्यार्थः नवाध्ययनफलमक्षरराशिग्रहणमिति तदप्यध्ययनशब्दवाच्यम् । अनेकार्थकल्पनायोगात्, इति च श्रीभाष्यम् । अतः सम्बन्धविशेषान्वितेषु प्रीतिः स्नेहः स एव वात्सल्यशब्दवाच्यः । दोषे-ऽपि गुणत्वबुद्धिस्तु गगनारविन्दसोदरी न केवलं न वात्सल्यपदार्थः । अपि तु वात्सल्यविपाककोटावपि गणनां नार्हति ।

आद्याधिकरणटीकान्ते वात्सल्यविपाकगणनावसरे 'दोषेऽपि गुण-बुद्धिः' इत्येव पठ्यते । न तु 'गुणत्वबुद्धिः' इति । दोषे सत्यपि तमु-पेक्ष्य गुणांशग्रहणं वात्सल्यविपाकः इत्याशयः । 'गुणदोषौ बुधो गृह्णन्नि-न्दुक्ष्वेळाविवेश्वरः । शिरसा श्लाघते पूर्वं परं कण्ठे नियच्छति ॥' इत्युक्तो विवेकस्य विपाको वात्सल्यापीति लोकसिद्धमेतत् । स इह प्रेमपाक प्रस्तावे ऽवश्यं आदिशब्देन वा सङ्ग्राह्यो भवति । स चेत् स्वशब्देनैव सिद्ध्यति नात्र विप्रतिपत्तुमर्हान्ति परेऽपि । अद्रितुल्यदोषकरणेऽपि दोषांशमनादृत्य गुणांशं गृह्णाति हरिः इति सरोमुनिगाथा । दोषं गुणत्वेन गृह्णाति इति तु विवरणं श्रीकृष्णपादीयव्याख्यानविरुद्धममूलञ्च । अर्थश्च दुस्स्थ इत्य-दर्शयाम । अतो दोषानादरस्सम्प्रदायसूक्तिनिर्दिष्ट एवेह प्रेमपाकगणन-

प्रकरणे विवक्षित इति युक्तं स्वीकर्तुम् । दोषानादरहेतुः स्नेह इत्यन्तराधिकरणटीका । स्नेहविपाको दोषानादर इतीहोच्यते । 'रामानुजं लक्ष्मणपूर्वजं च' इतिवत् स्थलद्वये निर्दिश्यते । हेतुभूतस्नेहप्रधानोऽसौ । तत्फलप्रधानोऽयमिति निर्देशयोर्भेदः । दोषस्यानवभासः भानेऽप्युपेक्ष्य गुणांशग्रहणम् इति द्वितीयतृतीययोः प्रेमविपाकयोर्भेदः । अयं च विपाकक्रमोऽस्मास्वेव । सर्वज्ञे तु तृतीय एव विपाकः । दोषानवभासस्तु द्वितीयः नास्ति इति भगवद्गुणदर्पणे श्रीभट्टार्या अनुजगृहुः । यदाहुः—

अविज्ञाता— 'उच्यमानोऽपि परुषं नोत्तरं प्रतिपद्यते' इति न्यायात् प्रपन्नापराधापरिगणनं गुण एव । अथ च सर्वज्ञः सहस्रांशुः— ननु आश्रितापराधव्यतिरिक्तसर्वज्ञ इति विप्रतिषिद्धम् । न तदपराधेष्वतात्पर्येणापेक्षा ह्यज्ञानं विवक्षिता । उपेक्षते हि तेषां दोषं 'दोषो यद्यपि तस्य स्यात्' इति ।

दोषेऽपि गुणत्वबुद्धिस्स्वलब्धजीविता कथञ्चित् प्रेमपाके तृतीय आरोपिताऽपि नेशं स्प्रक्ष्यति । अभिनयमात्रम् । इत्यन्तराधिकरणटीकायां व्यक्तम् । तदेतदखिलम्—

लोकप्रसिद्धः प्रेमापि हरौ नेत्युच्यते यदि ।
असीमातिशयासङ्ख्यकल्याणगुणताऽस्य का ॥

[ वात्सल्यार्थप्रकाशिका ]

इति स्वैरं क्षिपन्त एवैते हन्त भट्टार्यभक्तबृन्दान्तः प्रवेष्टुमिच्छन्ति ।

अपि च दोषेष्वपि गुणत्वबुद्धौ सुहृद एव तान् सङ्क्रामयेत् । सुहृदस्साधुकृत्यामिति हि श्रुतिः । न तु द्विषतः । दोषत्वेन गृहीतस्य हि तत्सङ्क्रमः । अत उद्वेलस्स्यादीशः । इत्थं हान्याद्यधिकरणैर्भूयोभिर्बाध्यते सपक्षः ।

शरणागतिगद्यव्याख्यानमपि तात्पर्यवृत्त्या श्रीभाष्यटीकावचनाभ्यामेककण्ठं सदुपपद्यत एव । तदिह विव्रियते । 'वात्सल्यं दोषेऽपि गुणत्व-

बुद्धिः' इति— गुणत्वं उपेक्ष्यत्वं तद्बुद्धिः तद्विषयिणी, तद्धेतुर्वा स्नेहविशेष-रूपाबुद्धिर्वात्सल्यम् इत्यर्थः । अयमेव व्यासार्याशयः । यथार्थख्यातिवादे हि दोषेऽपि गुणत्वबुद्धिः अन्यथाख्यातिरूपा स्वरूपत एव न स्वीक्रियते । तद्धेतुत्वेन तार्किकैरभिमतः भेदाग्रहसचिवः अधिष्ठानग्रहादिरेव 'भ्रान्ति-र्मिथ्यामतिर्भ्रमः' इति व्यवह्रियते । तदुक्तं अधिकरणसारावल्याम्—अख्या-तिस्त्वन्यथाधीरित्युपक्रम्य, 'भ्रान्तौ सर्वत्र तत्तत्परमतकथकैराहताः पक्षभेदाः प्रायोबुद्धिर्यथार्थाश्रुतिविदभिमता क्वापिभेदाग्रहादिः' इति । 'अविज्ञाता' इति नामनि अयमेव विवक्षितः । आश्रितदोषादर्शी इति हि तदर्थः । तच्च अदर्शनं उपेक्षारूपमेव न त्वज्ञानम्, सर्वज्ञे तदसम्भवात् । इति श्री-भट्टार्यैरेव निर्व्यूढम् । अतश्च दोषेऽपि गुणत्वबुद्धिः स्वतो सती दोषत्वा-ग्रहणे तद्धेतुतया परैरभिमतेप्यपर्यवस्यन्ती भट्टार्योक्तदिशा दोषोपेक्षण एव विश्राम्यति । अतः उपेक्ष्यत्वबुद्धिरेवोपचारात् गुणत्वबुद्धिरुच्यते । संसा-रिणां हि गुणदोषानुभयभेदात् त्रिविधानि कर्माणि भवन्ति । आद्यं यागादि । परहिंसादिकं द्वितीयम् । श्वासप्रश्वासादिकं तृतीयम् । क्रमेण चैतानि अनुग्रहनिग्रहोपेक्षाविषयाः । आश्रितविषये तु, तदीयं दोषं दोषत्वेन यथावत्पश्यन्नपि परमपुरुषः निग्रहसङ्कल्पविषयं न करोति । अपित्वनुभ-यात्मककर्मवत् उपेक्षते । इदमेव 'अविज्ञाते'त्युक्तमज्ञानम् । इति भट्टार्याः । 'तदधिगमाधिकरणे' 'प्र रब्धेतरपूर्वपापमखिल प्रामादिकञ्चोत्तरम्, इत्याचार्य-श्रीसूक्तौ च दोषोपेक्षणमुक्तमिहानुसन्धेयम् । तथा च निग्रहसङ्कल्पाविषयत्वं प्रवृत्तिनिमित्तीकृत्योपचर्यतेऽयं गुणशब्दः । यथा ईश्वरे नैयायिकैः कैश्चित् 'आनन्दम्' इति श्रुतः आनन्दोऽपि दुःखाभावे उपचर्यते, इत्युच्यते । 'दुःखभावं प्रवृत्तिनिमित्तीकृत्य ईश्वरे आनन्दशब्दः प्रयुज्यते, इति हि तदर्थः तद्वत् । इत्थं तात्पर्यवृत्त्योपपद्यमानमपीदं व्याख्यानं यथाश्रुते दोषे मुख्यगुण-त्वप्रतिपत्तिं जनयतीति 'अतिवाद' इत्युक्तं श्रीदेशिकचरणैः । अतिवादलिङ्गं 'अपि' शब्दं प्रयुञ्जानाः व्यासार्या एवातिवादत्वं गमयन्ति । इत्यवोचाम ।

ये पुनः 'परैरुदाहृते भक्तिसारभट्टनाथयोर्दिव्यसूक्ती, ते प्रामादिकदोषमात्रपरे' इति श्रीकृष्णपादैरेव व्याख्याते। तदधिगमाधिकरणश्रीभाष्ये तेषामेवाश्लेषः उक्तः । अन्येषां तु क्षामणेन नाशः एवं रूपम् ; अतः उपेक्ष्यत्वमेव गुणत्वं विवक्षितम् । विशिष्य च प्रपञ्चमातापित्रोस्संवादरूपा भट्टनाथसूक्तिः गुणत्वोत्प्रेक्षणपरा न दोषे वस्तुतो गुणत्वं मुख्यं व्यवस्थापयति । तदिदं एतत्पत्राधिपैस्तातात्चार्यस्वामिभिः स्वकीये भाषाप्रबन्धे सविस्तरं प्रासाध्यत । अस्माभिश्च तद्भूमिकायाम् । अभयप्रदानसारे 'दोषो यद्यपि तस्य स्यात्' इत्यस्य निर्वाहोऽपि अन्यथैव गृह्यते परैः। तत्वं पुनः—'विभीषणः त्याज्यः दुष्टत्वात्' इति सुग्रीवादयः । 'सः ग्राह्यः अदुष्टत्वात्' इति वायुसूनुः। हेतुद्वयमपि स्वस्वसाध्यसाधने नालं ; अनाश्रितत्वं आश्रितत्वं च क्रमेणोपाधी ग्राह्यः श्रितत्वात् इति तु रामसिद्धान्तः इत्याचार्याः ।

---

# कुमारसम्भवः ॥

(U. Venkatakrishna Rao M. A., Lecturer in Sanskrit, Christian College, Tambaram.)

कुमारसंभव इति काव्यनामधेयस्य अर्थं प्रतिपादयन्तः सर्वे एतावत्पर्यन्तं कुमारस्य संभवः जन्म इत्येव वर्णयन्ति । परं तु पुराणकल्पेषु स्मृतिग्रन्थेषु प्रतिपादितं संभवशब्दार्थमेव मनसि आकलय्य इदं काव्यं कविकुलगुरुः रचयामास इति ब्रह्मभूयंगताः मम विद्यागुरवः विद्यावाचस्पतिमहामहोपाध्यायबिरुदाङ्किताः कुप्पुस्वामिशास्त्रिवर्याः प्रतिपादयामासुः । कुमारार्थः संभवः इत्यत्र विग्रहवाक्यम् । संभवश्च दंपत्योः समागमः इति पुराणस्मृतिग्रन्थाभिमतः अर्थः इत्येवं काव्यस्य नाम्नः सार्थक्यं ते निरवोचन् । अस्मिन्नर्थेऽभ्युपगम्यमाने सर्वथा सामञ्जस्यमेव पर्यवस्यति । अष्टमसर्गे खलु समागमं वर्णयित्वा विरराम कविसार्वभौमः । अन्यथा संभवशब्दस्य लक्ष-

णया संभवफले पर्यवसानं क्लिष्टकल्पनया प्रकल्प्य तारकवधपर्यन्तां कथामेव निबबन्ध इति वक्तव्यं भवति । शैलीपर्यालोचनेऽपि अष्टमसर्गादनन्तरं कालिदासीयं न कथञ्चिदपि भवितुमर्हति इति निश्शङ्कं वक्तुं पार्यते ।

अत्र च आध्यात्मिकदृष्ट्या विमर्शनीयाः विषयाः बहवः वर्तन्ते । कालिदासस्य काव्यं दण्डिनः कृतिरिव आदर्शकाव्यं, काव्यादर्शश्च एकदैव भवतीति स्फुटं वक्तुं शक्यते । अत्र च आदर्शकविः विमर्शकानामपि मार्गदर्शी भवितुमिच्छति । शब्दार्थौ कविः कथं प्रयुञ्जीत, शब्दार्थयोः सर्वात्मना संपृक्तिः परस्पराहित्वं च कथं सम्पादयेत्, इत्यादिकं मार्गं उपदिशतीवात्र । अर्थमीश्वरत्वेन प्रकल्प्य वाचं च पार्वतीस्थाने निर्दिशामः । एतयोः सम्यक् सङ्कलनं संपृक्तिर्वा विवाह इति लौकिकदृष्ट्या पर्यवस्यति । हिमालयश्च कविस्थानीयः स्यात् । अथ वा कश्चन सुप्रसिद्धः वैयाकरणः पाणिनिसदृशः भवेत् । सप्तर्षयश्च अर्थप्रतिपादिकाभिः अभिधालक्षणव्यञ्जनावृत्तिभिः सदृशाः स्युः । आहत्य सिद्धं भवति । सुसमाहितः कविः कथमपि काव्यनिर्माणे सर्वात्मना एकाग्रमनाः भूत्वा प्रवृत्तः भवेत् इति ; इमं विषयं सुललितेन व्यञ्जनामार्गेण अस्मान् बोधयतीव सार्वभौमकविः । इममेवार्थं श्लोकरूपेण संगृह्णीमः—

संपृक्तिपूतयोरेव वाचोऽर्थस्य शिवात्मनोः ।
लोकस्यैव प्रसादार्थं प्रतीतिः स्कन्दसंज्ञिता ॥ इति ।

ईश्वरस्य पार्वत्या साकं विवाहः लोकसंग्रहार्थमेवासीत् । तद्वत् वाचोऽर्थेन संपृक्तिः, तद्द्वारा लोकयात्रा सुगमा भवतीति व्यञ्जनावृत्त्या बोधयति कविवरेण्यः ।

रीत्यन्तरेण विमृश्यमाने सर्वशास्त्रसंमतः पन्थाः कविवरेण विशदीक्रियते । पार्वतीं पुरुषकारत्वेन प्रकल्प्य ईश्वरं तत्फलदायकं दैवमिति निर्दिशामः । अत्र च साग्रहा अन्योन्याकांक्षा उभयोरपि दरीदृश्यते । तथैव च कविनैके गीयते–'परस्परतपस्संपत्फलायितपरस्परौ । प्रपञ्चमातापितरौ प्राञ्चौ जायापती स्तुमः' इति । "रतिमुभयप्रार्थना कुरुते" इति

खलु कालिदाससूक्तिः। अत्र 'उभय' इति पदं दैवपुरुषकारौ इत्येव व्याख्यातव्यमिति भाति। 'दैवे पुरुषकारे च कर्मसिद्धिर्व्यवस्थिता' इति याज्ञवल्क्योक्तिमुदाहरन्निव दृश्यते। धर्मविरुद्धः कामः न शास्त्रसंमतः इति सूचयन् कामं ईश्वरः दहति। परं तु स एव पुरुषकारः धर्माविरुद्धः तदा सर्वात्मना अनुग्रहमर्हत्येवेति सूचयितुं ईश्वरः स्वयमेव तस्याः समीपं आगत्य अनुरक्तं हृदयमाविष्करोति। स्वार्थानपेक्षः निरभिमानः सर्वदा भक्तानुग्रहायैव बद्धदीक्षः इति सर्वशास्त्रसिद्धान्तसारभूतः अर्थः व्यङ्ग्य-सरण्या अतिपेशलं समर्थ्यते। परस्परं विवदमाना अपि वेदान्ताचार्याः अस्मिन् विषये सर्वथा ऐकमत्यं प्रकटयन्ति। शङ्करभगवत्पादाः सौन्दर्य-लहर्यादिस्तोत्रग्रन्थेषु भक्तकार्पण्यस्य परां काष्ठां आविष्कुर्वन्ति। श्रीरामा-नुजमतानुयायिनां प्रपत्तिमार्गावलम्बनतया अयं मार्गः सुतरां अभ्युपेय एव। 'न्यस्य त्वत्पादमूले वरद निजभरं निर्भरो निर्भयोऽस्मि' इति खलु वेदान्त-देशिकानां परमसिद्धान्तः। इत्थमेव पूर्णप्रज्ञाचार्याः अपि द्वादशस्तोत्रे 'कुरु भुङ्क्ष्व च कर्म निजं नियतं हरिपादविनम्रधिया सतत'मिति गायन्ति।

अस्माकं काव्येष्वपि अयमेव पन्थाः आद्रियते सर्वत्र। भासः स्वीयप्रतिज्ञास्वप्ननाटकयोः दैवानुगृहीतस्य पुरुषकारस्यैव अभ्युदयावहत्वं प्रतिपादयामास। व्यतिरेकमुखेन कर्णभारोरुभङ्गादिनाटकेषु दैवे पुरुषकारस्य धिक्कारं प्रदर्श्य कर्मसिद्धिः इत्थं सर्वथा न प्रतिपद्यते इति बोधयति। कवि-कुलगुरुरपि इममेव मार्गं अवलंब्य प्रकत्थनप्रगल्भं कामं आदावेव भस्मी-करोति। धर्मपत्नीपुत्रीपरित्यागिनं आततायिनं विश्वामित्रं विश्वस्य अमित्र इत्येव गणयित्वा तस्य नामग्रहणादपि जुगुप्सते। विश्वामित्राः विश्वमित्र-पदवीं कथं प्राप्नुयुः इति पर्यनुयुज्यमाने कण्ववाल्मीक्यादिमहर्षीणां मार्ग-मनुसृत्य इति मुक्तकण्ठं बोधयति कविसार्वभौमः। इत्थं च विश्वमित्रता यदि स्यात् तर्हि दैवानुग्रहोऽपि अस्माभिः लब्धुं शक्यः, इत्येव कालिदा-सीयानां ग्रन्थानां परमः आशयः।

---

# पाठविमर्शः ॥

श्रीपराशरभट्टार्यविरचिते श्रीसहस्रनामभाष्ये—

'तत्र साधुष्वपराधाननन्तानपि दृष्ट्वा न दण्डयति, क्षमते चेति नैतावदेव । किन्तु तेषां—अविज्ञाता । 'उच्यमानोऽपि पुरुषं नोत्तरं प्रतिपद्यते' इतिवत् । प्रपन्नापराधापरिगणनं गुण एव । अतो हि तात-पादाः 'सर्वज्ञतामेवमुपालभामहे त्वं ह्यज्ञ एवाश्रितदोषजोषणः । इति' ।

अथ च सर्वज्ञः—सहस्रांशुः । सहस्रं अपरिमिताः अंशवः ज्ञानानि अस्येति । ननु आश्रितापराधव्यतिरिक्तसर्वज्ञ इति विप्रतिषिद्धम् । न । तदपराधेष्वतात्पर्येणोपेक्षा ह्यज्ञानं विवक्षिता । उपेक्षते हि तेषां दोषम् । 'दोषो यद्यपि तस्य स्यात्' इति 'अपि चेत् सुदुराचारो भजते माम-नन्यभाक्' इति ।

इत्येवं अविज्ञाता सहस्रांशुः इति नामद्वयस्य विवरणं दृश्यते । अनेन 'सर्वज्ञो भगवान् आश्रितानां दोषान् जानात्येव अथापि तान् न गणयति । उपेक्षते । इयमुपेक्षैव दोषादर्शनं दोषाविज्ञानमित्युपचर्यते' इति भट्टार्याणां भावः प्रस्फुटः ।

प्रपन्नकृतपापानां किञ्चिदप्याविचारणात् ।
अविज्ञातेति कथितो बुधैस्तद्गुणपारगैः ॥

इति निरुक्तिश्लोकश्चानुसन्धेयः । एवं दोषाविज्ञानवचनस्यैव औपचारिकत्वे दोषेषु गुणत्वबुद्धिवचनस्य सुतरामौपचारिकत्वं कैमुत्येन सिद्धमित्यास्तामे-तत् । यत्पुनरत्र 'ननु आश्रितापराधव्यतिरिक्तसर्वज्ञ इति विप्रतिषिद्धम्' इति शङ्काग्रन्थपठनं तत्रास्माकं विमर्शो भवति । परस्परविरुद्धमुभयमुपादाय हि विप्रतिषेधशङ्का कार्या । न चात्रोभयमुपात्तम् । नापि विरोधो दृश्यते । सर्वज्ञत्वस्य आश्रितदोषव्यतिरिक्तसर्वविषयत्वेन व्यवस्थापनात् । तदत्र

नन्वाश्रितापराधाविज्ञाता सर्वज्ञ इति विप्रतिषिद्धम् । इत्येवंविधेन केनचित् पाठान्तरेण भाव्यम् । अर्धव्युत्पन्नैस्तु कैश्चित् धाष्ट्र्यादन्यथा कृतमिति ।

---

राजा कश्चित् । तस्य विदूषकः कश्चित् । समयोचितैः व्यवहारैः राज्ञश्चित्तं भृशं रञ्जयन् विदूषकः तस्यात्यन्तं प्रियः सुहृद् बभूव । अयं कदाचित् राजानमेत्योवाच— 'राजन्, नाहमनया सामान्यस्थित्या तृप्तोऽस्मि । युद्धवीरो भवितुमिच्छामि । सैनिकं मां करोतु भवान्' इति । हसन् राजा 'अतिक्लेशावहः स उद्योगः । मा तत्र अभिलाषं कार्षीः' इति बहुधा अनुनयमकरोत् । विदूषकस्तु सैनिकीभवने तीव्राभिलाषः दृढसंकल्पः अभवत् । अन्ते राजा तस्य प्रार्थनां पूरयामास ।

युद्धवीरोचितं कवचखड्गादिबिभ्रतो विदूषकस्य कदाचित् रात्रौ वारक्रमेण नगरद्वाररक्षा कर्तव्या बभूव । आरम्भे कतिपयान् क्षणान् चङ्क्रमणेन गमयित्वा अथ क्रमेण उपविश्य द्वारपार्श्वे साचीभूय निमीलितनयनः निद्रापरवशोऽभवत् । प्रत्यवेक्षणाय गूढचारी राजा सुषुप्तमिमं दृष्ट्वा विमनीबभूव । अथापि तमनुद्बोधयन् समये उपालम्भं चिकीर्षुः तेन स्वहस्तधृते खड्गकोशे तथैव स्थिते खड्गमात्रं बहिराकृष्य आदाय स्वभवनमगच्छत् ।

चिरात् प्रबुद्धो विदूषकः खड्गशून्यं कोशं पश्यन् सम्भ्रान्तोऽभूत् । अथापि किमपि बहिरप्रकाशयन् दारुमयं कमपि खड्गं निर्माय कोशे निवेश्य यथापूर्वमवर्तत ।

अथ राजा आस्थाने सर्वान् मेलयित्वा विदूषकमाहूय कञ्चन पुरुषं निर्दिशन् 'सौम्य, अयं पुरुषोऽपराधी दण्ड्यः । शिरश्छेदमर्हति । खड्गमादाय एनं जहि' इत्यादिशत् ।

अनुपदं विदूषकः 'अस्य वधो न मे इष्टः । न मे मनस्तत्र प्रवर्तते । यदि देवा अपि एनमवध्यं मन्यन्ते तर्हि मम खड्गो दारुमयो भवतु' इत्यभिधाय खड्गं कोशादाचकर्ष ।

राज्ञाऽभिसंहितात् उपालम्भात् उपहासाच्च एवमात्मानं रक्षितवन्तं बुद्धिमन्तं विदूषकं दृष्ट्वा राजा सुप्रीतोऽभवत् ।

TIRUPATI

Registered No. M 2300.

Book XX ॥ श्रीः ॥ Nos. 11 & 12

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. २०] कलि ५०४८ सर्वजित || कर्कट—साधारण सं ६
सिंह—शास्त्रानुबन्धः सं ६
आहत्य ,, १२

# THE UDYANA PATRIKA.

A
SANSKRIT MONTHLY

July & August — 1947

## विषयाः ॥

शास्त्रानुबन्धः—
कुवलयानन्दः । [बुधरञ्जनीसमेतः] २१३—२२०

1 मेनका ।
2 सुभाषितनीवी ।
3 वैदिकम्(२)। [अनुवृत्तम्]
4 परिपन्थिशब्दः ।
5 वात्सल्यचन्द्रिका ।
6 यथाभिमतम् [नाटकम्]
7 पाठशुद्धिः ।
8 प्रकीर्णकम् ।
9 विषयसूची ।
10 रावणप्रणतिः (३)। &
11 प्रतिबोधनम्। [in the wrapper]

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription Re. **One only.**
Do. With Sanskrit Supplement Rs. 2—0—0

उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यमेकं रूप्यम् । सानुबन्धायां द्वे रूप्ये ।

२. कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।

३. ग्राहकीबुभूषद्भिर्दययया प्रथममेव मूल्यं प्रेषणीयम् ।

४. वर्षमध्ये ग्राहकीभवतामपि कन्यासंचिकादिरेव पत्रिका प्रेष्येत ।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।

६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसंपादकाय प्रेषणीयाः ।

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण सार्कं कर्तव्याः (संस्कृतेन आङ्गल्या द्राविडया वा न तु भाषान्तरेण) ।

८. लेखप्रतिलेखषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

मुद्रणकारः— **S. Vijayaraghavan,**
*Proprietor*, The Srinivasa Press,
Tiruvadi P. O. Tanjore Dt.

निर्वाहकसम्पादकः— *Mimamsarnava*, *Mimamsakesari*
*Panditaraja* **D. T. Tatacharya Siromani M. O. L.,**
Lecturer, Sri Venkateswara College,
TIRUPATI.

प्रतिबोधनम् । (2)

द्वेष एवोपसदनं गर्हणैव च दक्षिणा ।
द्वाभ्यामाभ्यां वयं तुष्टा दिशामस्तत्त्वनिर्णयम् ॥

1. "ஆநந்தமயத்வமென்பதும் கல்யாணகுணசாலித்வமென்பதும் பர்யாயம். கல்யாணகுணசாலித்வத்திற்கு எதிர்த்தட்டானது ஹேயஸம்பந்தம்."

न । कल्याणगुणशालित्वं व्यापको धर्मः । द्रव्यत्वादिवत् । आनन्दमयत्वं व्याप्यो धर्मः । घटत्वादिवत् । कथमनयोरितरेतररूपत्वम् । अखिलहेयप्रत्य-

[ ராப்பர் பின்பக்கம் பார்க்கவும் ]

भावेन ऐक्षत । चत्वारि पार्श्वाणि स्वाधिष्ठितं स्थलं च सावधानमालोकत । स्वस्य तदवधि धूमशकटप्रेषणाधीनमरणाभावस्य कारणं स तदैव व्यजानात् । तत् स्थानकं चतुर्णां शकटानां समागमस्थानमिति हि प्रागेवोक्तम् । तस्मिन् स्थानके यात्राशकटानां भाण्डशकटानाञ्च अवस्थापनाय विंशतिस्त्रिंशाः पन्थानः पादार्धपादार्धशिलादूरे निर्मिता अभवन् । तत्रागामिनः शकटस्य प्रधानभूतः पन्थाः महति दूरे अवर्तत । तेन अधिशयितः पन्थाः शकटानामवस्थापनार्थेष्वेकः । चोराः पानमत्ततया तदनवधाय प्रथमदृष्टे पथि तं बध्वा अगच्छन् । तत् तत्त्वं तदानीमेव उपलब्धवान् श्यामार्यः प्राप्तप्रहर्षः शनैर्वाचमुद्धाट्य "इतोऽपि पञ्चनिमेषावधि युवयोरनागमे मम जीवितमुत्क्रान्तं स्यात् । मम प्राणप्रदयोर्महोपकारिणोर्युवयोः कं प्रत्युपकारमहं करिष्यामि । इदं राज्यं यदि मदीयमभविष्यत् इदं तथैव युवाभ्यां दत्तवानभविष्यम् ।' इति वदन् उत्थाय उपाविशत् । तदापि शरीरस्वास्थ्याप्रतिलम्भात् सम्यगुत्थातुं तस्य न शक्यमासीत् । किञ्च कट्यां कौपीनमात्रस्य स्थितत्वात् स उत्थातुमप्यलज्जत ।

तदुक्तमाकर्णितवान् कन्दः 'को णु शामि एवं कृतवान् युष्माकं पुरं किं णु शामि' इत्यवोचत् ।

श्यामार्यः ''तात, मम स्थानं पट्टणम् । वाणिज्यविषयेण नागपट्टणगामी । रात्रौ एकघण्टाशकटादवरुह्य तिरुवारूर्-अत्र कस्यचित् स्निग्धस्य गृहे अतिष्ठम् । तत्र परिमोषिण आगत्य मयि स्थितानि दश सहस्राणि रूप्याणि गृहीतवन्तः मां बध्वाऽऽनीय इह प्रास्यन्ति स्म । युवाभ्यां मे प्राणप्रदानं न महत् । मम मानरक्षणाय द्वे वस्त्रे नागपट्टणं गन्तुं एकां चीटीं च यदि क्रीत्वा दद्यातं न तद् विस्मरेयम् । नागपट्टणगमनसमनन्तरं तत्क्रयं प्रेषयिष्यामि'' इत्यभिधाय ससान्त्वमन्वनाथत् । तच्छ्रुतवान् कन्दः 'अहो तपस्वी । आर्यः (द्विजः) अरे । महामनुष्य आगत्य संलग्नोऽभूदरे । त्वं अस्मद्-विजयपुर-माणिक्यं पिळ्ळै-आपणमुपधाव्य ऋणेन द्वे वस्त्रे

गृहीत्वा आगच्छ । अहं चीटीं क्रीणामि" इत्यब्रवीत्। सपदि द्वावपि विशीर्णशिरस्कं धावित्वा अदृश्यावभूताम्। एकाकी विमुक्तः श्यामार्यः सद्यः चिन्तामकरोत्। किं स्वेन तथैव नागपट्टणं गम्यताम् अथवा कमलागृहमभ्येत्य तदीयं वृत्तान्तं ज्ञात्वा गन्तव्यमिति आलोचयामास। कथमपि कमलायाः पुनः सकृद्दर्शने स्वकीयमौत्सुक्यं न निवर्तेतेति, स्वजन्म न कृतार्थं भवेदिति सोऽयापि मेने। किन्तु तदानीं स्वस्य दरिद्रत्वात् तथैव तस्याः सविधगमने बहुमतिर्न स्यादिति मद्रं गत्वा धनमानेतव्यमिति चाध्यवसायमकरोत्। चीटीं गृहीत्वा नागपट्टणं गत्वा नौकाव्यापारिणि स्वधनापहारमावेद्य मद्रगमनव्ययौपयिकं वित्तं तस्मादृणं गृहीत्वा स्वपुरं गन्तव्यमिति निश्चिकाय। ततः परं पादनाडिकायां कण्णुच्चामि कन्दश्च प्रत्याधाव्य द्वे वस्त्रे चीटीं च तस्मै अदत्ताम्। परोपकारगुणं प्रेम च दृष्टवान् श्यामार्यः "आः। दरिद्रा एव आपत्काले उपकारिणः। धनिकाः शिलाहृदयाः। तातौ, युवयोः शुभगुणसंपन्नयोः ईश्वरो न कामपि न्यूनतां करिष्यति। अहं गत्वा अनुपदं वित्तं प्रेषयिष्यामि।" इत्यवदत्।

कण्णुच्चामि "सर्वं सपादं रूप्यचतुष्टयमासीत् स्वामिन्" इत्यावेदयत्। श्यामार्यः 'सम्यक्। नागपट्टणगमनानुपदमहं धनादेशेन दश रूप्याणि प्रेषयामि। युवां गृह्णीतम्" इति वदन्नुत्थाय स्थित्वा वस्त्रे गृहीत्वा पर्यधत्त। चीटीं गृहीतवान् स्थानकं प्रत्यचलत्। तौ द्वौ मनुष्यौ तं प्रति सानुकम्पौ तेनैव साकं गत्वा अनन्तरस्य शकटस्य आगमनावधि प्रतिपाल्य अञ्जलिं कृत्वा परिप्रेष्य न्यवर्तेताम्। श्यामार्ये चक्षुर्विषयमतिक्रान्ते कन्दः "किमरे कण्णुच्चामि, आर्यः खलु वित्तं प्रेषयिष्यामीत्यवादीत्। तस्य हि असन्मुखविलासो न विदितः। कथं प्रेषयिष्यति ?" इति जगाद। तदाकर्णितवतः कण्णुच्चामि-अस्यापि तस्मिन् विषये तदैव महान् संशयोऽजनि। तथापि न स्वकीयं धैर्यं नाजहात्। "अरे आर्यः साधुररे। यथाकथमपि वित्तमवश्यं प्रेषयेदरे। अथवा साक्षादागच्छेदरे" इत्यब्र-

वीत् । कन्दश्च तत् विशश्वास । ततः परं द्वावपि तद् विस्मृत्य स्वकर्म अवाधत्ताम् ।

धूमशकटे गतः श्यामार्यः नागपट्टणं गत्वा पोतवणिजि स्वकीयं धनं चोरैरपहृतमावेद्य मद्रगमनाय अपेक्षितं धनं गृहीत्वा धूमशकटमारोहत् । तिरुवारूर् अतः नागपट्टणगमनसमये ताभ्यां द्वाभ्यां मनुष्याभ्यां यां प्रतिज्ञामकरोत् तां स पूरयितव्येत्यभिसन्धायैवाकरोत् । किन्तु नागपट्टणं गत्वा पोतवणिजः सकाशात् स्वकीयव्ययाय यदा ऋणमगृह्णात् तदा ताभ्यां द्वाभ्यामुपकारिभ्यां रूप्यं प्रेषणीयमित्येतत् स यतो व्यस्मरत् ततः तयोर्मुखविलासमविज्ञाय ह्यागताः स्म इति अनुतापोदयस्यापि न तस्य अवकाशो बभूव । सः अनन्तरशकटे आरुह्य परस्मिन् दिने मद्रमागम्य दरिद्रेष्वपि परमदरिद्रः सन् स्वगृहमवाप । समुद्रतीरप्रासादे कमलया सह स्थित्वा स्वर्गभोगानुभवे असत्यपि स्वगृहं प्राप्य मीनाक्षीं वा दृष्ट्वा स्वकीयं प्राचीनमल्पसुखं वा किन्तु प्राप्नुयामेति अत्यौत्सुक्येन आगतत्वात् तदीया प्राचीना स्थितिरेव तस्य तदा परमं पदमभात् । तथा लज्जा एकतः व्यथयति स्म । विषादः अपरतः अबाधत । रुदितं कण्ठं रुरोध । चिरकालं बहु परिश्रम्य मूढाः पेरुन्देवीप्रभृतीर्वञ्चयित्वा अपहृतं महद् धनं एकेन निमेषेण स्वप्नवत् तिरोभूतं विचिन्त्य विचिन्त्य आर्यः मुक्तकण्ठं रुदन् आवृत्य अवगुण्ठनं कृत्वा क्वापि कोणे अशेत । पुनरुत्तिष्ठतस्तस्य द्वे दिने अत्यगच्छताम् । तयोर्द्वयोर्दिनयोरन्तरे सः अचिन्तनीयाश्चिन्ताः सर्वाश्चिन्तयामास । ललोठ, रुरोद, चुक्रोश, संबभ्राम । तेन कृताः सर्वे परिश्रमाः चोरितस्य धनस्य प्रत्यानयने अक्षमा अभवन् । मुहुर्मुहुः पेरुन्देव्याः स्मरणं तस्य मनसि उदभवत् । "अहं तावत् अनायासमपहृत्य चोरेभ्योऽददाम् । पेरुन्देवी कियद्भिर्वर्षैः सञ्चित्य सञ्चित्य त्रीणि शतानि स्वर्णानि कट्यां बध्वा ऊढवती । अपि च अर्थाशया साक्षात् स्वानुजजायायाः तुलुष्के विक्रयणरूपं नीचकार्यं कृत्वा अर्थं सम्पादितवती । गतं धनमित्येतत् सा शृणुयाच्चेत् न तत् सा

विश्वसिष्यत्यपि । सद्यः ताटकाशूर्पणखावेषं धृत्वा अङ्के मामाकृष्य मल्लयुद्धाय आगता भवेत् । वीथी सर्वा हसेत् । तेन रहस्यं सर्वं प्रकटीभवेत् । अन्ते महान् क्लेशः कारावासश्चापतेत् ।" इति स मेने । तेन कथमपि तां वञ्चयित्वा तया उपलब्धुमशक्यं स्थलान्तरं गतेन भाव्यमित्यवसायमकरोत् । "पेरुन्देवी पुनः 'प्रासादः प्रासादः' इति जपं कुर्वती कदा तं प्रवेक्ष्याम इत्युत्सुका वर्तते । अतः किमपि तन्त्रं कृत्वा तां प्रासादे वासयित्वा वरदाचार्यस्य कन्यां सपदि वराहस्वामिने विवाह्य अनिवेदितं रात्रावेव प्रधावितव्यम्" इति निरचिनोत् । प्रासादकुञ्चिका तदारामपालेऽवर्तत । श्यामार्यः साहेबस्य कार्यस्थ इत्येतत् नाविकस्य सुहृदित्येतच्च आरामपालो विदितवान् । तस्मात् सः सद्य तमुपगम्य नाविकानुमत्या प्रासादः कस्मैचित् भाटकार्थं मुक्त इत्यभिधाय कुञ्चिकां गृहीत्वा पेरुन्देव्यै दत्वा तां तत्र सद्य एव वासयितुं निर्णिनाय । अपि च यतः सा प्रासादस्य क्रयपत्रं केति नूनं पृच्छेत् अतः तदर्थमपि किञ्चित् तन्त्रं कर्तव्यमिति तत्प्रत्यपि कृत्स्नां रात्रिं चिन्तयित्वा कञ्चन निर्णयमकरोत् । तस्य निकामसुहृत् दरिद्रः कश्चन महम्मदीय आसीत् । तत्सविधं गत्वा शतं रूप्याणि दत्वा एकं दिनं नाविकसाहेबवत् नटनं कार्यमिति चोदयामास । स्वदारिद्र्यदोषेण सः तत्र सम्मतिमकरोत् । लिपिजीविना केनाचित् विक्रयपत्रमपि विलिख्य समापितम् । परेद्युः दशसु घण्टासु आर्यः सम्यक् भुक्त्वा परिधाय विषयान् कयाचन विधया स्वगृहिण्यै निवेद्य पत्राङ्कनकार्यालयं (सब्-रेजिस्ट्रार्-आपीस्) गत्वा प्रतिनिवर्तिष्ये इत्यभिधाय जगाम । तथा तस्य गमनानन्तरं एकद्वासु नाडिकासु गतासु अस्मदीयो मलयालमन्त्रवादी श्यामार्यगृहमागम्य पूर्वं करीत्या तमाजुहाव । तदाकर्ण्य "कस्तत्र" इति पृच्छन्ती देहलीकवाटसमीपमागत्य दृष्टवती मीनाक्षयम्बा कञ्चन महम्मदीयं तिष्ठन्तमपश्यत् । आजानुबाहु उन्नतं स्थूलं तदीयं शरीरं महदुष्णीषं निबिडदीर्घा दाढिः अञ्जनाक्ते नेत्रे इत्यादिकं वीक्ष्य कथमपि त्रासं गता "का सङ्गतिः । कस्त्वम्" इति मृदु पप्रच्छ ।

पादनरूपः तस्योचितः; सहस्रांशुसमप्रभ इत्युक्तत्वात् । कलहायितकुन्तलं कलापैरित्यादौ सादृश्यापादनेऽपि कलहशब्दः प्रयुक्त इति भावः । यद्वा कर्बुरा अजामेकां लोहितशुक्लकृष्णामित्युक्तक्रमेण चित्रवर्णा प्रकृतिः मूलप्रकृतिः यस्येति । प्रकृतिमण्डलान्तर्गत इत्यर्थः । कापेयकलहोचितः सर्वरक्षकेण भगवता सह 'त्वं मेऽहं मे' इत्यादिकलहकरणस्य समुचितस्थानमित्यर्थः ।

एवं सुमेरुपरतयापि—

अनेकमुखा ये पापाः असुरराक्षसादयः ते आत्मनि शरीरे यस्य, आत्मा जीवे धृतौ देह इति कोशात् । मेरोरधस्तात्तिष्ठन्ति निखिला दैत्यदानवा इति पुराणप्रसिद्धेः । अच्छद्मनां निष्कपटानां ऋषीणां सन्दर्शिताः आश्रमाः तद्वासयोग्याः पर्णशालादयः येन सः । कर्बुरप्रकृतिः सुवर्णारब्धशरीरः कश्चित् सुमेरुः कपेः दिग्गजस्य संबन्धी यः कलहः गण्डदन्तादिभिः भेदनरूपः तस्य उचितः । वक्ष्यते हि 'विबुधमहिते मरावैरावणः करटी मुहुः कषतु करटं कण्डूलं स्वं क्षरन्मदकर्दमं भजतु च तटकाण्डां पीडामिसंधिरिति । कपीनां दिग्गजानां वनगजानाञ्च परस्परकलहोचित इति वा । तदप्युक्तं स्पर्धन्तां सह जातिकुञ्जरतया दिक्कुञ्जरैः कुञ्जरा इति ।

एवमुतथ्यवृत्तान्तपरोऽप्यर्थः—

तथाह्यानुशासनिके— उतथ्यो नाम कश्चिन्महर्षिः भद्रान्नाम सोमस्य कन्यामुद्वह्य गार्हस्थ्ये तिष्ठन् ताञ्च कदाचित् यमुनायां क्रीडन्तीं पूर्वानुरक्तेन वरुणेनापहृत्य स्वपुरीं प्रापय्य षट्सहस्रशतह्रदे यथेच्छमनुभुक्तां नारदमुखादुपश्रुत्य पुनश्च नारदमेव स्वभार्यामोचनाय वरुणान्तिकं संप्रेष्य नाहमेनामुत्सृजामि पूर्वानुरक्तः प्रियतमामिति वरुणेन प्रतिसन्दिष्टः क्रोधप्रज्वलिताननः स्वतेजसा निखिलजगत्स्थितनदनदीसमुद्रादिनिखिलजल-

जातमपि निपीयान्ततष्षट्सहस्रशतह्रदमपि मरुकान्ताराञ्चकार । अतस्सर्वेषु स्ववासगेहेषु संशोषितेषु, जगति च बाध्यमाने सन्तापोष्मणा, वायावपि यत्र कुत्रचिन्निलीयमाने, वरुणस्तामादाय भद्रां सद्य एव शरणमुपजगाम महर्षिमिति । अतश्चायमर्थः । अनेकमुखं जलं पिबतीत्यनेकमुखपः आपात्मा जलसंघातभरितविग्रहः । छद्मना स्वमायया संदर्शितः अश्रमः सर्वजलपानेऽपि परिश्रान्त्यभावः येन तथोक्तः । अश्रमादेव सकलं जलं पिबन्नित्यर्थः । कर्बुरप्रकृतिः परभुक्तभार्यापेक्षणेन क्रोधातिशयवशीभावेन च रजस्तमःकलुषस्वभावः कश्चित् उतथ्यः कापेयकलहः के जले विषये अपेयमिति यः कलहः तस्य उचितः निखिलजलविलयात् सर्वेपि कलहायन्त इत्यर्थः । यद्वा कापिकलहः वालिसुग्रीवकलहः परस्परभार्यापकर्षणप्रयुक्तः तस्योचितः । परभुक्तभार्यार्थं जगद्विध्वंसनारंभणादिति भावः ।

एवं गायत्रीपरतया तदभिमन्त्रितार्घ्यजलपरतया चार्थः—

कर्बुरप्रकृतिः प्रातर्मध्याह्नसायंकालभेदेन रक्तश्वेतकृष्णरूपवर्णत्रयविशिष्टः अन्यत्र जलरूपः । अनेकमुखस्सन् मुक्ताविद्रुमहेमनीलधवळच्छायैर्मुखैरित्युक्तमुखपञ्चकविशिष्टस्सन् पापात्मनां प्रागुपनयनाद्यथेच्छपापचारिणां अच्छद्म निष्कपटं संदर्शितः आश्रमः ब्रह्मचर्यरूपः येन सः अर्घ्यजलपक्षे अनेकमुखस्सन् शतमुखशब्दितवज्रायुधरूपस्सन् इत्यर्थः । अन्यत्पूर्ववत् । श्रूयते हि—'गायत्रियाभिमन्त्रिता आप ऊर्ध्वं विक्षिपन्ति ता एता आपो वज्रीभूत्वा' इति । कश्चित् पदार्थः कापेयः सूर्यसम्बन्धी यः कलह मन्देहनामकरक्षोयूथकृतः तस्य उचितः प्रतीकार इत्यर्थः । मशकाय धूम इतिवत् कलहशब्दस्तन्निवारणपरो वा । अतो गायत्री तदभिमन्त्रितार्घ्यजलं वा सूर्यकलहनिवारणोपाय इत्यर्थः । तथा च श्रुतम्—'तानि ह वा एतानि रक्षाँसि गायत्रियाभिमन्त्रितेनांभसा शाम्यन्ती'ति ॥ ७ ॥

छलिनं सत्कथानर्हं स्वात्मोपहतजातिकम् ।
न निगृह्णाति यः काले सोऽपि सभ्यैर्निगृह्यते ॥ ८ ॥

एवं खलानां विधाभेदमुक्त्वा तैस्संवासादिकं सुदूरपरिहार्यमिति स्थापयिष्यन् दूरेस्तु संवासः यः खलु खलानां निग्रहशक्तोऽपि तान् न निगृह्णीयात् सोऽपि तत्संयोगी च पञ्चम इति न्यायेन निग्रहीतव्य एवेत्याह(छलिनमिति) । नित्ययोगे मत्वर्थीयः । कपटैकजीवितमित्यर्थः । सदा करणत्रयवैरूप्यशालिनमिति यावत् । सत्कथायाः साधुकथायाः सतां कथाया वा अनर्हं सत्कथाप्रस्तावसमये स्मरणस्याप्यनर्हमित्यर्थः । यद्वाऽसूयया सत्पुरुषकथाश्रवणमप्यसहमानमित्यर्थः । उक्तं हि "मृगमीनसज्जनानां तृणजलसन्तोषविहितवृत्तीनाम् । लुब्धकधीवरपिशुना निष्कारणमेव वैरिणो जगती"ति । स्वात्मोपहतजातिकं स्वस्य आत्मा स्वात्मा स्वशब्दो देहविशिष्टजीवात्मपरः । आत्मशब्दः शरीरपरोन्तःकरणपरो वा । तेन उपहता विनाशिता जातिः ब्राह्मण्यादिः यस्य तं, जातिभ्रंशकरमहादोषदूषितान्तःकरणमित्यर्थः । तथा च मनुः— 'शूद्रां शयनमारोप्य ब्राह्मणो यात्यधोगतिम् । समुत्पाद्य सुतं तस्यां ब्राह्मण्यादेव हीयते' इति । तथाविधं काले प्राप्तकाले यो न निगृह्णाति यजनयाजनादिसमये पङ्क्तिभोजनादौ वा यो न निवर्तयति सोऽपि यजमानोऽपि सभ्यैः यागार्थं भोजनार्थं चागतैः महाजनसंघैः निगृह्यते परिह्रियते । काल इत्यनेन महोत्सवादिसङ्कल्युदासः । अत एवोच्यते 'त्यज दुर्जनसंसर्गं भज साधुसमागमम्' इत्यादि । तदीयपर्यन्तत्यागोऽत्र विवक्षित इति भावः । यद्वा स्वात्मेति पृथक्पदं एतादृशं पापशीलं यः स्वात्मा न निगृह्णाति । स्वतस्सतां ह्यः परतोपि गुर्वीति न्यायेन स्वस्मादेव विलज्य यस्तादृशकृत्यं न निवारयति । सः सभ्यैः अन्यैः महाजनैः अपि निगृह्यते । निगृह्यते किमित्यर्थः । अपि दृष्टशिशुरित्यादाविव अपिशब्दः किमर्थकः । स्वबुद्धिपूर्वकत्याग एव श्लाघ्यतम इत्यर्थः ।

अन्योऽपि नैयायिकादिसमयसिद्धोऽर्थः । तथा हि । कथा तावत्

त्रिविधा । वादजल्पवितण्डाभेदात् । तत्र तत्त्वनिर्णयार्थकथा वादः विजयार्थ-कथा जल्पः । स्वपक्षस्थापनाहीना परपक्षविदळनमात्रप्रयोजना वितण्डा । एवं त्रिधा विभक्तायाः कथायाः छलजातिनिग्रहस्थानादिकं दोषः । तत्र छलं नाम अर्थान्तराभिप्रायेण प्रयुक्तस्यान्यार्थं परिकल्प्य दूषणम् । स्वव्या-घातकमुत्तरं जातिः । वादिनोपजयहेतुर्निग्रहस्थानं, तच्च प्रतिज्ञाहान्यादिक-मनेकधा विभज्यते । तत्र पर्यनुयोज्योपेक्षणं नामैकं निग्रहस्थानम् । तच्च परगतनिग्रहस्थानस्य प्राप्तकालेऽनुद्भावनमिति । तथा चायमर्थः । छलिनं छलोक्तिमन्तम्, अत एव सत्कथानर्हं कथायां सत्त्वं नाम छलादिराहि-तत्वे सति तत्त्वनिर्णयैकफलत्वम् · तादृशकथाया अनर्हं वितण्डादिनिरत-मित्यर्थः । स्वात्मना उपहता व्याहता जातिः यस्य सः स्वव्याघातक-जात्युत्तरवन्तमिति फलितम् । यद्वा स्वस्य आत्मा अन्तःकरणं स्वसिद्धान्त इत्यर्थः । तेन व्याहतं स्वकीयमुत्तरमिति स्वसिद्धान्तविरुद्धोत्तरकारिणमिति फलितम् । तथाविधं प्रतिवादिनं यो वादी काले वादसमये न निगृह्णाति निग्रहहेतुभूतं छलजातिनिग्रहाद्युद्भावनं न करोति सोऽपि तादृशनिग्रहस्था-नानुद्भावकोऽपि सभ्यैः तादृशवादसभास्थैः मध्यस्थादिभिः पण्डितैः निगृह्यते । त्वमेवात्र निगृहीतः । परकीयनिग्रहस्थानानुद्भावनादिति कथयन्तीत्यर्थः ।

एवं पितृगुर्वादिपरोऽप्यर्थः ।

जातिभ्रंशकरपापैर्जुष्टं दुष्टकुमारशिष्यादिकं तत्तत्काले यः पिता गुरुर्वा न निगृह्णाति न वारयति, सोऽपि सभ्यैः प्रायश्चित्तविधानार्थं संगतैः पारिषदैः निगृह्यते । तदर्धप्रायश्चित्तगोचरीक्रियते । 'अनाचाररतान् दृष्ट्वा यश्शक्तो न निवारयेत् । तत्पापादर्धमाप्नोति यदोपेक्षापरायण' इति स्मृतिवच-नादिति भावः ।

एवं महाजननियमितराजपरोऽपि—

सन्ति हि कचिद्राज्येषु प्रजानियमिता राजानः । तत्र प्रजा-संघैः मिळितैः व्यवस्थापितस्य राज्ञः वञ्चनार्थकार्यकरणपरस्त्रीबलात्कारादि-

ADRIYAR LIBRARY TIRUPATI 60

# उद्यानपत्रिका ॥

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्वेधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु. २०] कलि ५०४८ सर्वजित { कर्कट साधारण सं ११ / सिंह शास्त्रानुबन्ध सं १२

## स्वातन्त्र्यम् ॥

सर्वजिति वत्सरेऽस्मिन्
कर्कटके मासि सितचतुर्दश्याम् ।
पुष्येऽस्मद्देशोऽयं
स्वातन्त्र्यं प्राप्य सर्वजिद् भवति ॥

दुर्भिक्षरोगकलह-
प्रशमोपायान् विचिन्त्य सम्पाद्य ।
लोकः सर्वोऽत्यन्तं
सुखी यथा स्यात् तथा करिष्यामः ॥

अन्तःक्षोभः शाम्यतु
भवतु विवेकी जनः समस्त इह ।
स्निह्यन्तु मिथः सर्वे
हृदि लोकानां प्रकाशतां देवः ॥

---

## वैदिकम् (२) ॥

(अनुवृत्तम्)

### 5 उपसर्गार्थः

अयं विषयः पूर्वस्यामेव सञ्चिकायां प्रक्रान्तः । तत्र वक्तव्य-शेषमिदानीं ब्रूमः ।

'रत्नं समागच्छतु काञ्चनेन' इति रघुवंशश्लोकव्याख्याने मल्लिनाथः 'समागच्छतु सङ्गच्छताम्' इति विवरणं करोति । तत् प्रदर्शयन्तः अनर्थ-

कत्वादेव हि आङोऽत्र परित्याग इति संरभन्ते । आङं परित्यज्य सङ्ग-च्छतामिति विवृण्वन्नप्ययं व्याख्याता अनुपदं 'अत्यन्तानुरूपत्वात् युवयोः समागमः प्रार्थ्यत इत्यर्थः' इत्याङुपश्लेषेण समागम इति प्रयुङ्क्ते न तु सङ्गम इति । सर्वथा अर्थशून्य उपसर्ग इति यदि तस्याभिप्रायः तर्हि सङ्गमः प्रार्थ्यत इत्येवं तेनोक्तवता भाव्यम् । न च तथोक्तवान् । 'उपसर्गार्थविशेष-प्रतिपादनपर्यन्तं तथा सूक्ष्मव्याख्यानं न मया क्रियते । सूक्ष्मार्थविवेचनम-भिज्ञैः स्वयं कर्तव्यम् । अन्यथा ग्रन्थविस्तरोऽतिमहान् स्यात्' इति तस्या-भिसंधिः ।

काव्यविद्गोष्ठीगरिष्ठा यदभिदधति तदप्यवधेयम् । ध्वनिकारस्तावत्-

उपसर्गाणां व्यञ्जकत्वं यथा— नीवाराः शुकगर्भ ...... इत्यादौ । द्वित्राणां चोपसर्गाणामेकत्र पदे यः प्रयोगः सोऽपि रसव्यक्त्यनुगुण-तयैव निर्दोषः । यथा— 'प्रभ्रश्यत्युत्तरीयत्विषि तमसि समुद्वीक्ष्य... ...' । यथा वा—'मनुष्यवृत्त्या समुपाचरन्तम्....... ।

इति । अत्र व्याख्याता लोचनकारोऽभिनवगुप्तः—

प्रकर्षेण स्निग्धा इति प्रशब्दः प्रकर्षं द्योतयन् इङ्गुदीफलानां सरसत्व-माचक्षाणः आश्रमस्य सौन्दर्यातिशयं ध्वनति । ··· ··· सम्यक् विशे-षेण उच्चैः ईक्षितृत्वे भगवतः कृपातिशयोऽभिव्यक्तः । सम्यग्भूतं उपांशु कृत्वा आ समन्तात् चरन्तमित्यनेन लोकानुजिघृक्षातिशयः तत्तदाचरतः परमेश्वरस्य ध्वनितः ।

इति । एतेन 'रत्नं समागच्छतु काञ्चनेन' इत्यत्र द्वितीयोपसर्गस्य आङः निरर्थकत्वे रसव्यञ्जनानुपयुक्तत्वात् दुष्टता दुष्परिहरेति व्यक्तम् । कः पुनः तस्यार्थः कथं तस्य रसव्यञ्जने उपयोग इति चेत् तदन्यत्रोक्तवन्तः स्मः । तत्प्रकाशनं प्रतीक्षणीयम् । शक्यत्वे तदुपलंभे स्वयं यत्यताम् । अर्थशून्य-त्वपक्षाभिनिवेशस्तु रसिककविशिखामणिसूक्तिदूषणसंरम्भे पर्यवस्येदित्येतदग्र-हदं ग्रहीतव्यम् ।

अथ वेदे क्वचिदुपसर्गस्य निरर्थकत्वमङ्गीक्रियत इति चेत् सत्यमङ्गीक्रियते। किन्तु तत्र क्वचित्, यत्र तदुक्तस्यार्थस्य अन्वयो न संभवति, नाकांक्षा नास्ति। औत्सर्गिकमर्थवत्त्वम्। अपवादोऽर्थशून्यता। तदिदम्—

प्रतिजानीहीत्यत्र ज्ञानमात्रविषयानुपसर्गस्य नैरर्थक्यात्, वास्तोष्पते प्रतिजानीह्यस्मानित्यादिष्वगत्या नैरर्थक्यस्वीकारात्, अत्र च ज्ञानविधेः प्रयोजनाभावात् प्रतीयमानप्रतिज्ञार्थस्यात्यन्तनिर्णीतत्वस्यापकतयाऽपेक्षितत्वाच्चाह—कौन्तेय.... इति।

इति श्रीतात्पर्यचन्द्रिकाश्रीसूक्तितात्पर्यविदां सुमहम्। अत्र वास्तोष्पतिमन्त्रे 'प्रति' इत्यस्योपसर्गस्य पैरुक्तमानर्थक्यमभ्युपगम्य देशिकैः तद्वैषम्यप्रदर्शनेन गीताश्लोके तस्य सार्थक्यमुपपाद्यते। वस्तुतस्तु तत्रापि सार्थकता सुवचेत्येव तेषामभिसन्धिः। उक्त एव हि तस्यार्थः सायणेन भट्टभास्करेण च। न च तत्र काचिदनुपपत्तिः। प्रकृते च 'स्तोमा उप मामुपागुः' इत्यत्र आङर्थस्य न केवलमनन्वयविरहः अपि तु वक्त्रा स्तोमानां स्वसमीपे आगमनस्य अभिप्सितत्वादत्यन्तापेक्षाप्यस्तीति द्रष्टव्यम्।

एतेन 'अधि दात्रे वोचः' इत्यत्र अधिरनर्थक इति भट्टभास्करेणोक्तमिति यत् तदपि समाहितम्। अयं हि तस्य भाष्यग्रन्थः—

किञ्च दात्रे इन्द्राय इमं यजमानं इदं कर्म वा आधिक्येन वोचः। दात्रे यजमानाय अधिब्रूहि अधिकं ब्रूहि। यद्वा स्वामित्वेन वचनं अधिवचनम्।

यद्वा द्युप्रभृतिषु स्थितं तेज एकत्र सम्भृत्य तेन यजमानस्याभिमतं साधयेति तत्सर्वथा मया क्रियत इति यजमानाय ब्रूहि। अध्यागच्छेत्यादिवदधिरनर्थकः।

इति। अत्र वोच इत्युक्ताया वचनक्रियायाः 'तत्सर्वथा मया क्रियत इति' इति कर्मकारके अध्याहृते अधीत्युपसर्गार्थस्य कर्मकारके क्रियायां वाऽऽकांक्षा-

विरहेणानन्वयात् निरर्थकत्वमाह । 'यजमानं ब्रूहि' 'कर्म ब्रूहि' इत्येवं कर्मकारकान्तराध्याहारे यजमानः कर्म वा कथं वक्तव्यमित्याकांक्षायाः सत्त्वात् तत्प्रशमनौपयिकं 'आधिक्येन' 'अधिकं' 'स्वामित्वेन' इतीममर्थं प्रतिपादयन् अधिः सार्थक एवेति मन्यत इति स्पष्टम् । तथा च सार्थकत्वानर्थकत्वे अर्थस्य अन्वयसम्भवासम्भवनिबन्धने इति ज्ञातव्यम् । तदिदं नोपसर्गाणामेव अपि तु पदान्तराणामपि । 'यदिशब्दपरित्यागः' इति हि वाक्यविदां कुले प्रसिद्धो व्यवहारः ।

अथात्र किञ्चित् परमरहस्यम् । अध्यागच्छेत्यादिवत् अधिरनर्थक इति वदतो भट्टभास्करस्य 'अधिपरी अनर्थकौ' इति पाणिनिसूत्रं 'कुतोऽध्यागच्छति' इति तदुदाहरणं च बुद्धौ स्थितमित्यत्र नास्ति सन्देहः । अस्य अनुशासनस्य यथाश्रुतस्यैव ग्रहणे अधिपर्योर्द्वयोरेवात्र अनर्थकत्वसूचनात् तेन उपसर्गान्तरानर्थक्यालाभात् अधिदृष्टान्तेन आङोऽनर्थकत्वप्रतिज्ञानमयुक्तम् । यदि तु उपसर्गत्वसामान्यात् अन्यस्याप्यानर्थक्यमभिमतमित्युच्यते तर्हि अर्थरहितस्योपसर्गस्योपसर्गत्वमेव हीयेत । 'उपसर्गाः क्रियायोगे' इति क्रियायोगे हि उपसर्गत्वमिष्यते । क्रियायोगश्च तदन्वितार्थवाचित्वमेव नान्यः । अधि दात्रे वोचः वास्तोष्पते प्रतिजानीहीत्यादौ आनर्थक्यपक्षे उपसर्गत्वाभाव इष्ट एव । न हि तेन किञ्चिदनुपपन्नं भवतीति । उपागुरित्यत्र तु आङोऽनर्थकत्वे क्रियायोगविरहात् उपसर्गत्वं तत्तुल्यं गतित्वं च न स्यात् । तदभावे 'गतिर्गतौ' 'गतेर्गतिमता' इति विहितः प्रथमोपसर्गनिघातः समासश्च दृश्यमानोऽनुपपन्नः स्यादिति एतदन्यथानुपपत्त्या आङः सार्थक्यमनिच्छयाऽप्यङ्गीकार्यमिति अधिदृष्टान्तपठनं सर्वथा विपरीतफलपर्यवसायि । उपसर्गश्चेदर्थवानेव । अर्थराहित्ये उपसर्गत्वं हीयेत । अधिवत् । उपागुः उपरिष्टादुपादधातीत्यादौ स्वरेण समासेन च उपसर्गत्वमवश्यं वाच्यम् । तेन सिद्धमर्थवत्त्वमिति ।

---

# गाथार्थः ॥

வரத்தால் வலிநினைந்து மாதவநின் பாதம்
சிரத்தால் வணங்கானா மென்றே — உரத்தினால்
ஈரரியாய் நேர்வலியோ னாய இரணியனை
ஓரரியாய் நீயிடந்த தூன்.

इति सरोमुनीन्द्रगाथाया अर्थमवलम्ब्य परे रावणप्रणतिविचारे किमप्यवोचन्। तदसाङ्गत्यप्रतिपादनप्रवृत्ता वयं एतद्गाथार्थं

वरेण लब्धं स्वबलं विचिन्त्य न ते नमेदेष पदं हि मूर्ध्ना ।
अतो व्यथा माधव किं नृसिंहो भवन् हिरण्यस्य वपुर्द्विभागम् ॥

इत्यनूदितवन्तः स्मः । तमेव

वरबलमवधाय माधव त्वच्चरणयुगं न नतो हिरण्यदैत्यः ।
इति किमु नृहरिर्भवन् बलाढ्यं तमसुरमाहितवान् विदीर्णदेहम् ॥

इत्यनुवदन्तः परं कालत्रयेऽप्यस्माकं योग्यतातिशयव्यञ्जिकां उत्तमां सम्भावनां कुर्वन्तो लिखन्ति—

> भाषास्वरूपानभिज्ञाः शास्त्रार्थतत्त्वावबोधवैदेशिकाः आचार्यसूक्तिसौवादवानभिज्ञाश्च केचित् सरोमुनीन्द्रगाथायाः संस्कृतावेवर्तमन्यथा प्रकाशयन्ति "वरेण लब्धं स्वबलं विचिन्त्य........" इति । अस्य श्लोकस्यायमर्थ इति यदि ते स्वयमेव व्याचक्षीरन् अथ स्वात्मनैव स्वात्मा विगर्हितो भवेत्

इति । अस्य श्लोकस्यार्थावगमे कः क्लेशः । भाषास्वरूपानभिज्ञत्वादिभिरापतिताः के दोषा इह सन्ति । इति स्फुटं प्रतिपादने शक्यमस्माकं यथोचितं समाधातुम् । असमाधेयत्वे वा दोषानभ्युपगन्तुम् । दोषाणामभिदन्तया प्रतिपादनमन्तरा सामान्यतः क्रियमाणा संभावना अस्माकं भाग्यविशेषं सूचयन्ती यद्यपि प्रहर्षाय कल्पते तथापि अपवृत्तिविशेषकरत्वादफला भवतीति विषादमपि जनयति । अन्यत्तु किञ्चिदद्य प्रतिपादयामः ।

II

अराक्षसमिमं लोकं कर्तास्मि निशितैः शरैः ।
न चेच्छरणमभ्येषि मामुपादाय मैथिलीम् ॥
विभीषणस्य चैश्वर्यं भविष्यति हते त्वयि ।
न चेत् सत्कृत्य वैदेहीं प्रणिपत्य प्रदास्यसि ॥

इत्युक्तरीत्या अपराधिनो रावणस्य अपराधप्रायश्चित्ततया भगवति कर्तव्यस्य प्रणामस्याकरणात् भगवता वधः कृत इति

प्रणति विमुख दशमुखोत्त माङ्गदशक मच्छिदः

इत्येवमर्थकश्रीसूक्तिप्रतिपाद्यमिति तावत् स्थितम् । इदं सविस्तरमुपपादित-मस्माभिः । अत्र परे अवोचन् । स्वप्रणाममकुर्वन्तमपि धूर्तं भगवान् न निगृह्णाति । यत उदाहृतगाथया सरोमुनीन्द्र एवमाहेति । वयं प्रत्यबोचाम कथं तर्हि शिशुपालः (पूतना शकटासुरः) इत्येवमादीनां भगवता वधः । सरोमुनिगाथायास्तु अन्य एवार्थ इति ।

III

अथ परे गाथायाः स्वोक्त एवार्थे अभिनिविष्टाः किमपि किमपि अत्याकुलं लिखन्ति ।

त्वत्पादारविन्दं न प्रणतवानित्यनेन हेतुना किं त्वं हिरण्यमवधीः । न । किन्तु त्वद्भक्तं प्रह्लादं बहुधा क्लेशयामासेत्यनेन हेतुना । इति गाथार्थ-माहुः । १

स्वापराधिनोऽपेक्ष्य स्वभक्तापराधिष्वेव भगवतः क्रोधातिशय इतीह दिव्यकवेर्हृदयमिति मन्यन्ते । २

एतादृशोल्बणक्रोधलक्ष्यभूतानां हिरण्यादीनां साक्षादवतीर्य स्व-हस्तेन वधं विना सङ्कल्पमात्रेण हनने भक्तप्राणस्य भगवतो मनसः शान्तिर्न भवति इति, एवञ्च स्वभक्तद्रोहिप्रबलपातकिजनदुष्कृतासहिष्णुतैव प्रधान कारणं भगवदवतारे इति च प्रतिजानते । ३

अत्र वयं पश्यामः । गाथायां किंशब्दः क्षेपार्थ इष्यते । स क्षेपः किं त्वत्पादारविन्दमित्येतद्विषयः उत न प्रणतवानित्येतद्विषयः उत उभयविषयः । आद्ये 'त्वद्भक्तान् न प्रणतवान् इत्यनेन हेतुना' इत्यर्थः स्यात् न तु तेष्वपराद्धवानित्यनेनेति । द्वितीये त्वय्यपराद्धवानित्यनेन हेतुनेति लभ्येत न तु त्वद्भक्तेष्विति । अन्त्ये वाक्यभेदः स्यात् । १ न त्वां प्रति अपि तु त्वद्भक्तान् प्रति २ न न प्रणतवानिति अपि तु अपराद्धवानिति–इति । न ह्येवमभिप्रेत्य उत्तमाः कवयः ईदृशं वाक्यं रचयेयुरिति सम्भाव्यते । अन्यथा किं रामं जिगाय रावणः इत्यस्य वाक्यस्य "अलङ्कारशास्त्र(?)प्राण-सर्वस्व(?)भूतया व्यञ्जनावृत्त्या" 'किं रामं ? न, इन्द्रम्; किं रावणः ? न, तत्पुत्रः इन्द्रजित्; तथा च इन्द्रं इन्द्रजिज्जिगाय ।' इति "परमप्रामाणिक"मर्थं प्रादुर्भावयन् कश्चित् भाषास्वरूपाभिज्ञेषु शास्त्रार्थतत्त्वावबोधधुरन्धरेषु सहृदयसार्वभौमेषु अग्रगण्यः स्यादिति संक्षेपः । 1.

स्वापराधिनोऽपेक्ष्य स्वभक्तापराधिभ्यः क्रुध्यतितरां भगवानिति तथ्यमेतत् । न कस्यचिद् विप्रतिपत्तिरस्ति । न सोऽर्थः अस्यां गाथायाम-भिप्रेत इति तु वयमातिष्ठामहे । वाचकस्य व्यञ्जकस्य वा शब्दस्याश्रवणात् । न हि सूर्यो ज्योतिषां श्रेष्ठ इत्यतः चन्द्रवर्णनप्रकरणेऽपि तेनावश्यं प्रति-पाद्येन भाव्यम् । न प्रणत इति कर्तव्याकरणमात्रं हि गाथायामुच्यते, न तु हिंसारूपाकर्तव्यकरणम् । तदिह अपराधप्रसङ्गस्यैव विरहे स्वापराधो वा स्वभक्तापराधो वेति विशेषविमर्शनतदधीनसिद्धान्तविशेषकरणकोलाहलः सर्वः आपातग्रहणतृप्तत्वाविवेचनशीलत्वाभिज्ञजनावमाननोत्सवत्वाविजृम्भित इति ज्ञेयम् । 2.

एतेन भगवदवतारहेतुचिन्तनमिह सर्वथा सङ्गतिशून्यमित्युक्तप्रायम् । न परमेवमसङ्गतम् । भाष्यादिग्रन्थविरुद्धं च परैः कृतं हेत्ववधारणम् । तथा हि ।

न स्वात्मनो न लोकस्य परेषां लेखनी हिता ।
सा हिरण्यतनुन्यायात् सद्यो विध्वंसमर्हति ।

अथ वा

यदद्य बुद्धिस्थमशेषमेतद्
विस्मृत्य बालत्वमुपेत्य भूयः ।
गुरूनुदारानभिराध्य शिक्षां
नवां लभन्तां स्वहिते मतिश्चेत् ॥

---

# परिपन्थिशब्दः ॥

(V. R. Srinivasa Tatacharya Siromani)

अनुवृत्तः ।

पदमञ्जर्यां "यदि छन्दसीत्युच्यते कथं 'गिरिशमुपचचार प्रत्यहं सा सुकेशी', 'आरोपितं यद्गिरिशेन पश्चात्' इति । निरङ्कुशाः कवयः । अन्ये त्वाहुः— यो गिरौ शेते गिरिस्तस्यास्तीति लोमादिषु दर्शनाच्छप्रत्ययः । तथा चात्रैव वार्तिकं 'तद्धितो वा' इति । न च लोमादिष्वपि छन्दोग्रहणमस्ति । तेन भाषायामपि गिरिश इति भवति । एवं च कृत्वा निघण्टुषु पाठोऽप्युपपन्नो भवति । गिरौ शेते इति । गिरावास्त इत्यर्थः" इत्याख्यायत । अत्र वार्तिकानुसारिभाष्यकारमतस्य, सोपपत्तिकं गिरिशशब्दस्य भाषायामपि साधुत्वे न प्रतिपादनस्य, तत्साधुत्वाधीनबहुनिघण्टुतत्पाठसामञ्जस्यकथनस्य च दर्शनात् माधवीयधातुवृत्तौ भाष्यकारमतस्यैव हरदत्तसिद्धान्ततया कथनाच्च पूर्वत्र निरङ्कुशाः कवयः इत्यभिधानं हरदत्तस्यासंमतमित्यभ्युपेत्यम् ।

माधवीयधातुवृत्तौ तु 'गिरिशः । 'गिरौ डश्छन्दसि' इति डे टिलोपः । संज्ञाशब्दत्वात् भाषायामप्ययं प्रयुज्यते तुराषाडिति

वेत्याद्येयः । हरदत्तस्तु लोमादिलक्षणेन शप्रत्ययेन भाषायामपि भवति गिरिश इति । भाष्येऽप्येतद्वचनं प्रत्याख्यातं 'तद्धितो वा' इति ।' इति सोपपत्तिकपरमतोपन्यासेन तद्दूषणेन च भाषायां तत्साधुत्वं माधवसंमतमेवावसीयते । कौस्तुभे 'गिरौ डश्छन्दसि' । गिरौ शेते गिरिशः । तद्धितो वा । गिरिरस्यास्तीति गिरिशः । लोमादित्वाच्छः । इह यद्यपि कृत्तद्धिताभ्यां गिरिशशब्दो द्वेधा भाष्यवार्तिकयोर्व्युत्पादितः । तथापि लोके तद्धितान्त एव न तु कृदन्तः डश्छन्दसीत्युक्तेः । एवं च 'प्रत्याहतास्त्रो गिरिशप्रभावात्' 'आरोपितं यद्गिरिशेन पश्चात्' 'गिरिशमुपचचार प्रत्यहं सा सुकेशी' इत्यादिप्रयुञ्जानानां कवीनां न कोऽप्यपराधः । गिरौ शेते इति व्याचक्षाणानां प्रमाद एवेत्यवधेयम्' इति गिरिशशब्दस्य तद्धितान्तस्य भाषायामपि साधुत्वं सुष्ठु उपपाद्यत । कौमुद्यामयमर्थस्समगृह्यत । सुधायां 'गिरिराश्रयत्वेनास्यास्ति । लोमादित्वाच्छः स्वामी तु गिरिं श्यति उपभोगेन तनूकरोति । गिरौ शेते वा । 'गिरौ डश्छन्दसि' । लोके तु 'आशुशुक्षणिवदित्याह' इति, स्वामीत्विस्यत्रत्यतुशब्दयुक्तेन ग्रन्थेन लोकवेदसाधारणे नामलिङ्गानुशासने तद्धितान्तगिरिशशब्दपाठस्यैव युक्तता छान्दसकृदन्ततत्पाठस्यायुक्तता चाभण्यत । इत्थं च गिरिशशब्दस्य शप्रत्ययान्तस्य भाषायामपि साधुत्वं निराबाधं सिद्ध्यति ।

नान्ततान्तयोरर्वावच्छब्दयोः मघवन्मघवच्छब्दयोः 'छन्दसीवनिपौ च' इति वनिपा मतुपा च सिद्धत्वात् 'अर्वणस्त्रसावनञः' 'मघवा बहुलं' इति सूत्रद्वयेन नार्थः इति 'अवर्णस्तृमघोनश्च न शिष्यं छान्दसं हि तत् । मतुब्वन्योर्विधानाच्च छन्दस्युभयदर्शनात् ॥' इति वार्तिकेन तद्भाष्येण च निर्धारणात् 'एवं च अर्वन् मघवन् शब्दस्य भाषायां नास्ति प्रयोग इत्युक्तं भवति' इति तद्व्याख्यानप्रदीपे वार्तिकभाष्यफलितार्थकथनाच्च भाषायां तेषां शब्दानामसाधुत्वं लभ्यते । 'केशाद्वोऽन्यतरस्यां' इति सूत्रप्रदीपे 'मघवा बहुलम्' इत्येतन्न कर्तव्यम् श्वन्नुक्षन्निति निपातनात् मघशब्दान्मतुपा च भाषायामपि

शब्दद्वयस्य सिद्धत्वात्' इति व्याहारेण मघवमघवच्छब्दयोः भाषायामपि साधुत्वं भाव्यते। पदमञ्जर्यां तु 'मघवाबहुलम्' इति सूत्रे मघशब्दाद्वनिपि शसि संप्रसारणे यस्येति लोपमाशङ्क्य 'एवं तर्ह्यन्यदेवेदं अव्युत्पन्नं भविष्यति। तथा चैतस्य भाषायां प्रयोग उपपद्यते । यथा तु भाष्यं तथा न केवलमस्यैव अर्वणोऽपि भाषायामसाधुः प्रयोग' इत्यादिग्रन्थेन लोपाप्रवृत्तिं स्वमतेन मघवन्शब्दस्य भाषायां साधुत्वं चोक्त्वा भाष्यरीत्या मघवार्वन्शब्दयोः भाषायामसाधुत्वमवर्ण्यत । कौमुद्यां प्रौढमनोरमायां च मघवमघवच्छब्दयोः 'केशाद्व' इति सूत्रस्थप्रदीपानुरोधेन भाषायामपि साधुत्वं तत्र मघवन्शब्दासाधुत्वं प्रतिपादयतां 'मघवाबहुलम्' इति सूत्रस्थप्रदीपस्य वनिबन्तमध्योदात्तमघवन्शब्दविषयकत्वं कनिप्रत्यान्तस्याव्युत्पन्नस्य वा अन्तोदात्तमघवन्शब्दस्य भाषायामपि प्रयोगे न्यासग्रन्थस्याप्यानुकूल्यम् इत्यादिकमाख्यायत । शब्दरत्ने तु 'न शिष्यं छान्दसं हि तत्' इति वार्तिकतद्भाष्ययोः सामान्यप्रवृत्तयोर्मध्योदात्तमात्रविषयत्वेन सङ्कोचे प्रमाणं न किञ्चिदस्ति । कविप्रयोगाणां 'तं तस्थिवांसं नगरोपकण्ठे' इत्यादिविषये बहुशः प्रमाददर्शनात् तेषामपि नार्षवचनसङ्कोचकता । एतद्वार्तिकादिविरोधात् स्वग्रन्थविरोधाच्च 'केशाद्व' इति सूत्रस्थप्रदीपो हेय एव । अतो मघवन्शब्दस्य सर्वस्यापि लोके असाधुत्वमेवेति प्रपञ्चितम् । अयमेव सिद्धान्तः शेखरादिषु दृश्यते । 'इन्द्रो मरुत्वान् मघवा' इत्यमरकोशव्याख्यानसुधायां तु 'मह्यते पूज्यते । मह पूजायाम् । श्वन्नुक्षन्नित्यादिना मघवन्निति निपातितम । 'मघवा बहुलम्' इति तादेशपक्षे तु मघवानित्यपि बोध्यम्' इत्याद्युदित्वा अमरकोशो लोकवेदसाधारण इत्यभिप्रायेण 'हविर्जक्षिति निश्शङ्को मखेषु मघवानसौ' । इति भट्टिप्रयोग उदाहियत । एवं च 'केशाद्व' इति सूत्रप्रदीपन्यासपदमञ्जरीकौमुदीप्रौढमनोरमासुधादिभिः शिष्टप्रयोगसमर्थनतत्परैः मघवन् शब्दस्य साधुत्वं 'मघवाबहुलम्' इति सूत्रवार्तिकभाष्यप्रदीपशब्दरत्नशेखरादिभिस्तु तस्यासाधुत्वं चाभिहितमवगम्यते ।

'छन्दसि सहः' इति सूत्रस्य व्याख्यानं महाभाष्ये न दृश्यते । पदमञ्जर्यां तु तत्र सूत्रे 'तुरासाहं पुरोधाय' पृतनाषाडिद्रवषो वोढुं 'पुरुहूतः पृतनाषाट्' इति भाषायां प्रयोगाश्चिन्त्याः' इति सहेर्ण्व्य-न्तस्य भाषायामसाधुत्वं व्याह्रियत । कौस्तुभे तु 'सुप्युपपदे उप-सर्गे च सहेर्धातोश्छन्दसि ण्विप्रत्ययः स्यात् । दुश्च्यवनः पृतना-षाळयुद्ध्यः' 'अभीदमेकमेकोऽस्मि निःषाट्' । कथं तर्हि 'तुरासाहं पुरोधाय' 'धरातुरासाहि मदर्थयाच्ञा' इत्यादि छन्दसीत्युक्तेः भाषायां ण्विप्रत्ययानुपपत्तेरिति चेत् चिन्त्यमिति हरदत्तः । सह-तेरभिभवार्थात् निवृत्तप्रेषणात् प्राकृतेऽर्थे णिचि क्विब्वचोरन्यतर इति वा समाधेयम्' इत्याख्यायते स्म । अत्र शेखरे 'लोके तुरासा-हमित्यादिप्रयोगाश्चिन्त्या इति हरदत्तः' इत्यभाष्यत । अत्र चन्द्र-कलायां 'हरदत्त इति । अत्र अरुचिस्तु ण्विप्रत्ययस्य छन्दसि विधा-नेऽपि निवृत्तप्रेषणकात् सहधातोर्हेतुमण्णौ ततः क्विपि तुरासाह-मित्यस्य लोकेऽपि साधुत्वं सम्भवत्येवेति' इति व्याख्यानेन लोके तुरासाहमित्यादिप्रयोगस्य साधने या प्रक्रिया भट्टोजिदीक्षितस्या-भिमता सैव नागेशस्याप्यभिमतेति स्फुटमवगम्यते । चन्द्रकलोक्तां नागेशस्याशयः "'तुरं सहन इत्यर्थे 'छन्दसि सह' इति ण्विः । लोके तु साहयतेः क्विप्' इति . . मुद्यां लोके त्विति प्रतीकमुपादाय 'एतेन 'तुराषाण्मेघवाहन' इति व्याख्यातम्'' इति व्याहरता नागेशेनैवा-विष्क्रियते स्म ।

(अनुवर्ती)

षेक्स्पिअर् - कृतं

# यथाभिमतम् ॥

(प्रविशति लिबा)

रोसलिन्द् — वार्ताभिः पूर्णेन मुखेन ।

सिलिआ — याः अस्मासु निक्षेप्स्यति, यथा कपोताः स्वापत्यानि पुष्णन्ति * ।

---

* यथा कपोताः स्वापत्यानां मुखेषु धान्यानि निक्षिपन्ति तथेति भावः ।

रोसलिन्द्— ततो वयं वार्ताध्माता भविष्यामः।

सिलिआ— तावत् समीचीनम्। पण्यतरा[1] भविष्यामः Bon jour आर्य लिबा, का वार्ता?

लिबा— रम्ये राजकुमारि, हीनासि समीचीनेन विनोदेन।

सिलिआ— विनोदः! किंरूपः?

लिबा— किंरूपः, मातः! कथमहं प्रतिवदानि?[2]

रोसलिन्द्— यथा प्रज्ञा भाग्यं च बोधयेताम्।

निकषोपलः— यद्वा यथा शासिता शास्ति।

सिलिआ— सम्यगुक्तम्। करण्या[3] उपहितमिदम्।

निकषोपलः— न। यद्यहं स्वपदं न परिपालयामि,—

रोसलिन्द्— प्राक्तनेन गन्धेन हीयसे।

लिबा— यूयं मामाकुलयथ, श्रीमत्यः। उत्कृष्टं मल्लयुद्धं प्रति अत्रभवतीभ्यः कथितवान् स्याम्, यदत्रभवतीभिर्न दृष्टम्।

रोसलिन्द्— कथयतु भवान् नः मल्लयुद्धस्य प्रकारम्।

लिबा— आरम्भं वः कथयामि; यदि तत् अत्रभवतीनां प्रीत्यै भवति अवसानमत्रभवत्यः पश्यन्तु, यः उत्तमं कर्म इतःपरं करिष्यते। अस्मिन्, यत्र भवत्यो वर्तन्ते तत्रैव, स्थले तत् कर्तुं ते आगच्छन्तः सन्ति।

---

१ more markatable. २ किमाकारः कीदृशः इति सिलिआप्रश्नः। तदनवगच्छन् रूपशब्देन शुक्लनीलादिकं स्मरन् लिबा व्यामुह्यति। ३ भित्तिकाराणां सुधालेपनादिसाधनं करणीत्युच्यते। यथा करण्याघटिता इष्टका सुघटिता भवति तथेदमिति भावः।

सिलिआ— सम्यक् । आरम्भः, यो मृतो निखातश्च * ।

लि बा— वृद्धः कश्चिदागच्छति, तस्य त्रयः पुत्राश्च,—

सिलिआ— इदमहं पुराणकथाऽऽरम्भेण उपमिनुयाम् ।

लि बा— त्रयोऽभिरूपा युवानः, परिपुष्टाः बहुधीराः ।

रोसलिन्द्— कण्ठलग्नाभिः प्रकटनाभिः—"ज्ञातमस्तु सर्वेषां मनुष्याणां एतैरुपहारैः,— "

लि बा— त्रिषु ज्येष्ठः अमल्लिष्ट राजमल्लेन चार्लेस्-अनेन यस्तं क्षणेन अक्षेप्सीत् ; तस्य तिस्रो धमनीः अच्छैत्सीच्च यथा तस्य जीवने आशा अत्यल्पा । तथा स द्वितीयं प्रत्यकरोत् । तथा तृतीयम् । अमुत्र ते शेरते । तपस्वी वृद्धः तान् प्रति तथा करुणं शोचन् आस्ते, यथा सर्वे द्रष्टारः रुदितेन तन्मयीभवन्ति ।

रोसलिन्द्— अहो बत ।

निकषोपलः— कः पुनः स विनोदः, आर्य, येन श्रीमत्यो हीनाः ।

लि बा— अयमेव यमहं कथयामि ।

निकषोपलः— इत्थं मनुष्याः प्रत्यहं बुद्धिमत्तरा जायन्ते । अयं प्रथमो वारः यदहं शृणोमि धमनिच्छेदनं श्रीमतीनां विनोद इति ।

सिलिआ— अहं वा, अहं ते प्रतिजाने ।

रोसलिन्द्— अथ किं अन्यः कश्चिदस्ति यः स्वपार्श्वे द्रष्टुमिच्छति इदं छिन्नसंगीतकं ? किमस्ति कश्चिदपरः धमनिच्छेदलोलुपः । किमिदं मल्लयुद्धमावां पश्येव, स्वसः ?

लि बा— अवश्यं भवतीभ्यां द्रष्टव्यम्, यद्यत्र वर्तेयातां भवत्यौ । यत इदमेव स्थानं मल्लयुद्धाय निर्धारितम् । तौ च सज्जौ तत्कर्तुम् ।

सिलिआ—अमुत्र, निश्चितम्, ते आगच्छन्तः सन्ति । अत्र स्थित्वा पश्येव ।

---

* कथ्यतामिति शेषः । स हि अतीतः । न द्रष्टुमशक्यः । त्वन्मुखादेव ज्ञातव्यः । तस्मात् कथयेति भावः ।

(तूर्यध्वनिः । प्रविशन्ति राजाफ्रेडेरिक्,प्रभवः आर्लण्डो,चार्लस्,सेवकाश्च)

राजा— एहि तावत् । यदयं बालः उपसान्त्वं नेच्छति तदात्मनाशोऽस्य उद्यमे * ।

रोसलिंद्— अमुत्र स मनुष्यः ?

लिंबा— साक्षात् सः, मातः ।

सिलिआ— कष्टम् । अतिबलः सः । अथापि जिष्णुर्दृश्यते ।

राजा— कथमिदानीं, दुहितः, भ्रातृपुत्रि । किं मल्लयुद्धप्रेक्षणाय सृप्ते भवथः ?

रोसालिंद्— आं प्रभो । तत् प्रसन्नो भवाननुमन्यताम् ।

राजा— अल्पो हर्षस्तत्र युवयोर्भविष्यति, अहं वदेयम, तावद् वैषम्यमस्ति अस्मिन् मनुष्ये । अस्ति मेऽनुकम्पा आह्वातुर्बालभावं प्रति । सप्रमोदमेनमहं परावर्तयेयम् ; न स्वयमुपसान्त्वमङ्गीकरोति । तस्मै भाषेथां, श्रीमत्यौ पश्यतं यदि युवां तं चलयितुं शक्नुथः ।

सिलिआ— इह तमाहूय साधो आर्यलिंबा ।

राजा— तथा कुरुतम् ।

# पाठशुद्धिः ॥

(1)

श्रीभाष्ये वैश्वानराधिकरणान्ते 'यः पूर्वमुपास्यतयोपदिष्टो वैश्वानरः तस्यावयवभूतान् अग्न्यादित्यादीन् सुतेजोविश्वरूपादिनामधेयानुपासकशरीरे मूर्धादिपादान्तेषु सम्पादयति' इत्यस्मिन् ग्रन्थे अग्न्यादित्यादीनित्यत्र अग्नीति अनन्वितं भाति । उपनिषद्भाष्योदाहृतेऽस्मिन्नेव श्रीभाष्यग्रन्थे 'द्युवादित्यादीन्' इति दृश्यते । स एव तात्त्विकः पाठो भवितुमर्हति ।

शिष्यामु श्रीनिवासपाट्टराचार्यैः ।

* स्वविनाशफल एवास्योद्यमः इत्यर्थः ।

(२)

श्रीतात्पर्यचन्द्रिकायां सहजं कर्म कौन्तेयेति श्लोकविवरणान्ते 'ज्ञानारम्भेषु तु अत्यासन्नत्वेऽपि कफोणिगूढायमानप्रत्यग्विषयान्वेषणेन इन्द्रियमनोनियमनप्रयासो दुःखात्मकः' इति पठ्यते। अत्र कफोणिगूढायमानेत्यस्य कोऽर्थ इति न ज्ञायते। 'कफोणिगुडायमान' इति पठितव्यमिति वृद्धाः। कफोणिः कूर्परः। भुजं आकुञ्च्य अङ्गुलीनां अंसस्पर्शे सम्पादिते अधस्तात् स्थितः यः अस्थिमयो भुजमध्यसन्धिग्रन्थिः स इत्यर्थः। तत्र स्थितं गुडं मुखसमीपे नीतं अतिसन्निहितमपि जिह्वया लीढ्वा आस्वादयितुं न शक्यते। तथा प्रत्यगात्मा हृदये स्थितोऽपि अनुभवितुं न शक्यते। तेन सः कफोणिगुडायत इति समञ्जसोऽर्थः।

**मनसालकट्टे गोविन्दाचार्यः।**

---

I

माता—आस्स्व, दुष्टवटो। मातुल आगमिष्यति। पश्य किं त्वां करोतीति।

बालः—अयि अम्ब, भीतोऽस्मि। किं करिष्यति। ब्रूहि तावत्।

माता—किमिति इदानीं मया वक्तव्यम्। स आगच्छतु; ततो ज्ञास्यसि यत् स करिष्यति।

II

मातुलः—बालक, अपि जानासि घटिकाहरं द्रष्टुम्। गत्वा पश्य कति घण्टा इति।

बालः—नाहं जानामि, माम, घटिकाहरं द्रष्टुम्।

मातुलः—सम्यक्। मा ज्ञासीः यदि न जानासि। गत्वा बृहत् 'कण्टकं' कुत्र वर्तते, क्षुद्रं 'कण्टकं' कुत्र वर्तते इति दृष्ट्वा मे वद।

बालः—गच्छ मातुल, तव कार्यं नास्ति। क्षुद्रकण्टकं लतायां वर्तते। महत् कण्टकं वृक्षे वर्तते।

## III

मातुलः— एहि बालक भोक्तुम् । वयं सर्वे भोक्ष्यामहे ।

बालः— नाहं भोक्ष्ये । न मे क्षुदस्ति । सायं भक्ष्याणि भक्षितवानस्मि ।

मातुलः— कुतो भक्ष्याणि भक्षितवानभूः । ज्ञातं हि ते तद्भक्षणे अन्नं भोक्तुं क्षुन्न भवेदिति ।

बालः— आं, माम, ज्ञातम् । किन्तु अन्नभोजने हि भक्ष्यभक्षणाय क्षुन्न भवेत् ।

## IV

मातुलः— बालक, सिनिमादर्शनाय गमिष्यामि । एहि त्वरितम् ।

बालः— अयमागतोस्मि ।

मातुलः— बालक, सिनिमा-दर्शनमद्य न तथा रमणीयम् । किञ्चित् संलपाम । कथं ते उपाध्यायो वर्तते । कथय ।

बालः— उपाध्यायं नु पृच्छसि । स्थूलखर्वाटशिराः । चिपिटनासः । तुन्दिलः । निर्घृणः । सदाऽस्मान् प्रहरति । सर्वदा दुर्मुखः........

मातुलः— बालक, पृष्ठतः पश्य कस्तिष्ठतीति ।

## V

उपाध्यायः—दुष्टवटो, मां प्रति किमवदः ह्यो रात्रौ । अयं न भवसि धूर्त । गृहाण वेत्रप्रहारान्—एकं द्वे त्रीणि...

## VI

बालः—अम्ब, पश्य मातुलस्य उपाध्यायस्य च क्रौर्यम्....

(विकटमुपजीव्य लिखितम्)

---

# "मुरारे! त्रायस्व"

शोकाग्निना मधुरिपो ! बत दुस्सहेन
दन्दह्यते प्रतिकलं हृदयं मदीयम्।
कोष्णाश्रुवारिमलिनीकृतगण्डदेशः
सोऽयं जनः स्मरति ते चरणाम्बुजातम्॥

दुःखाश्रुभिः प्रतिदिनं तव पादपद्मं
प्रक्षालयन्तमधुना मधुकैटभारे!।
त्रायस्व देव! करुणार्द्रकटाक्षपातैः
हित्वा भवन्तमपरो न हि मे शरण्यः॥

दुःखानि मे परिहरन् सकलानि तानि
गोपीकुमार! जनयन्नितरां प्रमोदम्।
त्रायस्व दीनजनपालनसक्तबुद्धे!
नामावशेषितमुरारिकुल! प्रभो! माम्॥

क्षीरोदधौ वटदलस्य पुटे शयानः
स्मेराननः स्मरमनोहरकायकान्तिः।
वन्दारुकल्पतरुरस्तु शुभाय नित्यं
विश्वत्रयप्रणुतपादसरोरुहो मे॥

कविः— तोण्डमले नारायणभट्टः

---

उद्यानपत्रिकायाः विंशवर्ष-

# विषयसूची॥

## UDYANA PATRIKA

## (XX Year)

## CONTENTS


1 मेनका। 1, 29, 53, 77, 101.
2 सुभाषितनीवी। [पण्डित श्रीनिवासताताचार्यः] 5, 33, 57, 81, 105.

3 म (प्र) २ । 9.
4 मुद्रणकौशलम् । 16.
5 आद्यन्तौ टकितौ । (V. R. S. Tatacharya Siromani) 23.
6 रामस्य प्रेष्ठः सुहृत् कः । (Duraiswami Iyengar) 25.
7 पुस्तकपरामर्शः । 28, 50.
8 विमुञ्चथ (२) । 37.
9 वैदिकम् (२) [तिङन्तम्, उपसर्गः, उपांशु, समासः, उपसर्गार्थः] 38, 61, 85, 109.
10 प्रतिबोधनम् । 40.
11 षष्ठी हेतुप्रयोगे । (V.R.S. Tatacharya Siromani) 42
12 यथाभिमतम् नाम नाटकम् । 45, 71, 89, 121.
13 प्रकीर्णकम् । 51, 125.
14 रावणप्रणतिः (२) । 63.
,, (३) in the wrapper of 9 & 10
15 कुपथशब्दः । (V. R. S Tatacharya Siromani) 69
16 पाठशुद्धिः । (शिन्नामु, श्रीनिवासपाट्टराचार्यः) 76.
,, (मनलालकट्टै गोविन्दाचार्यः) 124.
17 परिपन्थिशब्दः । (V. R. S. Tatacharya Siromani) 86, 118.
18 वात्सल्यचन्द्रिका । (T. E. Viraraghavacharya Siromani) 92.
19 कुमारसम्भवः । (U. Venkatakrishna Rao M. A. Lecturer in Sanskrit.) 96
20 पाठविमर्शः । 99.
21 गाथार्थः । 112.
22 मुरारे ! त्रायस्व । (तोण्डमले नारायणभट्टः) 127.
23 विषयसूची । 128.

---

शास्त्रानुबन्धः ।

कुवलयानन्दः । (बुधरञ्जनीसमेतः) [181—220]

---

SANSKRIT VIDYAPEETHA TIRUPATI.
986